नवाधिकं त्याज्यमतो नवेभ्यः //३०//

26b. नियानि IO 26c. °स्वेव Q, °स्वपि W, °स्वस्व L 26d. तथायथानि C 27a. °वीर्यैः ACRT 27b. दशादि° corr. to दशाभि° C, राश्यादि° W 27d. स्वांश° BR, स्वांशा° LQW 28c. यथायतानि BIR, यथायतानि O 28d. °भोक्त्रीणि R, °भोकृणि Q, °भोक्त्रीणि W, °भोक्तृणि T, °भोक्तानि ABILOS, °भोवानि corr. to भोक्तानि C
— LQW 29b. कुंभौस्य B 29c. हनादिकं T, घनादिकं C
30a-32d om. LQW 30b. °सुस° IO 30c. विष्णवंशकाद्यं S, दशांशकाद्यं T, दशांशकास्यं C °मानवैक CT, °मानमोक्षकं in marg. C 30d. °मथो C

फलं फलांशाभिहतं नखोद्धृतं
    शेषं फलं त्रिंशतिभागसंमितम् ।
ज्ञेयं ततो नीचफलं स्वसत्तमाः-
                द्राग्वेर्ग्रहाणां विधिनामुनैव ॥३१॥
लग्ने तृतीये   ऽष्टमके च लग्नजं
    फलं तथा त्रिंशतिमेव भावजम् ।
स्थाने विचिन्त्यं कुटिलो
    ष्येतानि सौम्यानि दशाफलं च ॥३२॥
नीचे ऽस्तगे चार्धफलं शुभग्रहे
    पूर्णत्वमिष्टैर्विपरीतमशुभगैः ।
नीचास्तगे वक्रगते समं फलं
    तस्यैव तुङ्गे द्विगुणं प्रकीर्तितम् ॥३३॥
पापा दशा पापभवान्तरा वा
    पापाष्टवर्गे च.दृष्टा न शुभ्रा ।
——मृत्युर्दिवसे हि तस्य
    संजायते पापकृतस्य जन्तोः ॥३४॥
दशाप्रवेशे ऽष्टमगे तु दृष्टे
    स्वेनारिणा शत्रुगृहस्थितेन ।
तदापमृत्युं कुरुते दशायां
    तस्यैव पापोद्भवपाकमध्ये ॥३५॥

31a. फलांशो निहतं ABCST, फलांशैर्निहतं OR, फलांशेन हितं I 31b. °सन्मितं B, °संस्मितं O, °संचितं C 31c. ततो नीच° om. BI, सतो नीच° OR 31d °द्रवे° CO 32c. विचिंत्या BCT, त्रिचिंत्या I 33a. नीचास्तगे C 33b. पूर्णं त्व° LQW, पूर्वं त्व° CT, पुन्मत्व° S, पूत्व° A °मिष्टं CLQW, °मिष्टं AORST, °मिष्टे BI विपरीतमशुभगैः om. C 33c. नीचास्तगै° C 34a. पापभया° ABCIORST, पापभावा° LW या ILOQRSW, °च्या T 34b. °दा om. AS शुभ्राः ABCLOQRTW 35a–d om. W 34d. पापकृतस्य ILQ 35b. स्तेनारिणा O, रिणा R, दृष्टोरुणा C

निशांशके यस्य गृहस्य संस्थः
स्थाने ऽष्टमे पापफलः शुभो वा /
तेनैव दृष्टः कुरुते ऽपमृत्युं
रेण तस्यैव यमोदिते वा //३६//
पाकाधिपः सर्वविरुद्धवर्गे
स्थितो ऽपमृत्युं कुरुते नराणाम् /
क्रूरैर्विदृष्टो यदि वा न सौम्यै-
र्नीचाश्रितो वा खलु निर्जितश्च //३७//
षड्वर्गमध्ये न यदायुः समा
विभाजयेत्तेन परंपराणाम् /
लब्धं च यच्छेदकसंश्रितं तत्
छेदात् परं जन्मवदेव चिन्त्यम् //३८//
छेदो ऽपमृत्युर्मरणं तृतीयं
भजेद्वराणां नियतं सदैव /
धर्मक्रियाभिर्हरते ऽपमृत्युं
छेदं न कृच्छ्रेण महाप्रभावात् //३९//
असाधनं स्यान्न मरणं नराणां
सर्वैरुपायैरपि देवतानाम् //४०//
पाकाधिपः स्याद्यदि सौम्यवर्गे
दशाप्रवेशे त्वथ तुङ्गगो वा /
न छेदकः स्याच्च तथापमृत्यु-
स्तस्यां दशायामिदमाह वेधाः //४१//

36a. गृहस्य LQST संस्थिता: C 37a. पाकाधिकः T, पाकाधिः A, पापाधिकः BCI LQW, पापापाधिपः O 37c. क्रूरैर्हि LQW
38a. षड्वर्ग° C, षड्वाह° S, दशाब्द° LQW समास I, फलानि: AS, फलानि° O 38b. °पराणं ABO, प्रमाणं C, नराणां T 38c. °संश्रितं T तु C 39d. गृह° C 40a. असाधनं ABCIOQRSTW, अस्यनं L 41a. पाकाधिपे ABIOQRST, पाकाधिपे W, पापाधिपे CL

नीचप्रवृत्ता रविमण्डलस्था
    ग्रहेण भग्नाः खलवर्गयुक्ताः /
सर्पाहता मन्त्रबलेन यद्वत्
    तद्वत् सवर्गाः शुभदा न खेटाः //४२//
एवंविधा घ्नन्ति शुभानि सर्वे
    फलानि पापानि च वर्धयन्ति /
मिश्राश्च मिश्रं परिपाचयन्ति
    नीचास्तकेन्द्रे फलपाकहानिः //४३//
इति श्रीवृद्धयवने दशाध्यायः //

42d. तद्वत् om. QW   43a. घ्नंति] घ्नति LQW   43b. च om. B, [illegible] LQW
43c-d om. BLQW   43d. नीचास्तकेन्द्रे S, नीचास्तयुद्धे OR   col.
इति श्रीवृद्धयवनभाषाटीकायां संग्रहीश्रीमोहनदासजीकारीत
दशाध्याय Q   col. श्री° om. RT   दशाध्यायहमः C

भानोर्दशायां यदि शीतरश्मे-
    र्दशाविपाकं कुरुते तदा स्यात् /
क्लेशेन वित्तं स्वधनेन मित्रं
    भोगांश्च नित्यं हि विडम्बनेन //१//
हृद्रोगभीर्षा स्वजनापमानं
    भयं सशोकं प्रियलोकनाशम् /
भानोर्दशायां कुरुते प्रविष्टा
    दशा महीजस्य क्षतप्रकोपम् //२//
बौधी विधत्ते पतितस्य लाभं
    कुमित्रसङ्गं परिवारलाभम् /
अपात्रदानं विषयातिवेगं
    भानोर्दशायां यदि संप्रविष्टा //३//
भानोर्दशायां सुरपूजितस्य
    दशा विधत्ते कुनृपेण सख्यम् /
असत्क्षयं पापविधानलाभं
    दुष्टाबलासङ्गमसत्यमेव //४//
शौक्री खरांशोर्यदि संप्रवृत्ता
    दशा दशायां कुरुते कुपुत्रम् /
कावत्तला कुजनेन सख्यं
    विदेशतः प्राप्तिभयो नराणाम् //५//

1b. यदा LQW   1c. स्वजनेन LQW   2a. °भीर्षा Q, °भीष्म BI, °भीर्ळा C   2c. विषानि वेगं wr. above कुरुते प्रविष्टा C प्रदिष्टा O   2d. महीजे CT, महीज L   क्षतज: प्रकोपं CR, क्षतशप्रकोपं T   3d om. R   4d. दुष्टाबला° L, दुष्टाविभा° C °सत्यसेवा ARST, °सत्यलेवा BI, °सत्फले च LQ, °सेत्फलं च W   5a संप्रविष्टा C   5b. दशा om. A

दृश्याविपाके दिनपस्य सौरी
दृश्या प्रविष्टाविरुजं विधत्ते /
वृथाटनं बन्धुजनेन वैरं
तुच्छस्त्रभूपालकृतं भयं च //६//
लाग्नी दृश्या सौम्यविलग्नजाता
भानोर्दृश्यायां स्वरवेश्वरासिम् /
अश्वीयमस्त्रप्रभवं च लाभं
सामर्कटव्योमविचारिणीनाम् //७//
पापोद्गता पापमतिं विधत्ते
द्विजामरदेवगुरुप्रकोपम् /
अन्तर्दृश्या सा दिनपस्य नित्यं
भयं दृश्यायां नृपचौरजातम् //८//
तृष्णौषधीसेवनचौर्यलाभं
सौख्यं रतोत्थं विटकामिनीभिः /
ं विविधौघ दृम्भै
रविर्दृश्यायां कुरुते हिमांशोः //९//
कुभोजनाच्छादनपानलाभं
कुस्त्रीप्रसङ्गं कुधनं विचित्रम् /
दृश्या महीजस्य सुधाकरस्य
प्राप्ता दृश्यायां परपोषणं च //१०//

6a. तपनस्य LQW 6d. वा R 7a. अन्तर्दृश्या V, which begins here 7c. अश्वाय° BILQRW, अस्वाय° O 7d. °टास्व्यो° W, °टास्व्या° L, °टाव्यो° Q 8a. पापयुतिं S 8c. सामरपूजितस्य ABCIORS, नानरपूजितस्य T, सा नरपूजितस्य V after this verse AST add: अथ चन्द्रान्तर्दृश्याफलानि 9–14 om. V 9a. तृष्णेध्यास: ABO R in marg., -- ध्यस: S, तृष्णाप्रस: I, मृष्टौषधा° R, अष्टौषधा° C, अष्टौ यथा T, तृष्णार्थसं° LQ, तृष्टार्थसं° W 9b. सौख्यां ABC तरोत्थं ABLOT, तरोष्टं Q, तरोठं W, तरोस्य CI, तटोत्थं S विकटामिनिन्त्य: ABOR, विकटामिनित्यं I, विकटानि नित्यं LQW, विटा --- नित्य: S 9c. कुपुष्प° QW विविधं च ABCILOQR STW दृम्भं LQRW, भेदं C

त्नार्थहस्त्यश्वसुवर्णला
भं स्ववृद्धिं प्रियतां च लोके /
बौधी दशा चन्द्रदशाप्रवेशे
करोति मर्त्यं बहुवित्तलाभम् //११//
नरेन्द्रपूजा द्विजदेवभक्ति-
यशः प्रशंसा स्थिरमित्रलाभम् /
पुण्यानि शुभ्राणि नयं परेषां
चान्द्रीं यदा देवगुरोः प्रयाता //१२//
लाभं परग्राममहाधनानां
विहारविद्यागमवाजिनां च /
शौक्री दशा चन्द्रदशां प्रयाता
करोति तुष्टिं परमां सदैव //१३//
शौरावलीसाधिनमुख्यलाभं
पापानुरागं व्यसनेन सिद्धिम् /
सौरेर्दशा चन्द्रदशां प्रयाता
वेश्यानुरागं कुरुते प्रभूतिम् //१४//
सौम्योदयोत्था हि दशा हिमांशो-
र्यदा दशायां कुरुते प्रवेशम् /
अर्थलाभं कृषिकर्मसिद्धिं
नृणां विधत्ते विविधांश्च भोगान् //१५//

12b. सुतमित्र° CRT 12c. पण्यानि R, पुन्याति Q 12d. प्रयाति QW 13b. विहारा ABCLOQRSTW, विहाया° I °वेशागम° I 13d. पुष्टिं C, बुद्धिं LQW 14a. सौरावली° I, सौरी वली ABCORST, सौरी दशा LQW °साहितं ABCILOQRSTW 14d. प्रभूतं ABCILOQRS, प्रसूतः W

खलोद्यमोत्था हिमगोर्दशायां
खरोष्ट्रधर्मप्रभवं च लाभम् /
कुशास्त्रसेवां प्रणयेन वैरं
स्वबान्धवैर्मित्रसुतैश्च नित्यम् //१६//

दशा खरांशोर्धरणीसुतस्य
यदा दशायां कुरुते प्रवेशम् /
तदा ज्वरश्लेष्मसपित्तवातैः
पीडां विधत्ते घनजैर्विकारैः //१७//

सौम्यां हिमांशोः सहसा प्रयाता
दशा दशायां कुनयेन लाभम् /
न्यूनानुरागं परदारसौख्यं
प्रपोषणं देवगुरुद्विजानाम् //१८//

बौधी दशा सौमदशां प्रयाता
करोति सौख्यं वनदेशजातम् /
आत्मप्रशंसाजनितं च तोषं
नृणां महायासभवं च सौख्यम् //१९//

सौम्यां यदा देवपुरोहि:
दशा प्रयाता त्वरितं दशायाम् /
करोति दैन्यप्रभवं च लाभं
पराबलायाः स्वकलत्रहानिम् //२०//

16a. हि दशा हिमांशो C 16c. प्रणवेन ABCIORSTV 16d. °सुतैश्च BC after this verse AST add: अथ सौमदशायामन्तर्दशा 17-2a om. V 17a. यदा LQ, खरा W 18a. सौम्या BCILORW प्रजाता O 18b. दशा om. Q 18c. °दार° om. AS 18d. प्रमोषणं ARS 19b. सख्यं W 19d. सौख्यं] चित्तं R 20a. सौम्यां CIORT C repeats 16c–19c 20a-c after 20c. (20 after 21 in W) 20d. °बलायाश्च कलत्र° Q °हानि: ABIORSTW

विधत्ते ऽन्यजनेन मैत्रीं
कश्चिद्विवादं कश्चिदेव हर्षम् /
परापराधोद्भवमाशु कर्म
नृणां विधत्ते ऽन्यफलां च बुद्धिम् //२१//
गुह्यप्रकोपं बहुगुह्यरोगं
पामाविचर्चिप्रभवां हि पीडाम् /
सौरी दशा शुक्रदशाविपाके
प्राप्ता सुवैरं निजबन्धुदारैः //२२//
लाग्नी दशा भौमदशां प्रयाता
वाक्यानि धत्ते परदाररागम् /
कश्चिद्भयं पार्थिवजं च लाभं
कश्चित् कश्चिद्बन्धुजने प्रहर्षम् //२३//
खलोदयोत्था च दशा दशायां
भौमस्य धत्ते स्वरुजाङ्गपीडाम् /
मानापमानं निजलोकमध्ये
मिथ्या प्रवादं स्वपरैः सदैव //२४//
एवं दशा सौम्यदशां प्रयाता
करोति मानं कुलजं सदैव /
लाभं विकृत्या परदेशतो ऽन्यन्
मायापटुत्वं बहुकामसेवाम् //२५//

21a. मैत्री ABOT 21b. °वादः ABILORSTW हर्षः ABILORSTW 22a. गुह्यप्रकोपं ABILOQRSW 22b. पापा° AIOSTW °विचर्चि° ABCIORST च LRSTW 22d. सुवैरं] सदारं C 23a. भौम्यगृहं AS, सौम्यगृहं BCILQW, सौम्यगेहं RT, सौम्यगृहा Q 23b. वाक्यान्विधत्ते AORST, बलान्विधत्ते V °दारगं च TV 23d. प्रहर्षः ABCIOSTVW 24a. °योपा च A, °याया च S, °योप च V, °योस्यात्र C, °योस्या च IO दशा om. B 24b. भौमस्य BIORV, भौम प्र° T, भौम A सुरुजां° LW, सरुजां° Q after this verse S adds अथ बुधान्तर्दशाफलानि, T adds अथ बुधान्तर्दशा 25a-31b om. V 25a. प्रजाता O 25d. माया°] सदा LQW

दृशा प्रयाता

तदा विधत्ते नृपतेस्तु मानम् /
आरोग्यतां साधुजनेन सौख्यं
रोगान् विचित्रान् द्विजदेवसेवाम् //२६//

चिनानि

कौशोद्भवः संशय एव पुंसाम् /
यदा दशायां शशिजस्य याता
दशा धरित्रीतनयस्य नित्यम् //२७//
विद्यागमं पार्थिवमानमोजो
जयं विवेकं प्रियतां च लोके /
यदा दशा देवपुरोहितस्य
बौध्यां प्रयाता सततं विधत्ते //२८//
मानं प्रशंसां नृपलोकसख्यं
विद्यार्जनं धर्ममतिं सदैव /
शौक्री दशा सौम्यदशां प्रपन्ना
करोति मुक्तामणिविद्रुमलाभान् //२९//
ब्रणप्रकोपं कलहं कुबुद्धिं
विदेशवासं मतिसंक्षयं च /
सौरी दशा सौम्यदशाविपाके
धत्ते नराणां बहुवित्तनाशम् //३०//

26a. प्रजाता O 27a. उद्वेगमी° ABCILOQRSTW °षो QT W, °र्ष्यां ABCILORS 27c. जाता BCIOQTW, जाते R, गंता AS 28b. विवेक: ABCORT, विवेक LSW 28d. प्रजाता O हि धत्ते R 29a. प्रसादं LQW °सौख्यं C 28c. प्रयाता T 29d. मुक्तामणि° BI °लाभात् Q, °लाभं LT 30b. देवाश्रसंसं W 30c. सौम्य° B

यशःप्रतापं परमं च सौ·
चतुष्पदाच्छादनभूमिलाभम् /
लाग्नी दशा सौम्यविलग्नजाता
बौध्यां दशायां विविधं च भोगम् //३१//
कुटुम्बवैरं पशुविनाशं
रोगान् विचित्रान् सततं च युद्धम् /
द्योत्था तु दशा दशायां
लाग्नी विधत्ते शशिनन्दनस्य //३२//
देवद्विजोत्थं कुरुते सलाभं
प्रपोषणोत्थं विविधैः प्रपंचैः /
दशा यदा देवपुरोहितस्य
भानोर्दशायां कुरुते विपाकम् //३३//
नानार्थलाभं पशुपुत्रवृद्धिं
यशःप्रमोदं प्रभुतां सदैव /
गुरोर्दशा रात्रिपतेर्दशायां
सौख्यानि धत्ते विविधानि पुंसाम् //३४//
कृच्छ्रेण सिद्धिं बहुदैन्यमेव
स्वपक्षविद्वेषणतश्च लाभम् /
वेश्यानरागं कपटं नितान्तं
गुरोर्दशां भौमदशा प्रपन्ना //३५//

31a. परतं B, वरज्ञं W, रज्ञतं L, रत्नं Q   सौम्यं A, सौच्चं B   31b. °दाद्यं° ABIS, °दोद्यं Q, °दोत्थं LW   धन° LQW   31d. बुद्धेर्विवृद्धि° C   32b. च -- I, कवाद्धिं LQW   32c. ध्योत्था I   दशा om. L   after this verse AS add अथ गुरोरन्तर्दशाफलानि, T adds अथ गुरुदशा   33a. °जोच्चं V   33b. प्रपोषणत्वं LQW, प्रमोषणोत्थं R, प्रयाषणीत्थं V   33c–38d om. V   33c. प्राप्ता दशा देव° L   34b. °प्रमोदः ABCILRST   34c. गुरोर्द B, गुरोर्यदा LQW   °दशायां] पर्वाल्लांता A, प्रयाता ST   34d. सौम्यानि B   35d. प्रयाता

हस्त्यश्वयानाशनभोजनानि
    नानाविमिश्राणि च मण्डनानि /
बौधी दशा देवपुरोहितस्य
    ददाति पात्रान् विविधांश्च भृत्यान् //३६//
नृपप्रसादं बहुवित्तला ·
    धर्मानुरागं विजयं रिपूणाम् /
भृगोर्दशा जीवदशाविपाके
    पुंसां विधत्ते सुबहुप्रशंसाम् //३७//
निधानरागं ......
    नीचेन सख्यं परधर्मसेवाम् /
सौरेर्दशा जीवदशाविपाके
    नृणां विधत्ते परबंधनानि //३८//
लाग्नी दशा सद्गुरुजा प्रयाता
    गुरोर्दशायां   कुरुते प्रहर्षम् /
हस्त्यश्वलाभं नृपतेश्च मानं
    विवेकतां धर्ममतिं सदैव //३९//
पापोद्भवा लग्नदशा दशायां
    जीवस्य धत्ते कलहेन लाभम् /
संसेवया नीचजनस्य नित्यं
    विदूषणं साधुजनस्य पुंसाम् //४०//

36a. °यानासन° LQ   36b. मंडलानि LQW   37d. नृणां LQW
39a. सद्गुरुना SW   प्रजाता O   39b. क्रियते प्रहर्षः ABCILOQRS
TVW   40a. पापोदयोत्था तु दशा V   प्रयाता C   40d. पुंसः
W   after this verse S adds अथ शुक्रान्तर्दशाफलानि, T adds
अथ शौक्री दशा

लाभं सरोष्ठप्रभवं नराणां
कथाप्रसंगं चैव जनापवादम् /
शौक्री दशा सौर्यदशाविपाके
करोति बालस्य तथा प्रमोहम् //४१//
धर्मक्रियाराधनमुत्तमानां
लाभं पुरश्रेणिविलासिनीनाम् /
भृगोर्दशा रात्रिपतेर्दशायां
नृणां विधत्ते बहुवित्तजं च //४२//
विदेशवासं परपक्षपूजां
कुधर्मसेवां कुजनानुरागम् /
भृगोर्दशायां भौमदशा प्रयाता
करोति वेश्याजनसंप्रयोगम् //४३//
विद्यां विवेकं ध[illegible] च कीर्तिं
सधर्मलब्धिं नृपमेव मानम् /
दशा भृगोः सौम्यदशाविपाके
नृणां विधत्ते गजवाजिलाभम् //४४//
लाभं गृहक्षेत्रपुरात्स्वजातं
सुवर्णरत्नाम्बरभोजनानाम् /
दशा भृगोर्जीवदशाविपाके
करोति लाभं सुतदारसौख्यम् //४५//

---

7 om. V   41c. सूर्यदशा° LQRW   41d. प्रमोदं ACIOST
°पुत्तमानां I, °पुत्रमानां C   42d. °वित्तलाभं LQW   43c.
ता O   44a. विवेकां प्र° A, IORS, °[illegible]कांश्च T
नं IR   कर्त्ते B, लोके LQW   44c. लाभं RS, °लाभं LQW
पुराद्विजात CLQW   45c. भृगोर्दशा W

प्रमादनिद्राकलहं सुवेश-
मालस्यतां देहकृशं च लाभम् ।
द्रोहं स्ववर्गेण परेण
इति शौक्री रविजस्य पाके ॥४६॥
शौक्रीं दशां लग्नदशा प्रयाता
सौम्योद्भवायं कुरुते ऽर्थसिद्धिम् ।
प्रतापवृद्धिं प्रभुतां विवेकं
. . . . ॥४७॥
पापोद्भवे वंचनतस्तु लाभं
हिंस्रेण पापं बहुगर्हितेन ।
कुकर्मणा साधुनिपीडनेन
भृगोर्दशा लग्नदशाविपाके ॥४८॥
भान्वी दशा भानुदशाविपाके
करोति नाशं धनपुत्रसम्भवम् ।
क्लेशं प्रवासं भयमिष्टहानिं
देवद्विजानां परिपीडनं च ॥४९॥
चान्द्री दशा चन्द्रदशाविपाके
आलस्यमार्तिं कुरुते सदैव ।
कुकर्मसिद्धिं कुजनस्य लाभं
कुकर्मसेवां सततं नराणाम् ॥५०॥

46a. °कलहैः W 46c. साम्यं LQW, सत्यं R 47 om. CTV, add. in marg. C 47a. प्रजाता O, प्रपन्ना S, प्रवश A 47b. °द्भवायां ABCILOQRSW 47d. भृगोर्दशा लग्नदशाविपाके ABILOQRSW, भृगोर्दशा लग्नदशाविभागे C 48a. पापोद्भवा नैव च वस्तुला- LQW 48a. चनवतस्त A, – वनवस्त S, चनवस्त I, वंचनवस्त्र B, चैवनवस्तु O 48b. °गर्हितैव R 48c. साधु om. °निपीडितैव SVW 48d. om. ABIORSTV, सर्वार्थहानिं कुरुते तथैव C after this verse S adds शनावर्कदशाफलानि, T adds शनावर्कदशाः, A adds शनावर्कदशाः 49–54 om. V 49a. भानु° — 49b. करोति om. C 49b. धनपुत्रसम्भवं] रिपुजं भयं च C. 49c. °मिष्टनाशं S 50a. °विपाके ABCILOQRTW 50c. कुकर्म सेवां C 50d. °लाभं C

हृद्रोगदुःखं परवित्तहानिं
गमोषणं चौरकृतं सदैव ।
चन्द्रदशा भौमदशाविपाके
करोति वैरं निजबन्धुलोकैः ॥५१॥
बौधी दशा सौरदशां प्रयाता
वृद्धिं जनयेन्मनुष्यम् ।
पित्तानिलश्लेष्मकृतं विकार-
मालस्यमुद्वेगमहाभयं च ॥५२॥
दशा शनेर्दैवपुरोहितस्य
यदा दशायां परिपाकमेति ।
असद्व्ययं बान्धवबन्धनं च
तदा विधत्ते गुणविप्रकर्षम् ॥५३॥
शौक्री दशा सौरदशाविपाके
करोति पुंसां प्रभुतां कुवर्गे ।
नीचैर्विवादं बहुनीचलाभं
धर्मस्य नाशं परधर्मवृद्धिम् ॥५४॥
लाग्न्यां यदा सूर्यसुतो विपाकं
सौम्योद्भवायां कुरुते ऽतिगर्वम् ।
औद्धत्यमिष्टैः सह वंचनानि
नानापटुत्वं सततं नितान्तम् ॥५५॥

51a. पशविन्त° ORST, वरविन्त° LQW 51b. प्रमोषणं ARS
51d. °लोके LQW 52a. दशा om. C, यदा R सौरि° AST, सौरी° R
52b. °मबुद्धिं LQW 53b. परपाक° BCI °बुद्धिं C 53c अग्नव्ययं
Q, अग्निव्ययां W 53d. °प्रहर्षं L 54a. दशा] यदा ACIORS
सौरि° S, सौ° A, जीव° R °विपाके om. C 54b. कुवर्गं IL,
कुगर्वे BQW 54d. स्वधर्मनाशं L 55a. लग्ना दशा LQW
सूर्यसुतं विपाकं ACIORST, सर्वसुतं विपाकं B, सूर्यसुतस्य पाकं LQW
55c. औद्धास° TV, अद्धुत्य° C, उद्धत्य° LQ, उद्धुत्य° W सह om. C
55d. °पटुत्व ABCIORV, °पटत्व T, °महुत्व L, °पटुत्व W, °पटुस्य Q
नराणां LQW

पापोद्भवायां रविजस्य जाता
ं कुरुते सुहानिम् /
शिरोर्तिपित्तज्वरवेदनाश्च
बहुप्रकाराः परमं च शोकम् ॥५६॥
ग्नी दृष्टा सूर्यदशाविपाके
करोति सौम्यांनियमं कु
असज्जनैः सङ्गमथाप्तता च
विद्विषतां बन्धुजनेन नित्यम् ॥५७॥
चान्द्र्यां प्रयाता प्रकरोति सिद्धिं
दृशा विलग्नस्य तु सौम्यरूपा /
मिष्टान्नपानानि पृथग्विधानि
शत्रुक्षयं पार्थिवलोकपूजाम् ॥५८॥
सौम्या दृष्टा भूमिसुतस्य पाके
यदा विलग्नस्य करोति पाकम् /
तदातिरोगं रुधिरोद्भवं स्या-
द्विद्विषता सर्वजनेन नित्यम् ॥५९॥
प्रतापं प्रणयं च लोके
विवेकविद्यागमसर्वसिद्धिम् /
ग्नी दृशा सौम्यदशाविपाके
सौम्या विधत्ते गुरुकामसेवाम् ॥६०॥

56b. सु°] च TV. 56c. °नाश्च ABCILOQRSTVW 56d. °प्र° ABCLORTV, °प्रकारं IQSW after this verse AST add अथ शुभा ग्नदशायामन्तर्दशाः 57b. °निवतं ABCLOQRSTVW, °नि I 57c. संगमताप्तता C, संगमताप्तता T, संगमथाकमातं L च om. LQW 58a. चांद्री L 58b. °रूपं IQRTVW 58d. शत्रुक्षयं (sic) R, शुक्रक्षयं C °लोकराज्यं S 59a. सौम्यदृष्टा सौम्यदशाविपाके C 59b. यदा] दृष्टा CL, परा I 59c. °रोगं T °रोगं L 59d. °द्विषितां CLOQR 60a. प्रणतं T, प्रयं V

मन्त्रौषधीछादनभोजनानि
[illegible] दृष्टा जीवदृष्टां प्रयाता /
नरेन्द्रेण विवेकतां च ॥६१॥
भृगोर्दशायां प्रकरोति लग्नी
सौम्या दृष्टा मानसुखं विधत्ते /
प्रियातिथित्वं प्रचुरांश्च भोगान्
विवेकतां साधुः जन सख्यम् ॥६२॥
.. दृष्टा लग्नसमुद्भवा च
शनेर्दशायां कुरुते प्रमादम् /
आलस्यमुद्वेगगुरुप्रकोपं
विमाननां पार्थिवजं भयं च ॥६३॥
पापा दृष्टा लग्नसमुद्भवा च
रवेर्दशायां प्रकरोति हानिम् /
[illegible]
सदा प्रवासं प्रचुरां च पीडाम् ॥६४॥
सुहृत्प्रकोपं कुरुते न सौख्यं
/
लग्नी दृष्टा चन्द्रदृष्टा
पापा विधत्ते [illegible] च ॥६५॥

61c. सुभोजनानि LRW सौख्यं C 61d. सौख्यं BCILQW 62a. भृगु° ABIOSTV 62c. रोगान् W 63a. साधुसमुद्भवा ABCILOQSTVW तु R 63b. प्रसादं L, प्रमोदं W after this verse AST add अथ [illegible]लग्नदृशायामन्तर्दशा: 64a. तु R 64c. विपोषणं BCI, वियोगजं LW, विनोगजं Q 64d. प्रचुराज° B, प्रचुराज° LQW 65a. सकलं ILOQRSW 65d. आपानि [illegible] IORSV [illegible] बंधुतां A, बंधुनाOS,

शिरोर्तिदाहज्वरमिश्रनाशं
अर्थं प्रकोपं कलहं सदैव /
लग्नी दशा भौमदशाविपाके
करोति नाशं निजबान्धवानाम् //६६//
सौम्यां दशायां कुरुते प्रजा
लग्नी दशा पापरतिं कुपुत्राम् /
पापातिपापानि यथा विधत्ते
गुरुद्विजप्रेषणजैर्विकारैः //६७//
गुरोर्दशायामनुसंप्रविष्टा
दशा विलग्नस्य यदा च पापा /
तदा धनैरात्मगृहोद्भवैश्च
करोति भोगान् विविधान् मनुष्यः //६८//
दम्भेन धर्मं सभयेन चित्त्यं
नृणां विधत्ते कुधिया च चारम् /
लग्नी दशा शुक्रदशाविपाके
पापा सुदैन्यं न कुटुम्बवृद्धिम् //६९//
क्लेशान् विचित्रान् सुतदारवैरं
धनप्रणाशं प्रचुरां च वाणीम् /
लग्नी दशा मन्ददशाविपाके
पापा विधत्ते विविधांश्च रोगान् //७०//
इति श्रीवृद्धयवने ऽन्तर्दशाध्यायः //

66a. °दाघ्नं CILQRSTV, °दाहं B 67d. गुरोर्द्विजभावैर्विकारैः LQ, --- गुरुद्विजभावैः विकारैः W 69a. समयेन IOQRW, येन V नित्यं C 69b. कुधियाय° S चारं BV, वैरं LQW 70b. पक्षात F वाणी ABCILRT 70d. पापं ABCIORSTV col. इति श्री
व्याटीकायां संगृहीजीश्रीमोहनदासजीकारितायां
अंतर्दशाफलाध्याय Q col. श्रीवृद्धयवने om. V श्री° om. RT
अंतर्दशाफलाध्यायः L C adds समाप्तः after col.

...न्द्रेण सूर्यः स्वगृहात् क्रमेण
    पंचत्रयायाष्टकराङ्कसंस्थितः /
...न्द्रारयोश्चापि तथैव वाच्यः
    शुक्राद्रसास्तान्त्यगतश्च नित्यम् //१//
...वाद्रसैकादशपंचनन्दै-
    र्वृद्धिस्थितो राशिपतेः प्रदिष्टः /
...ष्टाङ्कसूर्येषु शरे च सौम्यात्
    स्वलग्नतो वृद्धियुगव्ययेषु //२// <सूर्यः>
...तात् केन्द्रबहीषु-नवाष्टसंस्थो
    गुरोर्व्ययायाष्टमतुष्ट...स्थः /
...तीक्ष्ण-पंचाङ्कदशायगस्थैः
    शुक्रात् कुजाल्लाभ-भ-ना ... //३//
. . . .
    . . . .
. . . . ष्टकेन्द्रैः
    स्वान्मन्दतो बहिरसेषुसूर्यगः //४// <चन्द्रः
...रोर्दशैकादशषडन्त्यगः
    रवेस्त्रिषष्ठायदशेषुसंस्थितः /
...नात् प्रवृद्धा प्रथमे च शीतगो-
    र्वृद्धा सितात् सूर्यरसाष्टलाभगः //५//

-15 om.V   1a.सूर्यस्य गृहात् BLQ, सूर्यस्य ग्रहात् W   1b. स्तयाया° CT   °स्तयाष्टकैकसंस्थ: S   2-17 om. QW, for which they have the verses in appendix I   2a. °चंद्रपंचै-T   2b. ...त्रिकर T   2c. वृद्धिंक° BL, चष्ठ्यंक° C, षष्ठ्यंक° T   शरेश CLT, ...रैः स्व° AORS, सरैस्व° BI   2d. स्वात्लग्न° ORT, स्वात्लग्न° L ...द्धियुगत्र-येषु: T, युगत्र-येषु: C, वृद्धियुगत्र-येद्यात् R, वृद्धि...याद्युT, वृद्धियुगव्यया AI, वृद्धियुगव्ययच्चात् S, वृद्धियुग ---- B, ...द्धियुगांत्ययगश L   3b. °ष्टयात्र ABILORS, °ष्टसंस्थ: C   3c. ...णान्वि° T, गुणान्वि° I   °पंचांग° BL   °दिशांग° ABCILORS ... शुक्रात् कुजात् om C   शुक्र BL   कुजो ABLOST, कुजो ... R   3d-4c: space in MSS.   4c. °केंद्र: BCI, °केंद्रे T, °कं... OR, °कं स्यात S, ... A   4d. स्यान् CT, cor. to स्वान् C, om. S   मंदतो] केंद्रतो AS ...°षडांत्य: A, °षड्रसांत्य: IS, षड्भांत्यग: C, षड्भांत्यग: R, ...T, °ष ---- य...C, °षड्भांत्य: B, °षड्भांत्य: L. The ... is defective   5b. °षष्ठा° BCL   5c ...नात् ... ... ABC... T   प्रथमेश्च ALBILORST   शीतगात् ABCILORST ... T ...

———————— //६// <भौमः>

चन्द्राद् द्विषष्ठायदशाष्टवेदगो
लग्नात् खषडार्थ† शुभदः प्रकीर्ति
आद्याद्विलाभार्थगताङ्कवह्निभिः
शुक्राच्छनेश्चन्द्रयुगाय विन्नैः //७//
वस्वङ्कादिक्कामसुसंस्थितश्च
भात् स्वाच्च तत्त्वाब्धिभवार्थ † मङ्गलात् /
रन्ध्रेष † कामासप एव सार्वज्ञी
गुरौश्च चन्द्रौङ्क †गस्य: शुभदः //८// <बुधः>
जीवः कुजाद्दस्त्रभवाष्टकेन्द्रगः
सूर्याच्च दस्त्रादिनवाष्ट†कीर्तितः /
← ———— सशान्त्यरामैः स्वगृहात् प्रकीर्तितो
नवाद्यकायार्थशराङ्कगः सितात् //९//
चन्द्रान् मदाङ्कषडनायगः सदा
शनैश्चराद् द्विरसेषुभास्करैः //१०//
बुधान् नवव्योमयुगेन्द्रमार्गण-
रुद्रतर्कैः शुभदैः प्रकीर्तितः /
लग्नान् नवाशाब्धिपरेषुलोचन-
सूर्या गरामैः क्रमशो विधेयः //११// <जीवः>

6: no space in MSS. 7a. द्विषड्व्यासभया° ABCILORST 7b. लग्नात्स ACIORST, लग्नास्त° BL °षड्यार्त्ते A, °षड्यर्न्ते BLORS, °षड्यर्ते I, षड्य CT शुभ: O 7c. °वह्निभी: ABILORST, °वह्नि: C 8a. वस्वकृ° BIR, वस्वर्के° CT, वस्वह° AS, नस्वद्म° L °दिक्साम° BILRT °दिक्याम° CO, °दिक्वाम° AS 8b. तास्मां च ABCILRST, om. C तत्त्वाब्धियि° AB S, तत्त्वब्धिविधि° R, तत्त्वविमि° I, तत्त्वाहियि° O, तत्त्वाब्धिनिधि° L, तत्त्वाब्धि° CT °भवार्थमंगला ABCILORST 8c. रंध्रौस° ABCILORST कासान्शश्च C, कांशच T, कासुप ABIORS सर्वज्ञा CT 8d. गुरो च CRT, गुरोर्वे ABIOS, गुरोश्च L गस्य I, गनस्य T, गदस्य BL, स्य C 8d शुभदः — 9c स्वगृहा° om. T 8d. शुभदः: BLR, भदः: A, शुभदो C 9a. जीवः: om. AIOS कुजाद्दस्त्र] भाद्दशा° B, भाद्दश L 9a दस्त्र° — 9b °नवाष्ट om. AIOS 9b. समंद BLR संनंद C °नवा अकी° BLR 9c om. AIOS, 9d om. C 9d. नवांशश: °स्था° ABILORS °सरांगराग: ABILORS 10a. सगांके° ABCILORST 10b. शनीश्वरा° C 11a. धना ABILORS °मार्गणा AB, °मार्गणै: S, °मार्ग: T, °कर्मण: L 11b. स्वरुद्रतर्कौ I, स्वरुद्रतर्कौ O, स्वकद्रुतर्का R, स्वतद्रुतर्कौ CT, --- द्रुतर्कौ S 11c. लग्नं ABILOT, लग्न S नवांशाब्धितरेषु° AB, नवांशाब्धितरेषु° CIOS, ... T नवांशाब्धितरेषु° L, नवांशाब्धिनरेषु° R सूर्यागकामे: ABILORS

शुक्रो विलग्नाच्च यिवित्तवाहि
यगेन्दुनन्दायगतश्च †इष्टः /
मन्दात् ससूर्यः सदिशः स्वसद्मन-
स्त्रिवेदपंचाष्टदिगङ्कलाभगः //१२//
शने रवेरष्टदिवाकरायै-
र्गुरोर्नवव्योमभवाष्टपंचगः /
बुधाद् गुणेष्वङ्कदशाङ्कसंस्थितो
भौमाद् भवेष्वग्निरसाङ्कसूर्यगः //१३// <शुक्रः>
स्वात् सूर्यजो बहिरसेषु संगतः
ससूर्यदिग्गो धरणीसुतस्य /
सूर्याद् धनायाष्टमनष्टये च
शुक्राद् सार्कायगतैः सुभदः //१४//
त्रिषड्लाभेषु निशाधिनाथा-
ल्लग्नात् सैवद्वीन्दुदशाधिपेषु /
जीवाच्छराङ्कव्ययलाभसंस्थो
बुधाद् व्ययाङ्काङ्कदिशाङ्कनागगः //१५// <शनिः>

12a. °विल° om. ABIORS, °वृत्ति° CT, °बा° L 12b. °नंदाभगतश्च C, °नंदाभग- श्च T, °नंदाभतश्च ABILORS इष्टा BL 12c. ससूर्यगः C °शदिशा° BL °स्वसद्मनः: ABO, °स्वसमनः: R, °स्व- ,नः: I, °स्वसमगः: CT, °स्वसर्वनः: S, °स्वसद्मन L 13a-b. °राय गरो° ABILOS, °रायगोर्गुरो° R, °रायुगा गुरो° T, °रासुगा° C 13b. °व्योमभवाश्च ABIORS, °व्योमभवास° L पंचमे: ABCILO RST 13c. बधांगतेष्व° ABILORS, बुधांगुरोर्व्य° C, बुधाद्दरौ° T 13d. भूमाद् CT, भौमो R, भूमो ABILOS भवेष्ट° R, भवेष्ट° L, लवेष्व° O, भवेष्ठ° C, भ्यंभवेष्य° T 14a. सूर्यजो AC बहिसराव - गतः: A, बहिस एव - गतः: BIO, बहिस एवद्गतः: R, बहिस ए द्गतः: C, बहिसराषट्गतः: T, बहिसवगतः: L, स एवः - गतः: S 14b. °दिक्को ABIORS, °यको CT 14d. शुक्राद्दशा° ABCILORST 15a. त्रिषड्ि° C, त्रिषड्य° BL निशाधिनाथो ABCILORST 15b. सचंद्रेन्दु° LOS, सर्वेन्द्रेंदु° BT, सर्वेदेंदु° AIR, सर्वेदु° C °दिशाधि° ABIST, °दशाधि° L, °दिशाधि° C, °दिशाधि° C °दिशाधिस्व° R 15c. जीवशरामयलाभसंस्थोABILOS 15c R 15d. व्ययांगदिशांग° ABILO, व्ययांगदिशांक° R, व्ययोतः दि व्ययां - गदिशांग° T °नागगः: ACIORST

बिन्दूनि रेखोत्थ विभिन्नयित्वा /
समावशेषेण मितो ग्रहस्य
स्वाष्टांशसंख्यं फलमाद्यभानि //१६//
हन्यात् फले.सोडकवर्गनाप्तं
फलं बलिष्ठो यदि तस्य पार्श्वग: /
अतो ऽन्यथा तस्य फलं निहन्यते
तेनैव साम्ये फलयोर्विसर्गजम् //१७//
रेखाश्रितस्तीक्ष्णकर: प्रगल्भं
करोति मर्त्यं गजवाजियुक्तम् /
मित्राङ्गनाढ्यं जनसंप्रयुक्तं
स्थाने ऽष्टके रोगविवर्जितं च //१८//
द्वितीयसंस्थ: प्रचुरप्रतापं
प्रभूतवित्तं जितशत्रुपक्षम् /
विद्यानुरक्तं नृपतेरभीष्टं
प्रशान्तचित्तं कुरुते सदैव //१९//
तृतीयग: सत्यपरं प्रशान्तं
अपेतपापं सुजनै: सुपूज्यम् /
हिरण्यपञ्चार्थविवे:
नरे प्रसूते सततं सुशीलम् //२०//

V begins again with 16   16a. °ग्रहमुभातां BLOR, °ग्रहशुभानां I   16c. °विशेषेण ABCILOR SV   सितो BL   ग्रहस्वं ABI LOST, ग्रहस्यं com. to ग्रहस्वं C, ग्रहस्त्वं R, ग्रहस्यं V   17b. पार्श्वत: R, पार्श्वे: ABIOS, पार्श्वे L   17d. सौम्ये ABCS   फलयोनि° B, कलयोनि° AIS   QW begin again with 18   18a. रेखाश्रित° LQTW   प्रगल्भजं ABIORS   18d स्वाके CTV, इकं LQW

चतुर्थगः सर्वजनस्य पूज्यं
करोति मर्त्यं सुहृदं सुशीलम् /
पूज्यं सभोगं प्रशस्तं
धर्मान्वितं दानपरं प्रसूते //२१//

करोति मर्त्यं खलु पंचमस्थो
नरं रविर्गोमहिषोष्ट्रयुक्तम् /
कुलप्रधान नृपतेरभीष्टं
सुसंयतं ब्राह्मणदेवभक्तम् //२२//

हतारिपक्षं प्रकरोति षष्ठे
स्थितो विवस्वान् प्रथितं नृलोके /
स्त्रीणामभीष्टं गुरुदेवभक्तं
//२३//

स्त्रीलाभयुक्तं खलु सप्तमस्थो
नरं विधत्ते खलु तीक्ष्णरश्मिः /
उदारचित्तं प्रभुतासमेतं
विज्ञानशीलं समरप्रचण्डम् //२४//

स्थाने ऽष्टमे पुत्रधनैः समेतं
सुरक्तपित्ताधिकमप्रमेयम् /
विख्यातकीर्तिं सततं सदान्तं
हतारिपक्षं प्रकरोति भानुः //२५//

21c. प्रशंसं Q, प्रशस्यं W   22b. नरं] रिन्नं R   रतिर्गो° IORTV, वृत्तं गो° LQW, रतिवृत्तं S   22d. सुसंज्ञं O, सत्यं पर° V   23b. स्थितो om. S, स्थिरो R   विस्वात् ASV, विस्वात B, विस्वाद् R, तिविस्वान् C   पक्षं B, विधं AST, विपं V, विविधं CIOR   23c. °देवरतं R   24b. शीतरश्मिः C   25b. सुरक्तमैन° B, सुरक्तनेत्रं LQW, सुरक्तगात्रं CTV, सुरक्तपो° R   °धकप्रमेयं B, प्रथितस्वभावं LW, प्रथितस्वभावं Q, CTV, नृपमप्रमेयं R   25c. सततं] भवतं CQW, भविनं L

विलग्नसंस्थो ऽर्कः प्रकरोति पापं
स्थाने ऽष्टके दुर्जनसङ्गरोगम् /
कृशं कृतघ्नं परदाररक्तं
विवेकहीनं प्रियसाहसं च //२६//
मूर्खं निकृष्टं च तथा द्वितीये
कुमित्ररक्तं धनधान्यहीनम् /
शिरोऽक्षिदाहज्वरपित्तभस्मैः
प्रपीडितं वक्त्रभवैश्च रोगैः //२७//
तथैव हीनं पुरुषं तृतीये
सनाथबान्धवैः परिवर्जितं च /
सदाभिभूतं बहुशत्रुपक्षं
क्रियाविहीनं विकलं प्रसूते //२८//
नित्यं कृतघ्नं परदेशरक्तं
करोति मर्त्यं नियतं चतुर्थे /
दृष्टैर्वियुक्तं परदाररक्तं
पैराजितं सर्वजनैः सदैव //२९//
करोति भानुः खलु पञ्चमस्थितो
हृद्वैरदारिद्र्यभयेन पीडितम् /
दौर्भाग्ययुक्तं परदारभाषणं
नरं भयाक्रोधमतं सुनिष्ठुरम् //३०//

26b. कुस्थानगं LQW, स्थानाष्टके E स्वाके CTV, छके [illegible]
27c. °दाहज्वर° ABCILOQRLTV 28c – 29a निं° om. [illegible]
28d. विकलं LQ, च फलं C, न फलं ABI RTV 29a [illegible]
दृतघ्नं TV पुरदेशरक्तं K, सुरदेशरक्तं E, पर[illegible] LQ
परक्तं A 29c. °विमुक्तं TV 30a. पंचमस्थो LQ 30[illegible]
परदोष° CR °गामिणं LQW 30d. भयात् LQ
तथा CITV क्रोधमनो° LQRI W adds verse
from appendix I after 30

षष्ठे स्थितः शत्रुगणैः पराजितं
नरं प्रसूते ऽधमकर्मसेवकम् ।
मायासमेतं मलिनं मलीमसं
च्युतं स्वधर्माद्गतसत्त्वमातुरम् ॥३१॥
क्रिया विहीनं विकृतं गतत्रपं
पराश्रयं स्वार्थसमीहकं सदा ।
करोति भानुः खलु सप्तमस्थितः
प्रपंचशीलं कुबलं सुनिष्ठुरम् ॥३२॥
स्थाने ऽष्टमे तीक्ष्णमयूखमाली
नरं विधत्ते बहुपापचेष्टम् ।
दृष्टैर्वियुक्तं परदाररक्तं
पापात्मकं दुःखयुतं करोति ॥३३॥
इति रवेरष्टकवर्गफलम् ॥
रेखास्थितो ऽष्टे हिमरश्मिमाली
स्थाने विधत्ते सुभगं मनुष्यम् ।
प्रियं नृपाणां गुरुविप्रभक्तं
तीर्थाश्रयं सर्वजनोपसेव्यम् ॥३४॥
हस्त्यश्वयानैः सहितं द्वितीये
वैडूर्यमुक्तामणिभिस्तथैव ।
नरं सुसौख्यैः सहितं प्रगल्भं
प्रशान्तचित्तं प्रणयान्वितं च ॥३५॥

31b. °संघकं CTV   31d. च्युतः ABCIORT   32a. विगतं V, विमतं W   32c. खलु om. W   32d. कबलं ABCIORT, विफलं LQW   33b. °पापचे॰षं V   col. इति श्रीबृहद्यवनभाषाटीकायां संगृहीतश्रीमोहनदासजीकारितायां रवेरष्टकवर्गफलाध्यायः Q, इति श्रीवृद्धयवने रवेरष्टकवर्गा (वर्गफला W) ध्यायः LW, om. V   col. इति om. ACIORS   34a. ष्टे B, ऽष्टौ LQW, ष्टेत् S   34c. मुत्विप्रभक्तं W, मुसविप्रभक्तं Q, गुरुक्तं AS   35d. प्रयोणान्वितं Q, प्रश्रयान्वितं W

चन्द्रस्तृतीये कुरुते सनाथं
नरं विनीतं बहुधर्मभाजम् /
प्रियया युतं सर्वगुणोपपन्नं
धने सदा बन्धुजनस्य पूज्यम् //३६//
स्थाने चतुर्थे प्रकरोति मान्यं
नरं प्रसिद्धं विविधार्थयुक्तम् /
तडागकूपाश्रयरक्षितं
बहुमनुष्यं सुतसौख्ययुक्तम् //३७//
विद्याविनीतं सुविवेकयुक्तं
नरं प्रसूते बहुभोगभाजम् /
नृपाभिमानः खलु पंचमस्थः
प्रियातिथिं सर्वसहं सुमित्रम् //३८//
षष्ठे सुरूपं सुभगं मनोज्ञं
करोति चन्द्रः सुतदारयुक्तम् /
धनाश्रयं शास्त्ररतं विनीतं
नरेन्द्रपूज्यं बहुमानभाजम् //३९//
करोति चन्द्रः खलु सप्तमस्थः
प्रभासमेतं सचिवं सुशीलम् /
व्रतोपवासादिरतं निधाने
मनोज्ञनारीदयितं सदैव //४०//

36d. धने L, धनैः W   पूज्यं] सौख्यं T   37a. यतु पंच करोति मानं ABCIOSTV, नूनं LQW   37b. प्रसुतं R, सिद्धं in marg. R[v], प्रभूतिं W   द्विविधायुक्तं B, बहुधर्मयुक्तं LQW   37c. °कूपाश्रम° T, °कूपाद्यनु° LQW   38a. विद्याविहीनं R   38b. बहुरोगभानं T   38d. सुचितं TV   39a. सुरूपं om. I, स्वरूपं LQW, नुरूपं T, मरूपं V   मनुज्ञं B, मनुष्यं LQW, मनो AS   40d. °हारीदयितं ABCIORSTV, °मारोग्ययुतं LQW

याने ऽष्टमे सौख्यहिरण्ययुक्तं
    विद्यान्वितं सत्यपरं प्रगल्भम् /
रोति चन्द्रो ऽपतितं मनुष्यं
    प्रियातिथिं ब्राह्मणवल्लभं च //४१//
याने ऽष्टके विन्दगतः शशाङ्कः
    सरोगदेहं कुरुते मनुष्यम् /
पानरतं स्वजनैर्विमुक्तं
    दीनं कृशं सत्यविहीनमेव //४२//
रोति चन्द्रो नियतं द्वितीये
    नरं कृतघ्नं सुकृतं सुदीनम् /
च्युतशक्तं प्रभया विहीनं
    विवर्जितं बन्धुजनेन नित्यम् //४३//
पीडितं भूपतिना सदैव
    महाव्ययैः संयुतमुग्ररोगम् /
कफानिलाभ्यां परिपीडितं च
    चन्द्रस्तृतीये कुरुते मनुष्यम् //४४//
कुसङ्गतं सत्यविहीनमेव
    सौख्येन हीनं बहुरोगयुक्तम् /
गुरुद्रुहं पानरतं सदैव
    चन्द्रश्चतुर्थे कुरुते मनुष्यम् //४५//

41a. वै प्रकरोति चन्द्रो LQW   41b. विद्या – तं T, विपाश्रितं V
मनुष्यं LQW   om. 41c LQW   41c. ऽपतितं
. S, यदि तं R, दर्पितं C   41d. ब्राह्मणदेवभक्तं LQW
er 41d. LQW have हिरण्ययुक्तं मुदितं सदैव   after 41 CT
ave अथ विन्दफलं   42a. ऽष्टके] सदा LQW   43b. सदारं C
3c. प्रभुताविहीनं C   44a. भूपतिना — 44c परिपीडितं in marg
44c. परिपंडितं B   45 om. W   45a. कुसंगतं] सवेदनं C,
भिः सदा दानप्रयोगयुक्तं विवर्द्धनं R   45c. सद्गुल्भं T
परतं LQ

प्रभ्रष्टशीलं प्रचुरारिपक्षं
निशाधिनाथः खलु पंचमे च /
करोति दीनं व्यसनैः समेतं
विवर्जितं भूपतिमानदानैः ॥४६॥
विदेशसेवाविरतं कृतघ्नं
षष्ठे ऽरिवर्गैर्विजितं कृतान्तम् /
नित्यं मनुष्यं नृपपीडितं च
कलत्रयानादिभिर्विप्रमुक्तम् ॥४७॥
स्यात् सप्तमे वैरमनल्पमुग्रं
चन्द्रे रुजं भूपमलिम्लुचोत्थम् /
रोगं नराणां जठरे प्रभूतं
धनस्य नाशं प्रियविप्रयोगम् ॥४८॥
चन्द्रो ऽष्टमे ऽनिष्टफलं विधत्ते
शोकं धनार्तिं विविधं च दुःखम् /
शीलच्युतं वासनवित्तनाशं
मैत्राभयं दैन्यमनर्थमुग्रम् ॥४९॥
इति चन्द्राष्टकवर्गफलम् ॥
रेखास्थितो ऽब्धे क्षितिवित्तलाभं
करोति भौमः महावृद्धिमेव /
सौख्यं च भोगं विविधांश्च पूजां
महाजनोत्थं सततं सुखानि ॥५०॥

46a. प्रचुराद्विपक्षं LQW 46b. न ABCIORSTV ,47a placed after 47b in LQW 47a. °निरतं RW 47b. रिवर्गै RSW, रिवर्गो° C, रविर्गै° B वि॰ पीडितांगं LQW वृतांजं A, हतांतं T, नितांतं C 47c नित्यं C, भवेन् ABIORSTV, सदा LQW नयपीडितं LQW 47d. °प्रमुक्तं BLQ 48a. वैंद्र° B, वैद्र° R, चंद्र° LQW °मनल्परोगं C 48b. चंद्रेण भूपाल ॰, नित्य° LQW °मलिम्ल LQW 48c. प्रसूतं TV 49c. वासव° IOQRTV, वासवै W 49d. दीन° LQW col. इति श्रीवृद्धयवनभाषाटीकायां सगर्हीचिश्रीमोहनदासजीकारितायां ष्टकवर्गफलाध्याय Q, इति श्रीवृद्धयवने चं ककवर्गा (वर्ग TW) ध्यायः LW col. om. col. चंद्रस्याष्टकवर्गः R 50a. E begins with ये य: C, य: BI, य LQW °नाशं W 50b. पथवृद्धि° TV 50c. भोगां ER, भोगो V 50d. °जनोत्थं B, °जनार्थं LQW सततं] विविध° L

आरोग्यतां
    मनोविकाशं प्रियतां च लोके /
समुन्नतिं शत्रुविनाशमेव
    करोति भौमो नियतं द्वितीये //५१//
सरोरुहयानानि पृथग्विधानि
    नृणां विधत्ते क्षितिजस्तृतीये /
विभूतिमभ्युन्नतिमिष्टलाभं
    भूपप्रसादं विविधं च नित्यम् //५२//
भौमश्चतुर्थे कुरुते तापं
    सौभाग्यसौख्याभ्युदयं नितान्तम् /
प्रियातिथित्वं सुरविप्रभक्तिं
    नरेन्द्रमानं विविधं च लाभम् //५३//
सुतीर्थलाभं खलु पंचमस्थः
    क्षोणीसुतो यच्छति मानवानाम् /
हिरण्यलाभं बहुमानसौख्यं
    व्याधेर्विनाशं खलु उन्नतिं च //५४//
षष्ठे ऽरिनाशं कुरुते महीजः
    समागमं बन्धुजनेन नित्यम् /
वस्त्राणि शय्यासनभोजनानि
    धर्मार्थसिद्धिं सततं नराणाम् //५५//

51b °विकाशं — 52a सरोरुहयाना° om. E   51b विना विकारं QW, विनोद्धकारं L   52c °मभ्युन्नति° LQW   52d विधं A, विभुत्वं R   53c सुरविप्रयुक्तं R   53d नरेन्द्रमानं om. W   54a सुतीर्थं LQW   54a °लाभं — 54d व्या° om. I   54c हिरण्यमानं C R   54d व्याधिना° C, बुद्धेः W   नकाशं W   सल्लेसु° BQR, बहुसु° W, फलसु° L   55d धर्मार्थकामाः LQW

क्षोणीसुतो यच्छति सप्तमस्थो
विज्ञानविद्यागममिष्टलाभम् /
शय्यासनाच्छादनभोजनानि
रत्नोपलब्धिं जगतीतलाभम् //५६//
भौमोऽष्टमे भूतिमथोन्नतिं च
नृणां विधत्ते महिमामनन्ताम् /
वाणिज्यलाभं कृषिकर्मसिद्धिं
प्रियाप्तिमत्यन्तमिहैव पुंसाम् //५७//
बिन्दुस्थितो भूतनयो यदाद्ये
स्थाने दशां यच्छति मानवानाम् /
तदार्थहानिं गदपृष्ठरोगान्
मतेर्विनाशं कुजनेन सौख्यम् //५८//
शिरोर्तिदाहं ज्वरतापमुग्रं
प्रमोषणं चौरकृतं सदैव /
प्रियावियोगं मतिमित्रनाशं
भौमो द्वितीये कुरुते नराणाम् //५९//
भौमस्तृतीये विभवार्थलौल्यं
धत्ते नराणां च तथाश्ववाहनम् /
कुबुद्धिभिः सङ्गममुग्रवैरं
पराजयं प्राणभृतां सदैव //६०//

56d. जगती Q, भद्रली L सलाभं ABCEIORTV 57a. भूत° R भूमि° LQW °चतां QW 57b. महिमान° QW °नंती IOS; °नोतिं RTV 57d. प्रयासि° ABS, प्रयासि° CEIOTV after 57 CET add अथ भौमबिन्दुफलं 58a. विद्यास्थितो corr. to बिंदुस्थितो B, रेखास्थितो R °भो ET 58c. तदर्थ° LQW °सिद्धिं C गत° ABC ILOQRSV, मत° ET, ग° W °दाह° BI, °दार° CELQTV: भोगान् W 59a. °दाघं ABCEILOQRSTV रसुग्रताप R 59b. प्रपोषणं ABCEIOQSTV, पन्नासनं LW 59c. प्रियाविनोदं V मतिमित्रलाभं L 60a. °भाग्यं BCEILQTVW 60c. संगमवैरमुग्रं C, संगमनुग्रवैरं V.

विवादवैराणि पृथग्विधानि
भौमश्चतुर्थे कुरुते नराणाम् ।
द्यूतं च वेश्याव्यसनं महान्तं
पराजयं मानवसमेव हानिम् ॥६१॥
असौख्यमोजःक्षयवित्तनाशं
पुत्रार्थहानिं सुतरां वियोगम् ।
करोति भौमः खलु पंचमस्थः
प्रतापहानिं सततं नराणाम् ॥६२॥
चतुष्पदव्यालसरीसृपोत्थं
भयं विधत्ते क्षितिजो नराणाम् ।
सदाविभागं खलु षष्ठसंस्थो
चोरेन्द्रपीडां खलसङ्गमं च ॥६३॥
व्ययं विरागं भयमिष्टवैरं
भौमो विधत्ते खलु सप्तमस्थः ।
जिह्वाक्षिरोगोद्भवमेव दुःखं
सदा नराणां विनयप्रलौल्यम् ॥६४॥
पराभवं मृत्युसमांश्च रोगान्
कलत्रहानिं परबंधनानि ।
भौमोऽष्टमस्थः कुरुते नराणां
शस्त्राभिघातं परतः स्वतो वा ॥६५॥
इति भौमाष्टकवर्गफलम् ॥

61a. °चौराणि R, °चाराणि BLQW 61c. द्यूताश्च सेवा° R, द्यूताच्चवेश्या° B, द्यूतावहन्ता° LQ, द्यूतावहस्य° W 61d. पराजयं corr. h. पराजयं B 62 om. L, W 63a. चतुष्पदैर्व्याल° CETV 63b. अयं V 63d. खलु ABCEIOQRSTVW संगमव्ययं LQW 64b. पंचमस्थः R 64d. नराणां V 65d. ततो ABEIORSTV col. इति श्रीवृद्धयवनभाषाटीकायां संगृहीतश्रीमोहनदासजी-कारितायां भौमाष्टकवर्गफलाध्याय Q, इति श्रीवृद्धयवने भौमाष्टकवर्गफलाध्यायः LW col. om. V

रेखास्थितः सोमसुतो भटाख्ये
स्थाने नटा शीलधनं विधत्ते ।
विद्याविवेकादिभिः संप्रयुक्तं
प्रभूतमित्रं विगतारिपक्षम् ॥६६॥
स्थानस्थितं देवगुरुप्रसक्तं
विज्ञानशीलं बहुस्नानपानम् ।
स्थाने द्वितीये शशिजो विधत्ते
नरं सुरूपं सुभगं सुकान्तम् ॥६७॥
तृतीयगः सोमसुतः करोति
प्रसन्नवाक्यं नृपलोकपूज्यम् ।
नरं विधिज्ञं सुभगं मनोज्ञं
हृतारिपक्षं बहुधर्मभाजम् ॥६८॥
बुधश्चतुर्थे कुरुते सरूपं
प्रियातिथिं बन्धुजनस्य मान्यम् ।
मेधाविनं शास्त्ररतिं विधिज्ञं
व्रतोपवासादिरतं सदैव ॥६९॥
करोति सौम्यः खलु पंचमस्थो
नरं नितान्तं नृपतेरभीष्टम् ।
आरामविप्रादिविहारभाजं
चित्तान्वितं भक्तिपरं द्विजानाम् ॥७०॥

66a. भटाटौ ABCEIORSTV, भटासौ LQW 66b. प्रतीते ABCEIORST 66c. °भिः om. LQ, °क W 66d om. C 66d. प्रभूतवित्तं V, प्रसूतमित्रं R 67a. स्थानान्वितं C, स्थाने स्थितं QW °प्रणीतं C बहुस्नानपानं LOQ, बहुमानपानं C, बहुदानं AS, बहुपानदानं I 67c-d om. C 67d. सुकोलं LQW 68b. °वास्यं ABCE 68c. विधज्ञं O, विधिज्ञं E, विधासंगं B, विधज्ञे LQW 69b. मानं C 69c. शास्त्ररतं LQW मनोज्ञं ET 70b. °रभिष्टं R 70c. °चित्ता°

षष्ठे ऽरिनाशं प्रकरोति सौम्यो
 नृणां प्रख्यातकृतं च लाभम् ।
द्वेष्याभिपत्यं प्रचुरान्नपानं
 यशःप्रतापं विनयं सदैव ॥७१॥
कलत्रलाभं रतिभोगसौख्यं
 कलत्रसंस्थः प्रकरोति सौम्यः ।
तीर्थाश्रयं सौख्यसमृद्धियुक्तं
 प्रसन्नमूर्तिं सततं सुशीलम् ॥७२॥
चतुष्पदाच्छादनवित्तयुक्तं
 नरं प्रसूते शशिजो ऽष्टमस्थः ।
कलत्रपुत्रोद्भवसौख्ययुक्तं
 सर्वत्र पूज्यं महिमासमेतम् ॥७३॥
विन्दुस्थितः सोमसुतो ऽतिपापं
 करोति मर्त्यं प्रथमे खलं च ।
मायान्वितं बान्धवविप्रयुक्तं
 सदा कुशीलं विनयेन हीनम् ॥७४॥
प्रभूतदुःखं स्वजनैर्विहीनं
 पराभिभूतं कठिनं कृतघ्नम् ।
द्वितीयसंस्थो हिमरश्मिपुत्रो
 नरं प्रसूते बहुपापयुक्तम् ॥७५॥

71a. षष्ठे] षिष्ठा° S रिनाथं ABIOR 71b. च om. V 71d. नयप्रतापं LQW 72a. रतभोग° ORSTV 72b. द्वितीयसंस्थः R 72c. द्वितीयगः R 73b. प्रसूतिं AEORSTV 73d. पूज्यं] सौख्यं V after 73 CET add अथ विंदुफलं 74c. पापान्वितं S °प्रमुक्तं C 75a om. LQW 75a. स्वजनैं° C 75b. पापाभिभूतं C after 75d W adds वातारिरोगं महतीभ्रनाश, L -नृ- - - - - - - - - - -

तृतीयगः पुत्रकलत्रनाशं
करोति सौम्यः सततं कुचैलम् ।
तेजोविहीनं मलदिग्धदेहं
संपीडितं भूपतिना सदैव ॥७६॥
चतुर्थगः शीतकरस्य पुत्रः
प्रभूतदुःखं कुरुते मनुष्यम् ।
शीलेन हीनं विनयेन हीनं
सत्त्वात्मिकं चैव विवर्जितं च ॥७७॥
महात्मजं नष्टधनं कुचैलं
रोगाभिभूतं परतर्ककं च ।
वैरार्जितं देवगुरुघ्नमूकं
करोति सौम्यः खलु पंचमस्थः ॥७८॥
षष्ठस्थितः शीतकरस्य पुत्रो
नरं प्रसूते धनवर्जितं च ।
पराजितं शत्रुजनेन नित्यं
विद्याविहीनं विनयेन मुक्तम् ॥७९॥
सौम्यो नरं सप्तमगो विधत्ते
भोगेन हीनं परदाररक्तम् ।
जनापवादेन युतं सुदीनं
कुबुद्धिभाजं सभयं सदैव ॥८०॥

76c मलादिग्ध° RW, मलदग्ध° ET 77b प्रभूतसौख्यं W सुः मनुष्यं] कुपुत्रं C 77d सत्त्वात्मकैः LQW, सत्त्वात्मिकं ET सौख्यविवर्जितं CETV 78b परतर्कुकं W 78c–79b om. ET 78c °घ्नमुकं BI, °घ्नकं L 78d कष्टसंस्थः R 79 om. R 79a भवस्थितः ABS 80b रोगेण BLQW °दारयातं L, °दाररतं Q, °रक्ते A

द्यूतप्रसक्तं गणिकासु रक्तं
रजोऽधिकं सत्त्वधनेन हीनम् ।
सौम्यो ऽष्टमस्थः सभयं विहीनं
करोति मर्त्यं सततं नृशंसम् ॥८१॥
इति बुधाष्टकवर्गफलम् ॥
रेखागतो देवगुरुः प्रसूते
नरं विदग्धं विनयोपयुक्तम् ।
आद्ये महाबुद्धिधनान्वितं च
धर्मध्वजं ब्राह्मणवत्सलं च ॥८२॥
द्वितीयगः सौम्यमतं प्रसूते
नरं सुरेज्यः सुभगं मनोज्ञम् ।
हस्त्यश्वयानादिधियो समेतं
नरेन्द्रपूज्यं प्रथितं नृलोके ॥८३॥
तृतीयसंस्थः कुरुते प्रधानं
सुरेज्यमन्त्री बहुपुत्रपौत्रम् ।
दयान्वितं जन्तुहितेषु युक्तं
कुलप्रधानं सततं सुशीलम् ॥८४॥
हिरण्यवस्त्रार्थसवाद्ययुक्तं
करोति मर्त्यं त्रिदशेन्द्रमन्त्री ।
चतुर्थसंस्थश्चतुरं धनाढ्यं
विवेकिनं बान्धवसंमतं च ॥८५॥

81a. गणिकानुरक्तं LQW, गणिकाप्सुरक्तं V 81c. सभया BLQRW
81d. नृसंतं B, नृपंसं R col. इति श्रीकृष्णवैनभाषाटीकायां सगर्हीश्रीमोहनदासजीकारितायां बुधाष्टकवर्गाध्याय Q, इति श्रीवृद्धयवने बधाष्टकवर्गाध्यायः LW col. om. V col. गुधस्याष्टकवर्गफलं R 82b. विनयेन युक्तं S 82c. आद्ये° ST, आद्ये B, आद्यं QW, आर्द्यं L 83a. सौम्यसुतः ACOV, सौम्यसुतं W, °स्यसुतः EIST, सौम्बसुतं R, सौबसुतः B 83c. °दिश्रिया W 84b. °पौत्रं E, सौम्यं C, °युक्तं W 84c. विद्यान्वितो C जंतुहितंतु° R, जंतुहिते नि° W 85b. त्रिदशेशमंत्री LQW

करोति जीवः खलु पंचमस्थो
नरं नितान्तं नृपतेरभीष्टम् ।
पुत्रान्वितं प्रीतिकरं नराणां
सदा सुशीलं बहुधर्मयुक्तम् ॥ ८६ ॥
हतारिपक्षं नियतं प्रसूते
नरं सुरेज्यः खलु षष्ठसंस्थः ।
हृष्टं सुपुष्टं प्रणतं गुरूणां
प्रशान्तवैरं प्रथितं प्रियं च ॥ ८७ ॥
अभीष्टनारीरतसंप्रहृष्टं
करोति मर्त्यं सततं सुरेज्यः ।
क्रियान्वितं देवगुरुप्रसक्तं
सुभाषितज्ञं सुजनैः समेतम् ॥ ८८ ॥
जीवोऽष्टमस्थः कुरुते विदग्धं
प्रियातिथिं सर्वकलासु दक्षम् ।
नरं नृपेज्यं बहुशास्त्रलुब्धं
पराक्रमप्राणसमन्वितं च ॥ ८९ ॥
बिन्दुस्थितो देवगुरुः प्रसूते
नरं नृशंसं बहुदुःखयुक्तम् ।
लुब्धं कृतघ्नं मलिनस्वभावं
विहीनसत्त्वं बहुसाहसं च ॥ ९० ॥

86c. पुत्रादिक W 86d–87c om. E, in marg. T 87a. नयपक्षं Q
87d. सदा प्रशांतं W च om. Q 88a. ॰रति॰ C 88c. देवगुरुः ABCE
॰प्रभक्तं RW 89c. नृपेत्यं I, नृपाख्यं LQW ॰लब्धं E, ॰बुद्धं V
90c. लब्धं E

द्वितीयगो भूमिपतस्करोत्थं
भयं सुरेज्यः कुरुते नराणाम् /
नृशंसतां रोगमनिष्टसंस्थं
प्रभूतदुःखं दयिताबधं च //९१//
तृतीयसंस्थे त्रिदशेशपूज्ये
विहीनवित्तः सरुजो मनुष्यः /
भवेत् कुमित्रः परदाररक्तो
दौर्भाग्ययुक्तो ह्यलसः कृतघ्नः //९२//
चतुर्थगो देवगुरुः प्रसूते
विहीनवित्तं बहुशत्रुगम्यम् /
विचर्चिकाद्यैः परिपीडितं च
नरं सुमायं कुटिलं खलं च //९३//
पामाज्वरार्तं परदाररक्तं
नरं प्रसूते सुरराजपूज्यः /
प्रभूतशोकं सततं सुपापं
चौरं महाकष्टसमन्वितं च //९४//
षष्ठे सुरेज्यः कुरुतेऽक्षिरोगैः
संपीडितं म्लेच्छसमानरूपम् /
प्रपंचशीलं सुतदारहीनं
धर्मक्रियाहीनमनन्तशोकम् //९५//

91a. भूनृप° C 91c. रोगभयमनिष्टं C °संस्थः ABELORSTW
91d. दयितोबधं C, दयितोद्भवं BIOR, दयिवोद्भवं AETV, दयिवोद्भव्य S, दयितोकितं LW, दयितोद्भूतं Q 92a. °स्थास्त्रि° L °दशेज्यपूज्ये R, °दशेशमंत्री L 92c. कुपुत्रः V, मनुष्यः C
92d. त्व° SV 93a. चतुष्कगो R 93b. °वित्तो ABCEISTV
93d. समायं LQW, सुमायां ET, सुमत्ये V खलं] धनं ABIORS
94d. महा°] सदा V, सहा° ET च om. B 95a. चरोगैः BCI
after 95c come 96d; 96a-c; and 95d in W 95d. °मवीतशोकं S

करोति जीवः खलु सप्तमस्थो
नरं कफादिप्रचुरं सदैव ।
हिक्काज्वरार्तिं पृथुमानहीनं
दीनं जनैर्निन्दितमल्पसौख्यम् ॥९६॥
स्थाने ऽष्टमे देवगुरुः प्रसूते
सदातिगर्वं कुटिलं मनुष्यम् ।
द्वेष्यं नृपाणां स्वकुलस्य मध्ये
गतप्रतापं विकृतं सदैव ॥९७॥
इति जीवाष्टकवर्गफलम् ॥
रेखाश्रितो दैत्यगुरुः प्रसूते
नरं मनोज्ञं सुभगं सुशीलम् ।
जितेन्द्रियं दानपरं मनोज्ञं
धर्मानुरक्तं प्रचुरान्नपानम् ॥९८॥
द्वितीयगः काव्यसुतः प्रसूते
नरं विचित्रं धनिकं च
स्वधर्मशीलं विनयेन युक्तं
प्रभासमेतं जनवल्लभं च ॥९९॥
तृतीयसंस्थो भृगुभूषणाढ्यं
नरं प्रसूते सततं प्रगल्भम् ।
मेधाविनं धर्मपरं विनीतं
देवद्विजानामनुवल्लभं च ॥१००।

96b. कषा° C 96c. हिष्का° BLR °रार्तं LQ, °रान्तं R 96d. °मल्परोगं C, °मन्यसौख्यं ET 97a. जीवगुरुः ABEIORSTV, जीवश्च C 97b. सदातिवर्गं C col. इति श्रीवृद्धयवनभाषाटीकायां स[illegible]श्रीमोहनदासजीकारितायां जीवाष्टकवर्गफलाध्याय Q, इति श्रीवृद्धयवने जीवा(गुरोर W)ष्टकवर्गा(वर्गफला W)ध्यायः LW col. om. V col. इति om. R °फलं om. AEIOST 98c. मनोज्ञं] सुरूपं LQW 98d–99b om. BLQRW 99a. काव्यसुतः C, काव्यसुनः I 99b. नरं विचित्रं om. AIS, करोति शुक्रो O धान्यं CI, corr. to धान्यं I 99c. स्वकर्मशीलं ET 99d. यनवल्लभं B, नयवल्लभं LQW 100a. द्वितीय° LQW 100b. प्रगल्भं] प्रभाकं V 100c–100d °वल्लभं om. O 100d. °मतिवल्लभं C

शुक्रश्चतुर्थे कुरुते धनाढ्यं
सद्भोजनाच्छादनपानयुक्तम् ।
वैडूर्यमुक्ताफलरत्नलाभैः
संतुष्टचित्तं सततं मनुष्यम् ॥१०१॥
सुतीर्थयानादिकपुत्रलाभै-
र्युक्तं नरं दैत्यगुरुर्विधत्ते ।
मनुष्यदाढ्यं, खलु पंचमस्थः
प्रियं नृलोके परमं प्रधानम् ॥१०२॥
शुक्रस्तु षष्ठे कुरुते मनुष्यं
विद्यासु निष्ठं बहुमन्त्रभाजम् ।
स्त्रीवित्तलाभैः सहितं सुरूपं
विचक्षणं सर्वकलासु दक्षम् ॥१०३॥
शुक्रो विधत्ते खलु सप्तमस्थो
नरं नितान्तं सुरतप्रगल्भम् ।
सकुङ्कुमाच्छादनभोगभाजं
नरेन्द्रपूजासहितं सदैव ॥१०४॥
स्थाने ऽष्टमे दैत्यगुरुः प्रसूते
नरं नितान्तं सनयेन युक्तम् ।
धनासमेतं बहुकीर्तिभाजं
सुकर्मिणं धर्मसमन्वितं च ॥१०५॥

101a. शुक्रस्तृतीये LQW धनाढ्यं S, धनाढ्यं LQ 101b. °मुक्तं ET
101c. °फलनिर्मललाभैः R 101d. °चित्तं om. B सततं] सुचिरं R
मनुष्यं] सदैव ET 102a. सतीर्थ° CLQRW °लाभः IO, °लाभैं
102d. त्रिलोके BQW 103a. षष्ठे] शुक्रः R 103b विद्याधनिष्ठं W
बहुमंत्रभागं LQW, बहुमंत्रभाजनं C 103c. स्त्रीवृत्त° O 103d.
विचक्षणं B दत्तं I, पक्षं R 104b–105a om. BLQW 104c.
साकुंकु° AEITV °भोगभांजं V, °भोजभाजं ACEI, °भोजनाः
O 105d. कुकर्मिणं R

बिन्दुस्थितो दैत्यगुरुः प्रसूते
    नरं सुपापं बहुरोगयुक्तम् ।
नृपाभिभूतं सुतवित्तहीनं
    विवर्जितं बान्धवसज्जनैश्च ॥१०६॥
शुक्रो द्वितीये सहजं विधत्ते
    प्रतापहीनं बहुपापयुक्तम् ।
सदा विरक्तं स्वकुटुम्बवर्गे
    शोकाभिभूतं रतिलालसं च ॥१०७॥
तृतीयसंस्थः कुरुते नृशंसं
    शुक्रः सदा रोगविचर्चिकैश्च ।
नराभिभूतं सततं कुचैलं
    ज्वरार्दितं मानधनेन हीनम् ॥१०८॥
चतुर्थगः शोकयुतं प्रसूते
    नरं महाव्याधियुतं दरिद्रम् ।
चतुष्पदाच्छादनवर्जितं च
    प्रेष्यं खलं पार्थिवमानहीनम् ॥१०९॥
करोति शुक्रः खलु पंचमस्थः
    सदा दरिद्रं विकृतं मनुष्यम् ।
सुतार्थहीनं व्यसनैः समेतं
    कुमित्रसङ्गेन युतं नितान्तम् ॥११०॥

106a. दैत्यगुरुः R   106b. सपापं I, सुपाथं W   107a. ग्रहजं QW
107b. प्रतापभीतं R   बहुपापरक्तं R   107d. रतिलाभसं च C, R
रविलाभसं च I, रतिलालसंस्थः R   108b. रोरक° CERTV, रारक°
ABOS, दारक° I, रोगनि° LQW   °चर्चितश्च ABCEIOSTV,
°दूर्चितं च R, °पीडितं च LQW   109a. विधत्ते V   110d. कुमित्रसंमन°
AS, कुमित्रसंगम° R

षष्ठे स्थितः सर्वजनाभिभूतं
नरं प्रसूते प्रणयेन हीनम् /
विवर्जितं सत्यसुखेन नित्यं
विटेश्वरकं परतर्ककं च //१११//
करोति शुक्रः खलु सप्तमस्थो
वातादिरोगैः सहितं मनुष्यम् /
नृशंसचेष्टं व्यसनाभिभूतं
सदा कृतघ्नं मतिवर्जितं च //११२//
शुक्रोऽष्टमस्थः कुरुते विशीलं
नरं महाव्याधियुतं कृतघ्नम् /
नित्यं विहीनं बहुपापरक्तं
चिन्तान्वितं वैरयुतं सदैव //११३//
इति शुक्राष्टकवर्गफलम् //
रेखास्थितः सूर्यसुतः प्रसूते
स्थिरस्वभावं सुभगं मनुष्यम् /
प्रियान्वितं सर्वजनैः प्रधानं
विनीतवेषाभरणं सदैव //११४//
द्वितीयसंस्थो रविजः प्रसूते
नरं नितान्तं बहुमानभाजम् /
पराक्रमोत्साहधनेन युक्तं
तीर्थानुरक्तं बहुयातनां च //११५//

111a. स्थित: LQW 111d. °तर्कुकं QW, °नर्त्तकं R, °नर्तकं ET 112b. वातादिरोगैः LQW 112c. °चेष्टां ABCEOT 113b. कृतघ्नं, कृतद्रोहः ETV 113c. नित्यं om. R, नित्या C, नीचं W 113d. वैरसुतं AIO, चैव सुतं B, चैव नरं LQW, वै सुतटं R, रोषमह° CETV °द्वयं च CETV col. इति श्रीवृद्धयवनभाषाटीका संगृहीतश्रीमोहनशर्मविरचितायां शुक्राष्टकवर्गफलाध्यायः Q, इति श्रीवृद्धयवने शुक्राष्टकवर्गफलाध्यायः LW col. om. V col. शुक्रस्याष्टक° R 114b-115a om. A 114b. सुगमं CT 115d. तीर्थासु रक्तं I बहुमानभाजं BLQW, वरयानमाद्यं ET, वरयानमाद्यं

सौरस्तृतीयः कुरुते प्रधानं
नरं सुविद्यागमशास्त्रलुब्धम् ।
सरोरुहलोहाढ्यमनल्पपत्रं
नरं सदा शान्तमतिप्र   वम् ॥११६॥
धनर्धगः सूर्यसुतः प्रसूत
नरं सुताढ्यं बहुखानपानम् ।
स्रग्गन्धधूपादिसम्भोगभाजं
प्रभूतसस्यार्थवराश्वयुक्तम् ॥११७॥
करोति मन्दः खलु पंचमस्थो
नरं कुलीनं सुखिनं च नित्यम् ।
स्त्रिया समेतं विगतारिपक्षं
नृपाश्रितं प्रोद्दापितं सदैव ॥११८॥
षष्ठेऽर्कजः शीलधनं प्रसूते
नरं विधिज्ञं सुरविप्रयुक्तम् ।
पश्चात् प्रतिज्ञं कनकार्थलाभं
महाप्रभावं नरनाथपूज्यम् ॥११९॥
शनैश्चरः सप्तमगो विधत्ते
नरं धनाढ्यं प्रमदाप्रधानम् ।
विवर्णं कीर्तिकरं मनोज्ञं
कलासु दक्षं प्रथितं नृलोके ॥१२०॥

116b. नरं सु°] स्वधर्म° R   116c. °लोहाढ्य° B, °लोहास्य° I, °लोहाढ्य V, लोहोत्थ° QW   116d. शांतमपि C, शान्तपति° W   117b. सताढ्यं V °स्वाद्य° W   117c. सुगंधा° W, सुगांध° Q, स्रगांध° TV °सम्भोग° ABEORSTV, °कतोति° C   117d. प्रसूत° L   118b. कुलानंदकरं विनीतं R   118d. स्त्रीदापितं Q, से दापितं R   119b. °प्रसक्तं BQRW, °प्रभक्तं L   119c. स्वस्थात् C

स्थाने ऽष्टमे सूर्यसुतः प्रसूते
विचित्रमाल्याभरणं मनुष्यम् /
हिरण्य
विद्याविनीतं द्विजदेवभक्तम् //१२१//
विन्दुस्थितः सूर्यसुतस्तु सूते
वृथाश्रमं पापरतं मनुष्यम् /
स्वबान्धवैस्त्यक्तमनल्पदुःखं
दीनं नृशंसं नृपपीडितं च //१२२//
द्वितीयसंस्थः कुरुते ऽर्कपुत्रः
पापात्मकं पापसुखं मनुष्यम् /
कुक्षिस्थरोगैः परिपीडिताङ्गं
चलस्वभावं सुमहाकदर्यम् //१२३//
तृतीयसंस्थो ऽर्कसुतः प्रसूते
नरं नृशंसं वितथक्रियं च /
बह्वाशिनं सत्यविहीनमुग्रं
चौरं खलं सर्वजनाभिभूतम् //१२४//
चतुर्थगः सूर्यसुतः प्रसूते
परुजं मनुष्यम् /
विहीनवर्णं गतबुद्धिवीर्यं
प्रेष्यं खलं दीनमनर्थयुक्तम् //१२५//

121a. सूर्यसुतः] रूपसुतं S 121d. विद्या° om. AI 122c. स्व° om. I °बैरूपकं ET 123b. पापसत्वं R 123c. कुक्षिस्व° BIQ, स्वकुक्षि° W, कुक्षिः स° ACEOSTV, कुक्षः स्व° R 123d. खल° LQW 124a. तृतीयसंस्थः कुरुते ऽर्कपुत्रो CR 124b. नरं नृशंसं] पापात्मकं R 125b. सुखेन मुक्तं R °मुक्तं LQW 125c. °वर्णं] °वीर्यं W 125d. °मनाप्यजुष्टं R

सौरः सदा पंचमगः प्रसूते
विरूपगौरं मलिनस्वभावम् ।
द्वेष्यं कुबुद्धिं हतकर्मसिद्धिं
चतूरोगशस्त्रोपहृतं नृशंसम् ॥१२६॥
षष्ठे शनिः पापयुतं
प्रभावहीनं परदाररक्तम् ।
गुदाग्निरोगोपहृतं सशोकं
प्रभूतवैरं प्रियसाहसं च ॥१२७॥
सौरो विधत्ते खलु सप्तमस्थो
नरं क्रियाहीनमनल्पवैरम् ।
सदा सरोगं मित्रबन्धुहीनं
— — — सुखविवर्जितं च ॥१२८॥
सौरोऽष्टमस्थः कुरुते दरिद्रं
नरं सरोगं बहुनीचरक्तम् ।
पित्तोद्भवैः पीडितमुग्ररोगं
विदेशभाजं परतर्ककं च ॥१२९॥
इति श्रीवृद्धयवने ऽष्टकवर्गफलानि ॥
इति शनेरष्टकवर्गफलम् ॥

126a. सौरिः W 126b. सुसौविर्मुक्तं C 126d. °द्रोग° – 127c गुदाग्नि° om. I 127a. प्रसूते] मनुष्यं LQW 127b. °दारयुक्तं AB 127d. प्रियसाहसं LQVW 128b कृपा°, BLQW, त्रपा° I 128d. हतात्मकं QW 1 om. W 129b. सुरोगं TV 129d. °तर्कुकं Q col.[1] om. CLV col.[1] इति om. R ~~श्रीवृद्धयवनजातके~~ °W समाप्तं added by R col.[2] इति श्रीवृद्धयवनभाषाटीकायां संगृहीताश्रीमोहनदासजीकारितायां अष्टकवर्गफलाध्याय संपूर्ण Q col.[2] श्री° om. ILR शनेरष्टकवर्गाध्याय: L, अष्टकवर्गफलाध्याय: समाप्त: W, अष्टकवर्गफलं समाप्तं R

मेषं गतो ऽर्कः शशिना च दृष्टः
करोति मर्त्यं सुजनस्वभावम् ।
प्रसन्नमूर्तिं प्रभुराविमानं
नरेन्द्रपूज्यं विगतारिपक्षम् ॥१॥
भौमेन दृष्टो रविरेव मेषे
नरं विधत्ते गजवाजिभाजम् ।
क्रियातिथिं देवगुरुप्रसक्तं
प्रतापिनं ब्राह्मणसंमतं च ॥२॥
यदा रविः सोमसुतेन दृष्टो
मेषे तदा सौख्यधनेन युक्तम् ।
करोति मर्त्यं बहुरोगभाजं
विनीतवेषं नृपपूजितं च ॥३॥
जीवेन दृष्टः सततसौख्यलाभं
करोति सूर्यः परमं च तोषम् ।
मेषे सदा बन्धुजनात्पूजा
विवेकविद्यागमसत्यतां च ॥४॥
॥५॥

करोति पुंसां खलु मेषसंस्थो
महाविघातं स्वसुतेन दृष्टः ॥६॥

IX 1 – XVII 12 om. L . 1a. मेषे ORT 2a. °रेष IOQRT 2b. प्रसूते QW 2d. प्रत्यर्थिनं W °संगतं B 4a. सत[illegible]लाभं ET 4c. बंधुजनैरुपेतं QW, बंधुजनेन [illegible] CT, बंधुजनेन [illegible] E 5a-6b om. ABCEIOQRSTW 6c-d om. QW 6d. महाविघ्न I, महावि ABORS सूर्यसुतेन I दृष्टं ABCEIS after 6 ET add इति मेषफलं

वृषे गतो वासरपः प्रसूते
  चन्द्रेण दृष्टः प्रचुरप्रतापम् ।
धर्मानुरागं परलोकलाभं
  विद्वज्जनैः सङ्गममास्पदं च ॥७॥
सूर्यो वृषे भूमिसुतेन दृष्टः
  पुंसां विधत्ते बहुमानहानिम् ।
उद्वेगमानं पशुवित्तहानिं
  कुमित्रसङ्गं विविधं च कामम् ॥८॥
सौम्येन दृष्टो वृषगः खरांशुः
  करोति मर्त्यं सुतपःसमेतम् ।
धर्मक्रियाराधनतत्परं च
  प्रियातिथिं पार्थिववल्लभं च ॥९॥
जीवेन दृष्टः प्रचुरान्नपानं
  रविर्विधत्ते प्रचुराश्व नाग
सूर्यो वृषस्थः प्रकरोति पुंसां
  हेमाम्बराश्वप्रभवं च लाभम् ॥१०॥
गुणानुरागं परपक्षनाशं
  हिरण्यमुक्तामणिक लाभम् ।
सूर्यो वृषस्थः प्रददाति पुंसां
  शुक्रेण दृष्टः प्रददाति वृद्धिम् ॥११॥

7a. वृषं ACER ततो I, सुतो B 7c. धर्मानुलालं B, धर्मानुला CIQ, धर्मोप्तलाभं W परलोकभाजं C 7d. °सस्पदं Q, °संसदं W 8a. दृष्टः om. Q 8c. om. A 9 om. W 9b. सुतया समेतं BQR 9d om. Q In CET the order is: 10c, 10a, नृपप्रसादाल्लभते च सौख्यं, and 10b. (10b–c om. Q) 10b. प्रचुराश्वराशि Q, प्रचुराश्व सूर्ये W, प्रचुराश्व तापं ET 10c. प्रचुरान्नपानं ABIRS, सज्जनानुरक्तं QW 10d om. CET 11a. गुणानुरक्तं W 11c. वृषस्थः प्र° om. B प्रमदादि QW 11d. परमां मे QW, शुभदः प्र° R after 11 CET add यात्रोविधानं बहुधर्मवृद्धिं प्रियैः प्रसङ्गं (संगं ET) प्रणयं (प्रणतं ET) प्रतापं

सौरेण दृष्टः प्रमदाविघातं
विलप्रणाशं गुदपादरोगम् /
वृषस्थितो भास्कर एव धत्ते
हिंसाविघातं †बहुधर्मवृद्धिम् //१२//
नृयुग्मसंस्थो दिनपो नराणां
चन्द्रेण दृष्टः सततं करोति /
ज्वरप्रकोपं मुखगुह्यरोगं
विवादमायास गुरुप्रकोपम् //१३//
सूर्यो नृयुग्मे मनुजस्य धत्ते
भौमेन दृष्टः सततं सदैव /
मतिप्रकाशं विभवं विवेकं
कलत्रपुत्रप्रभवं च सौख्यम् //१४//
नृयुग्मसंस्थो ऽपि जयं विधत्ते
सौम्येन दृष्टो नृपतेः प्रियत्वम् /
तथा नराणां बहुवित्तलाभं
नृपैः सह सङ्गमनं करोति //१५//
तृतीयराशौ दिनपः प्रसूते
जीवेन दृष्टः प्रभुतां विचित्राम् /
सन्मानमारोग्यकलत्रभोगं
सुसाधुना साधुजनेन सख्यम् //१६//

In CET the order is 12c, 12a, 12d, and 12b 12b. चित्र° C, विभ° T, वेभ° E 12d हिंसादियुक्तं C, हिंसावियुक्तं ET, हिंसात्मकं QW नृपतेः सुखं च CET, कुर्ते क्रूरमतिं जडं च QW after 12 ABIORS add प्रियैः प्रसंगः (प्रसंगः om. A) प्रणयं (प्रणतं ABIQS) प्रसन्नं S see CET after 11 after 12 CET add इति वृष(-- ET)फलं 13a. भृगयुग्मसंस्थो QW 13b. इष्टः R 13c. मुखप्रकोपं IOST 13d. °मायैसगुरु° QRW 14a. सततो R, सततः ABEIOQSTW 14c. सतिप्रकाशं QW विभवीश्चवेकं ET 15a. नृजन्मसंस्थो CET, भृगयुग्मसंस्थो W, भृयुगमसंस्थो Q ऽपि जयं om. A, दिनपोS, ऽपि सञ्जयं W 15b. सौमेन C, भौमेन S 15c-d om. ABIOQRSW 15c. तैथा ET नृपवित्तलाभं ET 16a. यदा नृराशौ W 16b. विचित्रं ABCERST 16c °मारोग्य° CIOR, °मारोम° AEST 16d. सुखाधुना I सौम्यजनेन QW

नृयुग्मसंस्थो विधृतं दिनेशः
शुक्रेण दृष्टः कुरुते मनुष्यम् /
विद्यार्थभोगं प्रणयेन युक्तं
हितं सपक्षं द्विजदेवभक्तम् //१७//
मन्देन दृष्टः परुषं सनीचं
गतप्रभावं सविता विधत्ते /
नृयुग्मसंस्थो ऽर्थदयाविहीनं
कृतघ्नमग्नं परपक्षरक्तम् //१८//
कर्किस्थितो ऽर्कः शशिना च दृष्टो
हेमार्थभोगं प्रभवं विधत्ते /
सौख्यं ससौभाग्यमथ प्रतापं
चन्द्रेण दृष्टः सुतरां गुरुत्वम् //१९//
भौमेन दृष्टो व्रणनाडिरोगं
करोति सूर्यः खलु कर्कटस्थः /
प्रियावियोगं विनयार्थनाशं
विगर्हणं सूनुकृतं सदैव //२०//
बुधेन दृष्टः खलु कर्कटस्थः
सूर्यो विधत्ते नियतं मनुष्यम् /
गतारिपक्षं विभवैः समेतं
प्रियातिथिं बान्धववल्लभं च //२१//

17a. नृयुम्मसंसं AS, नृयुग्मसत्यं BIOR विधृतां BI, विधृतो W, कुरुते CET 17b. प्रभुतां CET 18a. परुषं R 18b. गटप्रभावं ET 18c. नृजन्मसंस्थो C °संस्थस्त - दया° I र्यदया° QRW, र्कदया° AOS 18d. °पक्षवक्त्रं BQSW, °पक्षवक्रं I, °पक्षवक्तं OR after 18 CET add इति मिथुन (मिथुनराशि C) फलं 19b च धत्ते BIO, च त्ते A 19d. गुरुत्वं Q, गुरुत्वं W 20b. सूर्यः om S, स: A In I the order is: 20a-b, 21b-c, 20c-21a, 21d. 20c प्रियैर्वियोगं R विजयार्थ° W, विषयार्थ° Q 20d. हि न्गार्हणं OS, हि न्गार्हणं Q, हि गार्हणं IT, हि गो ऽर्हणं W सूनुकृतेन A, --- कृतैव S, सनुकृतैव -- T, सुनृकृतैव -- E 21a कर्कटस्य R, कंटकस्य B 21c. विनयैः BIQW, विसवैः ET

दृष्टः सुरेज्येन दिनाधिनाथो
नरं विधत्ते सुभगं मनोज्ञम् ।
मुख्यं प्रसिद्धं सततोरयकं
विवेकिनं ब्राह्मणसंमतं च ॥२२॥
विद्याप्रतापार्थधनैः समेतं
नरं विधत्ते भृगुजेन दृष्टः ।
कर्कस्थितो वासरपः प्रतापं
सदानुकूलं निजबान्धवानाम् ॥२३॥
मन्देन दृष्टः सविता प्रसूते
नरं नितान्तं कलहप्रधानम् ।
आलस्यनिद्राविरुजासमेतं
सदातिहृष्टं परतर्ककं च ॥२४॥
सिंहस्थितो वासरपः प्रसूते
चन्द्रेण दृष्टः सुभगं मनुष्यम् ।
भूक्षेत्रवित्तप्रभयो समेतं
सख्यं गुरूणां विनयेन युक्तम् ॥२५॥
भौमेन दृष्टः खलु सिंहसंस्थो
भानुर्विधत्ते ऽविरुजा समेतम् ।
नरं विहीनैः सुतमित्रदारैः
सदा कुचैलं विनयेन हीनम् ॥२६॥

22c. सख्यं QW 24b. कलहप्रियं च QW 24d. सदातिहृष्टं R, सदातिदृष्टं Q परतर्कुकं IO परतर्ककलं W after 24 CET add इति कर्क (कर्के रवि ET) फलं 25d–26b om. ABIORS 25d. सदा सुहृष्टं गुरुपूजि(ज W)कं च QW 25d. सौख्यं ET 26a–27a om. QW 26d. विनमेन ET

बुधेन दृष्टो दिनपः प्रसूते
सिंहाश्रितः सौम्यतरं मनुष्यम् /
प्रियंवदं धर्मविधानदक्षं
स्वपक्षपूज्यं सरकार्यदक्षम् ॥२७॥
जीवेन दृष्टः सविता प्रसूते
नरं विदग्धं प्रचुरप्रतापम् /
सिंहाश्रितः पुण्यपरं कृतज्ञं
विहीनपापं प्रणतारिपक्षम् ॥२८॥
सिंहाश्रितो भार्गवजेन दृष्टः
सूर्यः प्रसूते स्वगृहं प्रयातः /
ऐश्वर्यबुद्ध्यर्थविवेकयुक्तं
नरं प्रधानं प्रभया समेतम् ॥२९॥
मन्देन दृष्टो बहुमन्दभाजं
नरं प्रसूते दिनपः स्वराशौ /
व्ययासक्लेशभयैः समेतं
दुष्टस्वभावं गतसौहृदं च ॥३०॥
कन्याश्रितो वासरपः प्रसूते
नरं सरूपं सुभगं मनोज्ञम् /
चन्द्रेण दृष्टो नृपमानभाजं
महाधनैः संयुतमङ्गलाभम् ॥३१॥

27c. प्रियंविदं ABEIORST 27d. सुपक्षपूज्यं Q 28a. after दृ ET insert 29b–29c विवे 28b–28d om. QW 28c. कृतघ्नं B 29b–29c विवे om. here ET 29b. प्रजातः O 29c. °बुद्ध्यार्थ° R, °बुद्ध्यार्य° ABIOQS, °बुद्ध्या च CET 30c. व्ययं QW 30d. दृष्टः ABER after 30 CET add इति सिंहस्थ (सिंहे ET) रवौ फलं

[करोति भानुर्बहुरत्नभाजं
कन्याश्रितो धान्यधनेन युक्तम् /
चन्द्रेण दृष्टो मणिमुक्तकाढ्यं
श्रियैवरं मानधनैः सदैव //३१a//]

हृद्रोगपामाज्वरपित्तवातैः
संपीडितं वासरपः प्रसूते /
कन्याश्रितो भूमिसुतेन दृष्टो
नरं कविद्यागमसंश्रितं च //३२//

बुधेन दृष्टो दिनपश्च कन्ये
करोति शय्यासनवाहनाढ्यम् /
सदा समस्थं सुभगं मनुष्यं
प्रियागमं वेदविशारदं च //३३//

दृष्टः सुरेज्येन रविः प्रसूते
कन्ये नरं धर्मपरं प्रधानम् /
द्विजामरक्तं विगतारिपक्षं
संपूजितं भूमितले नरेन्द्रैः //३४//

शुक्रेण दृष्टः सविता प्रसूते
प्रख्यातवीर्यं सुभगं मनुष्यम् /
विवेकविद्यागमशास्त्रलब्धं
महाधनं शौर्यपरं सदैव //३५//

31a om. QW 31ac. °काढ्यं B, °काव्यं ET 32a. हृद्रोगमाया° I 33c. समुस्थं BCW, समस्तं Q 33d. बुद्धिविशारदं C 35b. सुगमं R, सुभं A 35c. °शास्त्रबोधं ET

सौरेण दृष्टः प्रकरोति भानुः
कन्याश्रितो रोगभयेन युक्तम् ।
विदेशभाजं परपक्षरक्तं
पौरं परुषं प्रभया विहीनम् ॥३६॥
सूर्यस्तुलास्थो हिमरश्मिदृष्टः
करोति जाड्यं बहुशोकयुक्तम् ।
निस्त्रिंशभावं धनलोभनाशं
नृणां तथा चौरविमोषणं च ॥३७॥
भौमेन दृष्टः सविता प्रसूते
रक्तानिलश्लेष्मजमेहरोगम् ।
भयं प्रवासं कलहं च वैरं
स्वधर्महीनं निकृतिं सदैव ॥३८॥
बुधेन दृष्टः सविता प्रसूते
…ाश्रितो कामरतं मनुष्यम् ।
लज्जाविहीनं कुनृपप्रसक्तं
नीचानुरक्तं प्रियसाहसं च ॥३९॥
जीवेन दृष्टः प्रकरोति भानु-
र्नरं तुलास्थः प्रणयेन हीनम् ।
नीचाप्तमानं परधर्मरक्तं
सुगन्धयुक्तं नरवर्जितं च ॥४०॥

36d. पौरं परूषं Q, पौरं पुरुषं ABIRSW पुरुषं QW, नरं सुघोषं C, घोरं रक्तं नरं सु° ET after 36 CET add इति कन्याफलं 37c. निस्त्रिंशलं बंधनबुद्धिनाशं QW 37c. निस्त्रिंश° EIT °लाबं B °लुब्धना° ABEIRT, °लुब्धना° C, °लाहि° S 37d. °विमोक्षणं QW च om. AS 38b. °मेधज° BQR, °भेद° W, °नेह° I 38c. सकलं ET च om. R 38d. निकृतं QW 39b. कामतरं R 39c. °प्रसक्तं A, °प्रसूते I, °प्रशस्तं Q, °प्रशरंतं W 39d. प्रियसाहसं — 41b om. E 40d. सुगंधरक्तं BQW

शुक्रेण दृष्टः सविता प्रसूते
नरं नितान्तं गणिकासु रक्तम् ।
तुलाश्रितः सत्यधनं कुधर्मं
पाषण्डिनामिष्टमनिष्टमित्रम् ॥४१॥
सौरेण दृष्टः प्रभया विहीनं
नरं प्रसूते सविता तुलास्थः ।
कुचैलिनं बान्धवलोकमुक्तं
सुनिष्ठुरं नूनमनिष्टबुद्धिम् ॥४२॥
चन्द्रेण दृष्टः सविताऽलिसंस्थः
करोति नानाविधयुक्तमेव ।
नरं प्रगल्भं प्रभया समेतं
हृतारिपक्षं गतसाध्वसं च ॥४३॥
भौमेन दृष्टोऽतिकठोरवाक्यं
रविर्विधत्तेऽलिगतो मनुष्यम् ।
धनैर्विमुक्तं सततं कुशीलं
महाभयैः सङ्गमनेन नित्यम् ॥४४॥
बुधेन दृष्टोऽष्टमराशिसंस्थो
रविर्विधत्ते सुभगं मनोज्ञम् ।
नरं नयज्ञं धनधान्यभाजं
संश्रायितं साधुजनेन नित्यम् ॥४५॥

41b. गणिकानुरक्तं ABCT 41c. सत्यधनं QW, सत्यसनं R कुधर्मरक्तं W 41d. पाखंडिना° ABCEQRTW 42 om. W 42b. प्रसूते — 42d सोनिष्ठुरं om. I 42c. कुचैलनं O °मुक्तं C 42d. °निष्टबुद्धिं CET after 42 CET add इति तुले रविफलम् 43b. °विधिज° W, °वि° R, °धन° C 43d. °साध्वसे T, °सध्वसं E, °साहसं C 44a. °वाक्ये R, °वाच्यं QW 44d. महाभवैः W, महाभवे Q 45d. संश्रायितं QW, समन्वितं CET (संश्रायितं seems to be [illegible] as a [illegible] of संश्रि)

जीवेन दृष्टो ऽलिगतो ह्यनाथः
करोति पथ्यैर्विविधैः समेतम् ।
प्रियंवदं सर्वजनैः समेत-
मत्नोत्तमं पूजितमन्यलोकैः ॥४६॥

सदा सुशीलं च समित्रभाजं
नानारवाद्यं सुभगं सुरूपम् ।
करोति भानुः खलु वृश्चिकस्थः
शुक्रेण दृष्टः प्रवरं मनुष्यम् ॥४७॥

सौरेण दृष्टो ऽलिगतो विवस्वान्
मायानरकं कुरुते मनुष्यम् ।
सदा विलोमं निजबन्धुवर्गै-
स्त्रासाधिकं निष्ठुरमोजसार्तम् ॥४८॥

चापाश्रितस्तीक्ष्णकरो ऽतिसौ-
चन्द्रेण दृष्टो जनयेन्मनुष्य ।
शास्त्रानुरक्तं प्रणतारिपक्षं
धनाधिकं ब्राह्मणसंमतं च ॥४९॥

विवर्णदेहं हृतमानवर्गं
प्रशान्तवीर्यं विनयेन हीनम् ।
चापाश्रितो वासरमः प्रसूते
भौमेन दृष्टो ऽतिखलं मनुष्यम् ॥५०॥

46a ह्यनाथः — 47a च om. W 47a. कुशीलं I 47b. °वाद्यं STW स्वरूपं W 47c. खलु om. W 47d. प्रमुरं EQTW 48b. नयानरकं S 48d. °जमार्त्तं OR, °जमोर्त्तं Q, °ज्ञमार्त्तिं ABCEISTW after 48 CET add इति वृश्चिक (वृश्चिकराशि C) फलं 49c. शस्त्रानुरक्तं CI 50a. °मानवीर्यं CE 50b. नयनेन R, तनयेन C

सौम्येन दृष्टः सततसौख्ययुक्तं
भानुः प्रसूते हयगो मनुष्यम् /
प्रियातिथिं देवगुरुप्रसक्तं
नयाधिकं बान्धववल्लभं च //५१//
स्ववर्गमुख्यं परवर्गमान्यं
पापैर्विमुक्तं पशुपत्रलाभम् /
भानुर्हयस्थः सुरपूज्यदृष्टो
धर्माधिकं संजनयेन्मनुष्यम् //५२//
शुक्रेण दृष्टः सविता प्रसूते
हयाश्रितः सत्प्रभया समेतम् /
नरं सुशीलं बहुरत्नभाजं
गुणान्तरज्ञं विभुतासमेतम् //५३//
हयाश्रितो वासरपः प्रसूते
पापानरक्तं च सक्तं मनुष्यम् /
रोगातुरं पुण्यधनैर्वियुक्तं
सुनिष्ठुरं स्नेहविवर्जितं च //५४//
मृगाश्रितो रात्रिकरेण दृष्टः
करोति भानुः सुभगं मनुष्यम् /
दानानुरक्तं सवित्रालेरक्तकीर्तिं
सुसंप्रसक्तं विनयोपपन्नम् //५५//

51b. क्रमगो IR, क्रमगो QW 52b. °विंयुक्तं S 53d–54b om. S, प्रियंवदं साधुजनप्रसक्तं भापाश्रितो सूर्यसुतेन दृष्टः करोति सूर्यः प्रभया विहीनं QW 54c. गुणातुरं BQW °विमुक्तं C, °विहीनं R after 54 CET add इति हयफलं
55b नुः — 55c दाना om. A 55d. सुसंप्रयुक्तं QW

भौमेन दृष्टः समरोगभाजं
करोति सूर्यो मृगगः सदैव /
निशाटनं पार्थिवचौरमुष्टं
दयाविहीनं विधनं खलं च //५६//
बुधेन दृष्टः सविता प्रसूते
मृगाश्रितः प्राणयुतः प्रगल्भम् /
सौख्याधिकं धर्मपरं प्रधानं
गतारिवर्गं सधनं मनोज्ञम् //५७//
जीवेन दृष्टो दशमेस्थ एव
नरं प्रसूते दिनपः सुपक्षम् /
रत्नानुकूलं हृतपापवर्गं
विभूषितं पुष्पविलेपनाद्यैः //५८//
शुक्रेण दृष्टः सवितो प्रसूते
नरं विदग्धं मकराश्रितश्च /
सदेश्वरं प्राणभृतां वरिष्ठं
वित्तं प्रियातत्परधर्मरक्तम् //५९//
विहीनवेषं गतपुत्रदारं
जनैर्विमुक्तं सततं कुचैलम् /
शनिर्मृगस्थो जनयेन्मनुष्यं
विवर्जितं मानवपैः सदैव //६०//

56a-b भाजं करो om. AS 56d. विधिनं BCI, निधनं Q
57d. गतारिपक्षं ET मनुष्यं R 58c. रत्नानुकालं QW
59d. महाप्रभावं विगताभिमानं QW 59d. वित्तं R
वस्त्रं ABIOS 60b. समता ABCEIOST कुलं च QW
60d. मानवलैः QW after 60 CEI add इति मकरफलं

कुम्भं गतोऽर्कः शशिना च दृष्टो
नरं प्रसूते बहुलाभभाजम् ।
प्रियंवदं सत्यरतं सुशीलं
हृतारिपक्षं प्रणतं द्विजानाम् ॥६१॥
भौमेन दृष्टः सविता प्रसूते
कुम्भाश्रितः पापरतं मनुष्यम् ।
दुष्टस्वभावं परवित्तलुब्धं
दीनं कृशं बुद्धिविवर्जितं च ॥६२॥
सूर्यो घटस्थः शशिजेन दृष्टः
करोति सौम्यं सुभगं मनुष्यम् ।
वीर्योनदुःखं बहुशास्त्रदृष्टं
[illegible] कीर्तिभाजम् ॥६३॥
सूर्यो घटस्थः प्रकरोति वृद्धं
जीवेन दृष्टः प्रथितं मनुष्यम् ।
सदा मनोज्ञं गुणसाररक्तं
प्रभाविनं दानपरं प्रधानम् ॥६४॥
शुक्रेण दृष्टः सविता प्रसूते
कुम्भाश्रितः प्रीतिकरं मनुष्यम् ।
आरोग्यदेहं पटुवाक्यधुर्यं
विनीतवेषं बहुलाभभाजम् ॥६५॥

61a. कुंभे CS 61b. बहुभोगभाजं W, बहुभाजनभाजं Q
61d. प्रणवं ABCEIORST 62c. परिवित्त° CR, परि° IS
63c. वीर्यातिदुःखं ABCEO T, वीर्यै निदुःखं W, वीर्योतिदुष्टं I, अपेतदुःखं R बहुशास्त्रलब्धं R 63d. धनेन युक्तं ABCEIOQTW 64a. कृद्धि AC, अर्दिद्धं IW, वृद्धिं T, रिद्धिं BOQ, रिद्धिं R 64c. गुणलालसं च QW
65b. कुम्भामृत: R, कुंभे मृतं ABCEIOST 65c. पुष्पमुत्पत्युक्तं R

मन्देन दृष्टः प्रकरोति भानुः
    कुम्भाश्रितः क्लेशभवेन युक्तम् /
जडस्वभावं कुटिलं कृतघ्नं
    संत्यक्तशीलं भयविह्वलं च //६६//
मीनाश्रितो वासरपः प्रसूते
चन्द्रेण दृष्टः प्रचुरप्रभावम् /
सुवर्णताम्रायसरौप्यभाजं
    नतं द्विजानां सततं विचित्रम् //६७//
भौमेन दृष्टः प्रकरोति भानु-
    र्मीनाश्रितः क्लेशकदर्थिताङ्गम् /
नरं सरकं नृपतेरनिष्टं
    लज्जाविहीनं सुनिराश्रयं च //६८//
बुधेन दृष्टो दिनपः प्रसूते
    मीनाश्रितः सत्यपरं मनुष्यम् /
बुद्ध्या समेतं प्रियमिष्टधर्मं
    प्रियातिथिं शौचसमन्वितं च //६९//
सुरेज्यदृष्टो झषराशिसंस्थो
    भानुः प्रसूते बहुवित्तयुक्तम् /
नरं विधत्ते विविधान्नपानं
    तीर्थादिरक्तं वरवस्त्रलाभम् //७०//

66b. क्लेशभयेन QW   after 66 CET add इति कुम्भफलं   67a after वासरपः AS insert 68a प्रकरोति – 69c समेतं   67b प्रचुरस्वभावं CO   67d. विचित्रं ET   68b. °कदर्पितां I BQ, °कदर्थितांगं R   68c. निरक्तं OR   नृपतेरभीष्टं ET, नृपतौ सुमृष्टं ABIOQS, नृपतौ सुतष्टं W, नृपतौ रसुष्टं R   68d. मनिराश्रयं QR, तु निराश्रयं W   69c भौमः समेतं ABCEIORST   °मिष्टधर्मं CR   70a सुरेज्यदृष्टो I   त्यरशाश्रसंस्थो AIR, त्यरर्षाशश्रसंस्थो B, परशार्थसंस्थो S, त्यर – – शाश्रसंस्थो O, त्तिमराशिसंस्थो CET   70b. °पित्त° ABIOS   70c. विधीते IS, विहीनं OR, विनीतं QW, सुयुक्तं CET   °पानैः CT   70d. °रक्तांबर° ABES

शुक्रेण दृष्टः सविता प्रसूते
मीनाश्रितस्त्यागपरं मनुष्यम् ।
मानार्थशय्यासनदानयुक्तं
दासानुकूलं प्रमदाजनस्य ॥७१॥
उद्वेगशोकाकुलमिष्टपापं
मन्देन दृष्टः सविता विधत्ते ।
मीनाश्रितो बंधनचौररक्तं
सदातुरं मित्रविवर्जितं च ॥७२॥
इति श्रीवृद्धयवने सूर्यदर्शनचारफलानि ॥

71c. नानार्थ° W 72b. प्रसूते QW col. इति श्रीजवनभाषाटीकायां सगहीजीश्रीमोहदाशकारिताया सूर्यदर्शनचार Q col. श्री° om. ABEIORT श्रीवृद्धयवनजातके C सूर्यदर्शनचारः RW

मेषे गतो शनिश्चरः प्रसूते
सूर्येण दृष्टः कथितप्रभावम् /
नरं नितान्तं व्यसनैः समेतं
गतप्रभं भक्तिविवर्जितं च //१//
मेषाश्रितः शीतकरः प्रदृष्टो
भौमेन मर्त्यं सरुजं करोति /
बहुप्रकोपं विनयेन हीनं
सदा दरिद्रं गतसौहृदं च //२//
बुधेन दृष्टः प्रकरोति चन्द्रो
नरं विनीतं सरशीलभाजम् /
मेषाश्रितो वाहनभोजनाढ्यं
प्रियंवदं ब्राह्मणवत्सलं च //३//
जीवेन दृष्टः खलु मेषसंस्थ-
श्चन्द्रः प्रसूते गुणकीर्तिभाजम् /
नयाधिकं धर्मपरं कृतज्ञं
दयान्वितं सत्ययुतं सदैव //४//
मेषाश्रितो भार्गवदृष्टियुक्त-
श्चन्द्रः प्रसूते विधनं मनुष्यम् /
हृतारिरोगं विनयप्रयुक्तं
महाप्रभं पार्थिवसंमतं च //५//

1a मेषं QW 1b कविन:स्वभावं C, प्रथितस्वभावं QW 1d गतप्रभां ABCEIORST शक्ति° Q!J 3b सत° ABIOQRSW °भावजं ABCEIRT 3c भोजनवाहनाढ्यं S °भोजनार्यं B?RW 4c-5a om. C 5b विधारं Q, निधनं ABCEIST 5c हृतारियोगं W विनयेन युक्तं W

दृष्टः शशाङ्को ऽङ्गगतोऽसितेन
पापं विधत्ते सरुजं मनुष्यम् ।
विहीनवित्तं कलहश्रमार्तं
विवर्जितं साधुसमागमेन ॥६॥
वृषाश्रितो रात्रिकरः प्रगल्भं
नरं प्रसूते रविणा च दृष्टः ।
मायाधिकं वित्तहरं प्रजाना-
मग्रस्वभावं गतधर्मबुद्धिम् ॥७॥
चन्द्रो वृषस्थः क्षितिजेन दृष्टो
नरं सवाते घनपीडिताङ्गम् ।
व्याधिकं कण्डुरुजासमेतं
सनिष्ठुरं पैण्यविवर्जितं च ॥८॥
सौम्येन दृष्टो वृषगः शशाङ्कः
करोति मर्त्यं नृपतुल्यभागम् ।
विद्यान्तरकं प्रभया समेतं
युतं महाबन्धिगणैः सदैव ॥९॥
जीवेन दृष्टो हिमगुर्वृषस्थो
नरं प्रसूते द्विजदेवभक्तम् ।
सुवस्त्रशय्यासनभोजनाद्यैः
समन्वितं तस्य गुणप्रभावम् ॥१०॥

6 om. QW 6a. सितेन – 7a वृषाश्रितो om B 6b. पथ्यं A S, परं ET 6c. °श्रमार्तिं ET, °स्त्रमात्तं AS, °प्रमत्तं I 6d. °समागमं च ACEIORT, °समागतं च S 7a. वृषस्थितो Q 7b. नरं प्रसूते om. W 7d. गतधर्मबुद्धं QW 9b. °भोगं ET, °भाग्यं Q, °भोज्यं W 9d. युतं om. IW, नुत R

गोसंश्रितो रात्रिकरः सवाते
    शुक्रेण दृष्टः सुभगं मनुष्यम् ।
यशोऽन्वितं कूपतडागरक्त-
    मुद्यानवापीकृतमानसं च ॥११॥
मन्देन दृष्टो गविगः शशाङ्को
    नरं सवाते व्यसनैरुपेतम् ।
गतप्रभावं बहुदैन्यभाजं
    विवर्जितं पुत्रधनार्थदारैः ॥१२॥
नृयुग्मगः शीतकरः प्रसूते
    सूर्येण दृष्टो बहुमन्दवृद्धिम् ।
सर्पादिभिः पीडितमुग्ररोगै-
    र्विचर्चिकाद्यैश्च तथा सदैव ॥१३॥
दृष्टः शशाङ्को मिथुनाश्रितश्च
    भौमेन भीतं जनयेन्मनुष्यम् ।
दीनं कृशं वातविकारयुक्तं
    सदातिवृद्धं नयवर्जितं च ॥१४॥
सौम्येन दृष्टो मिथुने शशाङ्कः
    करोति सौख्यं सुभगं मनुष्यम् ।
मनोज्ञदेहं सुहृदा च युक्तं
    कुलप्रधानं प्रणतं द्विजानाम् ॥१५॥

12a. यविगः BR, कविगः C 12b. प्रसूते CET 12c. °दैन्यसत्त्व B, °दैत्यराजं R 12d. °दानैः W 13b. °बुद्धिं Q 13c. °रोगं W 13d. सदा तथैव ET 14c. वित्तविकार° BQRW 14d. °वृद्धिं W, °कृद्धं R 15a. सौमेन I, भौमेन BR, बुधेन QW 15c. समुदा च ABIOQRSW, च सुबुद्धि° C

जीवेन दृष्टो मिथुनस्थ एव
    चन्द्रः प्रसूते विभवैः समेतम् /
महाधनं शौर्यकृतं मनोज्ञं
    शुचिं सदा धर्मसमन्वितं च //१६//
शुक्रेण दृष्टः प्रकरोति चन्द्र-
    स्तृतीयराशौ गजवाजिभाजम् /
नरं बहुस्त्रीरतिलब्धसौख्यं
    महाधनं पार्थिवमानजुष्टम् //१७//
सौरेण दृष्टो ऽतिबलं सुबाते
    चन्द्रो नृयुग्मस्थित एव मर्त्यम् /
चौराबनीश्रीः परिपीडिताङ्गं
    सवृद्धभावं विनयेन हीनम् //१८//
कर्कास्थितो रात्रिपतिः सुबाते
    सूर्येण दृष्टो ऽल्पधनं मनुष्यम् /
तीव्रस्वभावं खलसङ्गरक्तं
    धर्मार्थकामैः परिवर्जितं च //१९//
भौमेन दृष्टः प्रकरोति चन्द्रः
    कर्कास्थितस्यागदयाविहीनम् /
नितान्तदुष्टं परपुत्रहीनं
    विवर्जितं धर्मपरैर्मनुष्यैः //२०//

16c. सदा धनं QW सौर्यपरं R मनोज्ञं] कृतज्ञं R 17d. °सुष्टं AIQ, °पुष्टं OS, °दृष्टं CT, °दृष्टं E 18b–19a in marg. O 18d. सम्वृद्ध° W, समृद्ध° R, सशोक° C after 18 C adds इति मिथुनफलं 19–24 om. Q with f. 71 [illegible] which is replaced [illegible], a copy of f. 177 containing XXII 45–53 / 19a [illegible] ε: ET [illegible] °तस्यो S, °तस्या IW 20c परमुत्र° I, परमुत्र° W, पर[illegible]° C

बुधेन दृष्टः स्वगृहे शशाङ्को
नरं सवाते तनयार्थयुक्तम् /
विदग्धबुद्धिं बहुमित्रपूज्यं
श्रद्धान्वितं सत्यदयासमेतम् //२१//
दृष्टः सुरेज्येन निशाधिनाथ-
स्तुर्यराशौ व्रतिनं विधत्ते /
तीर्थानुरक्तं गतदुष्टभावं
सुधार्मिणं देवगुरुप्रसक्तम् //२२//
शुक्रेण दृष्टः प्रकरोति चन्द्र-
स्तुर्यराशौ गृहभूमिभाजम् /
सदानुरक्तं गुरुबान्धवानां
मनस्विनं शीलधनप्रगल्भम् //२३//
सौरेण दृष्टः प्रकरोति चन्द्रः
कर्कान्वितः पापमतिं मनुष्यम् /
विहीनवित्तं परदाररक्तं
सदा कृतघ्नं भयसंयुतं च //२४//
सिंहाश्रितः शीतकरः प्रसूते
सूर्येण दृष्टः प्रचुरं विदग्धम् /
सत्याश्रितं बन्धुजनेन पूज्यं
सभूमिलाभं गतरोगदुःखम् //२५//

21c. °बृद्धिं O °मित्रयुक्तं W 22b-23a om. W 22b. वनि ET 23b. ग्रह° ET 24c. परदारसक्तं I after 24 C adds इति कर्कफलं 25c. बन्धुजनेन पूज्यं om. W 25d. स(स om. W)बंधुपालं QW

ौमेन दृष्टः कुरुते शशाङ्कः
सिंहाश्रितः पापरतं मनुष्यम् /
चानुरक्तं परदेशभाजं
महाभयं पार्थिवपीडितं च //२६//
ेन दृष्टः प्रकरोति चन्द्रः
सिंहस्थितः कृच्छ्रधनाप्तसौख्यम् /
पुण्यभाजं कुकलत्रमुक्तं
युक्तं विचित्रैः पशुपुत्रवित्तैः //२७//
विने दृष्टः प्रभुतासमेतं
सिंहाश्रितः शीतकरो विधत्ते /
रं महाधर्मपरं प्रधानं
प्रज्ञान्वितं मान्यतमं प्रियं च //२८//
केण दृष्टः सुभगं मनोज्ञं
हरौ स्थितः शीतकरो विधत्ते /
यंवदं धर्मकथानुरक्तं
हितं द्विजानां नृपपूजिताङ्गम् //२९//
न्देन दृष्टो बहुमन्दयुक्तं
चन्द्रो विधत्ते खलु सिंहसंस्थः /
रोगतिदाहज्वरकामलाद्यैः
संपीडिताङ्गं मनुजं विधत्ते //३०//

.c परदेशभाजं — 27c om. W   26d. महाभयं S   27b–28a
.. ET   27b. सिंहाश्रितो Q   27d. युक्तं om. W   च मित्रैः
BIOQRSW   °मित्रैः BCIW, °वस्त्रैः Q   28c–29b om. S
.d. यशोन्वितं R   मन्यतमं ABCEIOQRTW   30c
.ाद्य° ABCEIOQRST   after 30 C adds इति सिंहफलं
इति

कन्याश्रितः शीतकरोऽर्कदृष्टो
नरं सवाते तनयेन युक्तम् /
भद्रापरं सात्त्विकमिष्टधर्मं
तीर्थानुरक्तं भयवर्जितं च //३१//
भौमेन दृष्टः परदाररक्तं
कन्याश्रितः शीतकरः करोति /
क्षतार्दिताङ्गं गुरुरोगयुक्तं
महाभयैः संयुतमिष्टपापम् //३२//
बुधेन दृष्टः खलु शीतरश्मिः
कन्याश्रितः श्रीसहितं मनुष्यम् /
करोति भूपालसलब्धमानं
नयप्रियं पण्यैकथानुरक्तम् //३३//
सदा सशीलं द्विजदेवभक्तं
भूपालमान्यं द्विजबन्धुपूज्यम् /
कन्याश्रितो रात्रिपतिः सवाते
जीवेन दृष्टः प्रचरप्रतापम् //३४//
शुक्रेण दृष्टः सततं विधत्ते
चन्द्रः प्रसूते खलु षष्ठराशौ /
सद्भूमिवस्त्रान्नवरौषधीनां
संसेवकं पीनतनुं मदार्तम् //३५//

32b. कन्यागतः R 32c. कृतार्दितांगं R 33b. श्री° om. QW
33c भूपाल° – 34a om. O 33c. भूपालसलब्ध° ABCIQS; भूपालिसत्र° ET 34d. प्रचरप्रभावं Q 35b. खलु om. S
35c. °वस्त्रं च वरौ° S, °वस्त्रौन्नवरौ° E, °वस्त्रान्नवरौ° R
35d. सदार्तं AS, मदानां B, मदांधं QW, नदार्तं R

सौरेण दृष्टो विधानं मनुष्यं
नयेन हीनं परदाररक्तम् /
सदाऽनसं मन्दगतिं विधत्ते
नीचाश्रितं पापरतं सदैव //३६//
तुलाश्रितो रात्रिपतिर्यदा स्यात्
सूर्येण दृष्टः प्रकरोति मर्त्यम् /
कीर्त्याधिकं वित्तसुतं कृतज्ञं
शौर्यस्वभावं सततं सुखाढ्यम् //३७//
भौमेन दृष्टो हिमगुः प्रसूते
तुलाश्रितः पापरतं कुशीलम् /
लज्जाविहीनं व्यसनैरुपेतं
मित्रैर्विहीनं विकृतस्वभावम् //३८//
सौम्येन दृष्टः सुभगं प्रसूते
तुलाश्रितः शीलकरो मनुष्यम् /
सत्यानुरक्तं यशःपत्रयुक्तं
नानागमैर्बोधितबुद्धिवृद्धिम् //३९//
देवेज्यदृष्टो हिमगुः प्रसूते
तुलाश्रितः सत्यपरं मनुष्यम् /
गुणानुरक्तं प्रचुराचमानं
मन्दं सुशीलं प्रमदाप्रियं च //४०//

36a विधुनं ABCEIOST 36c–37d om. B 36c om. R, suppl. R² 36c: कन्याश्रितो रात्रिकरः प्रसूते QW, धनेन हीनं कुसुतेन पीडितं CET 36c. विनीतं S, वि AOR² after 36 C adds इति कन्यायां चंद्रफलं 37 om. QW, suppl. R² 37a °र्यदि C 37b. मर्त्यं om. I 37c. धनज्ञं R² 37d. सूर्यस्वभावं I सुखी च ACEIOST, सुखा च R² 39c दैवबुद्धिजेहं QW पैशापुत्रयुक्तं om. A, यशोमित्रयुक्तं W 39d. °बुद्धिबुद्धिः ABEIRT 40b. सत्यधारे B

शुक्रेण दृष्टः प्रकरोति चन्द्रो
    नरं विवेकागमशास्त्रलब्धम् /
हस्त्यश्ववस्त्राबसम्भोजनानि
    नृपप्रियं बौन्धवपूजितं च //४१//
सौरेण दृष्टो हिमगुः प्रसूते
    तुलाश्रितो धर्मदयाविहीनम् /
कुभिन्नरकं बहुशोकभाजं
    निरकर्पौरं परतर्ककं च //४२//
चन्द्रो ऽलिसंस्थो मनुजं प्रसूते
    सूर्येण दृष्टः प्रभया विहीनम् /
नरं निकृष्टाश्रयमुग्रकर्मं
    प्रतापहीनं विकृतं सदैव //४३//
चन्द्रो ऽलिसंस्थः क्षितिजेन दृष्टो
    नरं सबाते कृतिकीर्तिदेहम् /
नित्यं कृलघ्नं भयशोकतप्तं
    व्यथाधिकं कामपरं कुचैलम् //४४//
करोति चन्द्रो ऽलिगतो मनुष्यं
    सौम्येन दृष्टः सुभगं मनोज्ञम् /
गतारिपक्षं द्विजदेवभक्तं
    प्रशान्तमित्तं व्यसनेन हीनम् //४५//

41c. °सम्भोगभाजं R 42a. सविता ABCEIOQRTW 42d. विनिर्कपारं W after 42 C adds. इति तुलफलं 44c. [illegible] ET
45d. प्रशांतवैरिं नमसेन हीनं ABIOS, प्रशांतरिच्छसनेन हीनं R, प्रशांतवैरं QW

जीवेन दृष्टो ऽलिगतो ऽतिधर्मं
नरं प्रसूते हिमगुः प्रसिद्धम् ।
सदा सुशीलं नृपतेरभीष्टं
प्रियं नरं दानरतं सदैव ॥४६॥
शुक्रेण दृष्टः खलु शीतरश्मि-
र्नरं सुनाते ऽलिगतो धनाढ्यम् ।
विमुक्तरोगं गतपौरशोकं
हीनं सदा बन्धुजनस्य लोके ॥४७॥
सौरेण दृष्टः खलु शीतरश्मि-
र्नरं प्रसूते गतमानलाभम् ।
चिन्ताधिकं बुद्धिविवेकहीनं
कृतघ्नकर्माणमुरुप्रकोपम् ॥४८॥
चापाश्रितो शीतकरः प्रसूते
सूर्येण दृष्टः प्रचुरप्रकोपम् ।
विहीनलज्जं नृपमानहीनं
विवर्जितं साधुजनैः सदैव ॥४९॥
चापाश्रितः शीतकरो विधत्ते
भौमेन दृष्टः कलहेन युक्तम् ।
नरं द्विजदेवपरं कुधर्मं
त्यक्तं स्वधर्मेण महाविरोगम् ॥५०॥

46a. हि धर्मं ABCEIOQRSTW 46d. प्रियंवदं R 47c. गतघोर° CET °शोकैः W 47d हितं CET, जयं Q 48b. गतपान° E 48c. तुद्धिविवेक° R, तुद्धिपिवेक° B, तद्वि विवेक° Q, बंधुविवेक° ET, मानविवेक° C 48d. °कर्माणगुरु° ABCEIOQRST after 48 C adds इति वृश्चिकफलं 50a. प्रसूते W 5c [illegible] द्विजं देवपरं Q, द्विजादेवपरं W [illegible] C 5c [illegible]

हये शशी लब्धधनं प्रसूते
बुधेन दृष्टः प्रणतारिपक्षम् /
प्रियंवदं सर्वजनप्रधानं
ससंयतं वेदविशारदं च ॥५१॥
जीवेन दृष्टो हयगः शशाङ्को
जितेन्द्रियं सत्यपरं प्रसूते /
वेश्यानुरक्तं बहुभृत्यवर्गं
ससंयतं दैवगुरूर्जितानाम् ॥५२॥
शुक्रेण दृष्टो हयगः शशाङ्को
नरं विधत्ते बहुवाजियुक्तम् /
दानोद्यतं सुखभयेन सक्तं
†लाभो यथा सङ्गतमिष्टसख्यम् ॥५३॥
सौरेण दृष्टो हयगः शशाङ्कः
करोति रोगैर्विविधैः समेतम् /
नरं प्रभूतागममव्ययाढ्यं
कफप्रसक्तं विनिधीप्रियं च ॥५४॥
मृगाश्रितः शीतकरः प्रसूते
सूर्येण दृष्टो गतमानवित्तम् /
प्रभाविहीनं परपाकरक्तं
प्रभावदुष्टं हृतबान्धवं च ॥५५॥

51a. तोनधनं BQW, जेनधनं R, स्फीतधनं I, नधनं ACS प्रसर्वै W 51c. चिप्रंवदं E 52c °वर्यं ABIOQW, °वर्ज्जं R 52d. सुसंनतं R °गुरुर्ज्जनानां ABCEIOQRSTW 53c. दानोद्धृतं BW मुकभयेन S मुक्तं C 53d. संगतिमि° R 54c. प्रसूतागम° ABIO QS, प्रभूतामेय° C, प्रसूताम° ET °मव्ययाढ्यं om. QSW, °मषव्ययाढ्यं AB, °मेषव्ययाद्यं I, °मर्षयाद्यं O, °चव्ययाद्यं C, °मयथयाद्यं ET, °येधयाद्यं R 54d. कफयुक्तं S, कर्कयक्तं W च om. A 55c. परपक्षरक्तं C 55d. हृतबांधवं I, हितबांधवं Q

भौमेन दृष्टो मकरे शशाङ्को
    नरं विधत्ते प्रणयेन हीनम् /
गात्रं परमत्सरकं
    दुष्टस्वभावं हतबान्धवं च ॥५६॥
भिन्नानिलैः पीडितमग्ररोगं
    सदा रतं नीचैकथाप्रसङ्गैः /
बुधेन दृष्टो बहुवाद्ययुक्तं
    नरं सवाते मृगगः शशाङ्कः ॥५७॥
सुरूपदेहं सौभगं विनीतं
    निषेवितं साधुजनेन नित्यम् /
जीवेन दृष्टः खलु शीतरश्मि-
    र्मृगाश्रितो धर्मपरं मनुष्यम् ॥५८॥
करोति रत्नागमलब्धतुष्टिं
    तीर्थाश्रयं शत्रुजनैः समेतम् /
शुक्रेण दृष्टो मकरे शशाङ्कः
    करोति पण्यैर्विविधैः समेतम् ॥५९॥
जितारिपक्षं निजबन्धुमान्यं
    कलत्रधानं सुभगं सदैव /
सौरेण दृष्टो मकरे शशाङ्कः
    करोति मर्त्यं बहुदोषभाजम् ॥६०॥

56 om. I   56c. विनय° ABORS   °रत्वं C   57a-b om. QW
57b. दारारतं ET   57c. वधाबाद्ययक्तं ET   58b. निषेवितं QW
58d. °मृगान्मितो B   59b. शत्रुधनैः BQRW   60a. चितारि° Q,
चतारि° W   °मानं BCI   after 60 C adds इति
मकरफल

विचर्चिकण्डुवादिरुजासमेतं
संपीडितं कामलवातदोषैः /
कुम्भे शशी वासरपेण दृष्टो
नरं प्रसूते नयनार्थभीतम् //६१//
मुखाक्षिरोगप्रमुखैर्विकारैः
संपीडितं पार्थिवतस्करैश्च /
घटाश्रितः शीतकरः प्रदृष्टो
भौमेन नित्यं कुरुते कृतघ्नम् //६२//
क्रोधाधिकं वंचनकं परेषां
विशारदं सर्वकलासु दक्षम् /
चन्द्रो घटस्थः स्वसुतेन दृष्टः
करोति मर्त्यं सुतदारभृत्यैः //६३//
हितं विधत्ते द्विजदेवभक्तं
सदा सुशीलं बहुमानभाजम् /
जीवेन दृष्टो घटगः शशाङ्कः
. . . . //६४
शुक्रेण दृष्टो घटगः शशाङ्कः
करोति सर्वस्वधनैः समेतम् /
नरेन्द्रसेवासु रतं नयज्ञं
प्रशंसितं साधुजनेन नित्यम् //६५//

61a. °कंड्वादि° R, °केत्यादि° S, °खडगादि° C   61b. संपीडितं om. B, तथापरैः QW   61d. तमयार्थ° CET   °भाजं S   62b. मुखाभिराग° S   62b. °तस्कराद्यैः QW   62d. नित्यं] दृष्टः R   63a. वनकं B, बंधनकं I   63c. दृष्टः om. Q   63d. °दारवित्तैः ET   64c-d om. ABEIOQRSTW   64d om. C   65b. मर्त्यं स्वधनैः OQSW, मानस्वधनैः AR, पर्वस्वधनैः I, पर्वं - - - - - नं स्वधनैः B   65c. नयतं AET, कृतज्ञं C

गुल्मातिसारैः प्रभवैश्च रोगैः
संपीडितः कर्णसमुद्भवैश्च /
घटाश्रिते सूर्यसुतेन दृष्टे
चन्द्रे नरः कीर्तिविवर्जितश्च //६६//
मीनाश्रितः शीतकरः प्रसूते
सूर्येण दृष्टो विकृतं मनुष्यम् /
त्यक्तं स्वमित्रैः परमित्ररक्तं
बुद्ध्या विहीनं सततं विरुद्धम् //६७//
भौमेन दृष्टो झषगः शशाङ्कः
करोति रक्तप्रभवैश्च दोषैः /
संपीडिताङ्गं गुरुदोषभाजं
विहीनवित्तं परदेशरक्तम् //६८//
बुधेन दृष्टो झषगः शशाङ्कः
करोति नानाविधरोगभाजम् /
नरं सुरूपं बहुशास्त्ररक्तं
सदानशीलं सततं सलाभम् //६९//
जीवेन दृष्टो झषराशिसंस्थो
नरं सवाते सभगं शशाङ्कः /
चतुष्पदाच्छादनभूरिलाभैः .
सन्तुष्टचित्तं नृपमानभाजम् //७०//

66b. संपीडितं OR, प्रपीडितं ITW 66d. नरं ABCEIOQRSTW
वर्जितं च ABCEIOQRSTW post 66 C adds इति कंभफलं
c व्यक्तं QW 68b. °प्रभवैर्मदोषैः BI, °प्रभवैर्विकारैः QW
9b. °रोगभावं BQ, °योगभाजं C 69c. स्वरूपं R
9d. सदा सशीलं CQ 70a झषराशिसंस्थो om. B,
षगः शशाङ्को QW 70b. नरं om. B शशांकः] मनोज्ञं QW

शुक्रेण दृष्टः प्रचुरान्नपानैः
    संयोजयेच्छीतकरो भषस्थः /
शास्त्रानरक्तं विविधान्नपानं
    संरंजितं पार्थिवसद्गुरूणाम् //७१//
चन्द्रे भषस्थे रविपुत्रदृष्टे
    नरो भवेत् पापमतिः सदैव /
गुणैर्विहीनः प्रचुरप्रकोपो
    भयानरक्तः स्वसमन्वितश्च //७२//
इति श्रीवृद्धयवने चन्द्रदर्शनचारः //

71c. शास्त्रानुरक्तं EQTW, शस्त्रानुरक्तं C °पानैः C 72b पामपतिः W 72c. °प्रकोपं ABCEIT 72d. °रक्तं T, °रक्ते ABCEIOW स्वसमन्वितं च ET, स्वसमन्वितश्च O, शसमन्वितश्च Q, शसमन्वितं च W, नसमन्वितश्च B, समन्वितश्च A, मन्वितश्च I, समार्चितश्च S col. इति श्रीवृद्धजवनभाषाटीकायां सगहिनिश्रीमोहनदासजीकारितायां चंद्रदर्शनचार संपूर्णं Q col. श्री° om. ABEIORST चंद्रप्रदर्शनचारः W

मेषे गतो भूमिसतः प्रसूते
सूर्येण दृष्टो विधनं मनुष्यम् ।
विहीनबुद्धिं कृपणस्वभावं
विवर्जितं सत्यदयानयाद्यैः ॥१॥
मेषाश्रितो भूमिसुतः प्रसूते
चन्द्रेण दृष्टः प्रियमिष्टधर्मम् ।
[illegible]ानुरक्तं पितृमातृभक्तं
मुख्यं स्ववर्गे नियतं सदैव ॥२॥
भौमोऽजसंस्थो बुधदृष्टियुक्तः
करोति सत्यं वनितासु दक्षम् ।
सुशिक्षितं शास्त्रकथासु दक्षं
यशोऽन्वितं पौष्टिकमेव नित्यम् ॥३॥
जीवेन दृष्टः क्षितिजोऽजसंस्थो
नरं सुवाते बहुशास्त्रलब्धम् ।
हिरण्यवस्त्रैश्च चतुष्पदाढ्यं
विवर्जितं पापकथानुषङ्गैः ॥४॥
शुक्रेण दृष्टः प्रकरोति भौमो
मेषाश्रितस्तीर्थकथानुरक्तम् ।
शौचाधिकं देवगुरुप्रसक्तं
स्वधर्मसंस्थं सुरतप्रगल्भम् ॥५॥

b. विधनं BC, विधमं I 2c. पितृमातृभक्तं om. W 3a. बुद्धिदृष्टियुक्तं O 3c. सशिक्षितं BCOQ °कथानुरक्तं R 3d. यशोधनं S पौष्टक° BCI °मेधम् ABCEIORT 4c. दाढ्यं QS, °दाढ्यैः W 4d. °कथानुरक्तं ET 5d. °संस्थासुतं R

नयातिगं बान्धववैरभाजं
सौरेण दृष्टः क्षितिजः प्रसूते /
मेषे मनुष्यं परदेशरक्तं
विहीनकोपं भयसंयुतं च //६//
वृषाश्रितो भूतनयः प्रसूते
सूर्येण दृष्टो रतिदुःखताङ्गम् /
विहीनधर्मं जरया समेतं
त्यक्तं जनैः पीडितमग्रशोकैः //७//
चन्द्रेण दृष्टः क्षितिजो गविस्थो
नरं सुवाते सततं नयज्ञम् /
प्रियं प्रसन्नं सततं सकान्तं
मनोज्ञवेशं भयवर्जितं च //८//
बुधेन दृष्टः क्षितिजो गविस्थः
करोति कीर्त्या सहितं मनुष्यम् /
नानाधनैः संयुतमिष्टसत्यं
गुरुप्रसक्तं विनयाधिकं च //९//
दृष्टो गविस्थः क्षितिजः प्रशान्तं
जीवेन नित्यं जनयेन्मनुष्यम् /
पथ्याशिनं सर्वकलासु दक्षं
विचित्ररत्नं पशुसंयुतं च //१०//

6a om QW, placed after 6d in I 6a. बांधववैद° ET, बांधवयेन° ABO, बांधमेन° S after 6d. कृतघ्नमत्रानिनमेव नित्यं QW (6d. °कोषं CIS, °कोशं EQRT, °शोकं W) after 6 CET add इति मेषफलं 7b. रत° R 7d. °मुग्नलोकैः I, °मुग्नरोषं QW 8b–9a om. BQW 8b नयज्ञं — 9b. सहितं in marg. T 8c. सततं] प्रणतं R 8d. मनोज्ञवृत्तं R 10a. प्रयाति BQW 10c. पथ्यासिनं ABCEIOT, मिष्टाशिनं QW

शुक्रेण दृष्टो गवि भूमिपुत्रो
    गोभूहिरण्यैः सहितं प्रसूते ।
नरं निधिग्रामपुरैः समेतं
    सुसंयतं धर्मपरं सदैव ॥११॥
मन्देन दृष्टो बहुमानभाजं
    वृषे विधत्ते क्षितिजो मनुष्यम् ।
सुदीर्घसूत्रं विनयेन हीनं
    प्रेष्यं खलं पापधनं कृतघ्नम् ॥१२॥
नृयुग्मसंस्थः क्षितिजः प्रसूते
    सूर्येण दृष्टः परतर्कके च ।
नरं विहीनं सुतमित्रदारैः
    पराजितं नीचरतं सदुष्टम् ॥१३॥
चन्द्रेण दृष्टः क्षितिजस्तृतीये
    राशौ प्रसूते नृपपूजिताङ्गम् ।
खरोष्ट्रगोवित्तचयेन युक्तं
    प्रभाविनं ब्राह्मणसंमतं च ॥१४॥
बुधेन दृष्टः क्षितिजो नृयुग्मे
    स्थितः प्रियं बन्धुजनस्य नित्यम् ।
स्त्रीभोगशय्यासनयानयुक्तं
    हितं हि सर्वस्य जनस्य नित्यम् ॥१५॥

11d. सुसं यतं I   12b मनुष्यं—13a क्षितिजः om. I   after 12 CET and इति वृषफलं   13b. परतर्कके CEQST, -परार्कके W   13c. सुतदारमित्रैः EQTW   13d सदुष्टं ABCEIORS   15c. °शय्यास…

जीवेन दृष्टो मिथुने दयाढ्यं
    कुजः प्रसूते बहुशास्त्ररक्तम् ।
नरं सदा तीर्थवरप्रसक्तं
    श्रद्धान्वितं शौचसमन्वितं च ॥१६॥
शुक्रेण दृष्टो मिथुने प्रसूते
    भौमः प्रगल्भं सुभगं मनुष्यम् ।
विनीतवेषं परवीतभाजं
    सुसङ्गतं साधुजनस्य नित्यम् ॥१७॥
सौरेण दृष्टः क्षितिजः समीपे
    राशौ तृतीये जनयेन्मनुष्यम् ।
रोगाकुलं छिद्रपरं परेषां
    स्वभावदुष्टं गतसौहृदं च ॥१८॥
कर्काश्रितो भूतनयः प्रसूते
    सूर्येण दृष्टः परसाहसाभम् ।
विहीनवित्तं गुरुरोगभाजं
    सदा विहीनं निजबन्धुवर्गैः ॥१९॥
चन्द्रेण दृष्टो धनधान्ययुक्तं
    भौमः प्रसूते खलु कर्कटस्थः ।
दयासमेतं गतपापमिष्टं
    सर्वस्य लोके विभवेन युक्तम् ॥२०॥

16a. मिथुनोदयस्थो Q, मिथुने दयस्थः W   दयाव्यं R, दयाष्टं B, दयेष्टं S, दयव्यष्टं A, पराष्टं T, परार्षं E   16b. °शास्त्रयुक्तं C   17c. परनात° R, परवित्त° QW   18a. शशिजः QW   after 18 CET add इति (इति भौमस्य C) मिथुनफलं   after 19a ET insert 20b खलु – 20d.   19b. °साढ्यं QSW, °सव्यं R

कर्कस्थितो भूतनयः प्रसूते
बुधेन दृष्टो बहुबुद्धियुक्तम् /
द्विजातियुक्तं प्रवरप्रतापं
नृपप्रसादात् परमप्रहृष्टम् ॥२१॥
जीवेन दृष्टः सह कर्कटस्थो
भौमः प्रसूते सततसौख्ययुक्तम् /
नयप्रसक्तं च सुपूजिताङ्गं
नृपप्रियं साधुजनेन युक्तम् ॥२२॥
शुक्रेण दृष्टः क्षितिजस्तदर्थे
राशौ सुशीलं जनयेन्मनुष्यम् /
प्रियातिथिं वित्तशुभैः समेतं
नानापशुप्राप्तिसुखं च शान्तम् ॥२३॥
कर्कस्थितो भूतनयः प्रसूते
सौरेण दृष्टः पृथुशोकभाजम् /
सुदीर्घरोगं विगतप्रतापं
सदातिदीनं नृपपीडितं च ॥२४॥
स्थितः क्षितीसूनुधरः प्रतापं
सिंहे विदृष्टो दिननायकेन /
विनाशितारिं जनयेन्मनुष्यं
सुवेषविद्याधनधान्ययुक्तम् ॥२५॥

21c-d °प्रतापं नृप° om. S   21d. °प्रभावात् S   °प्रादिष्टं W, °प्रदिष्टं C   22c. नृपप्रशक्तं O   22d. जनप्रियं S   नित्यं W
23c. वित्तपरैः W   23d. °प्राप्तसुखं QRW   24d. सदा च दीनं C   after 24 CET add. इति कर्कफलं   for 25a-c QW have:
सिंहस्थितो भूतनयः प्रसूते
दृष्टप्रतापं दिननायकेन
विनाशितारिं विनयेन युक्तं
24a. क्षितीशो विबुधः ET, क्षितिस्वनुधर C   24b. न दृष्टो C, दृष्टो I   25c. विनाशनारिं ABCEIORST

सिंहस्थितो भूतनयः प्रशस्तं
चन्द्रेण दृष्टः कुरुते मनुष्यम् ।
सुगन्धधूपाम्बरभोज्यभाजं
शास्तानुगं धर्मनयेन युक्तम् ॥२६॥
बुधेन दृष्टः खलु सिंहसंस्थो
भौमः सवाते बहुवादिभाजम् ।
पुष्पाम्बरद्रव्यविलेपनाद्यै-
र्मिष्टान्नपानैः सततं सुपूज्यम् ॥२७॥
?भौमो हरिस्थो गुरुणा च दृष्टो
गुरुप्रसादं जनयेन्मनुष्यम् ।
सुतीर्थयानासनहेमयुक्तं
सखाधिकामं फलदं प्रगल्भम् ॥२८॥
शुक्रेण दृष्टः प्रकरोति भौमो
हरिस्थितस्त्रासकरं परेषाम् ।
शौर्यान्वितं बान्धवमानभाज-
मत्साहयुक्तं रतलालसं च ॥२९॥
दृष्टो ऽर्कपुत्रेण कुजो हरिस्थः
करोति मर्मागदरोगभाजम् ।
सदा मनुष्यं कफवातपित्तैः
संपीडिताङ्गं गुरुलोकहीनम् ॥३०॥

26a. प्रसक्तं C 26c. सुगंधभोगांबर° C °भोजनाद्यं W
26d. शास्त्रानुगं AQSW 28d. सखाधिकं सर्वसहं QW
मनुष्यं BCIQW 29d. रति° CI after 30 CET add इति
सिंहराशिफलं (फलं om. C)

कन्याश्रितो भूतनयः प्रसूते
सूर्येण दृष्टः कुगतिं मनुष्यम् /
कुमित्रसेवासु सदानुरक्तं
विवर्जितं मानधनैः सदैव //३१//
चन्द्रेण दृष्टः क्षितिजः प्रसूते
कन्याश्रितः सत्यपरं मनुष्यम् /
मेधाविनं नित्यमुदारचेष्टं
सुसंस्कृतं भूपतिना च नित्यम् //३२//
बुधेन दृष्टः खलु कन्यराशौ
कुजः प्रसूते सुभगं मतिज्ञम् /
नरं नतं साधुजनद्विजानां
महाप्रतापं जनसौहृदं च //३३//
जीवेन दृष्टः क्षितिजः प्रसूते
नरं प्रसिद्धं नयनाभिरामम् /
मनोज्ञवेषं शुभवर्तिताङ्गं
कन्ये गुरूणां प्रणयं प्रधानम् //३४//
शुक्रेण दृष्टः खलु कन्यकस्थो
भौमः प्रसूते सुतरां प्रसिद्धम् /
कुटुम्बसौख्यान्वितसाधुभाजं
दयान्वितं मातृपितृप्रभक्तम् //३५//

31c. नदा° I   32b. सत्यरतं ET   32c. °मुदारसमेतं QW
32d. सुसंकृतं ICQT, सुसंमतं W   33b. मतिशं B, मनोज्ञं ET
33c. मतं W   33d. महाप्रज्ञान A, महात्यतापं W   34c. मनोज्ञरूपं R   34d. कन्ये BQR   35d–36c om. W
35d. दर्मान्वितं S, दमान्वितं E   मातृयपितृभक्तं C, मातृप्रसक्तं Q

दृष्टो ऽङ्गनायां शनिना च भौमो
नरं प्रसूते विकृतं कुचैलम् /
व्याधिकं कामनिपीडितं च
सदाक्षिरोगैः सहितं नितान्तम् //३६//
तुलाश्रितो भूतनयः प्रसूते
सूर्येण दृष्टः कुरुते ऽतिहानिम् /
विवेकहानिं सुजनैर्वियोगं
वैरं स्वपक्षेण सदा नरस्य //३७//
तुलाश्रितो भूतनयः प्रसूते
चन्द्रेण दृष्टः सुभगं मनुष्यम् /
सुभोगदेहं गतशत्रुपक्षं
सदा हितं देवगुरुद्विजानाम् //३८//
दृष्टस्तुलास्थः शशिजन
भोगान्वितं शीलधनं मनुष्यम् /
प्रदानशीलं प्रभया समेतं
ससंस्कृतं पार्थिवमानवैश्च //३९//
जीवेन दृष्टः क्षितिजस्तुलास्थो
नरं प्रसूते बहुधर्मभाजम् /
द्विजानुकूलं पशुपुत्रयुक्तं
विद्यान्वितं शंसितमेव नित्यम् //४०//

36a. शशिना C 36c अव्याधिकं ABIOS °निपीडितांगं QR 36d. विनीतं S after 36 CET add इति कन्याफलं 37a ऽभिसूते W 37b-38a om. CW', but 37 inserted after 38 in W 37b. ऽक्षिहानिं S 39b. भोगान्वितं] तुलाश्रितः R 40d. शासित° ABEIOQRST, शाश्वत° W जंतुं W'

शुक्रेण दृष्टः कुरुते महीज-
    स्तुलाश्रितः सत्यपरं मनुष्यम् ।
महाधनं दीप्तियुतं प्रगल्भं
    सदा हितं बान्धवसद्द्विजानाम् ॥४१॥
सौरेण दृष्टः क्षितिजस्तुलास्थः
    करोति मर्त्यं बहुपापरक्तम् ।
रोगैः समेतं सततं कुशीलं
    परान्नरक्तं सततं कुचैलम् ॥४२॥
भौमो ऽलिसंस्थः कुरुते मनुष्यं
    सूर्येण दृष्टो बहुरोगयुक्तम् ।
नयेन हीनं बहुयत्नपर्वं
    विरुद्धमेहं विकृताननकारम् ॥४३॥
चन्द्रेण दृष्टो ऽलिगतः प्रसूते
    भौमो ऽतिनीत्या सहितं मनुष्यम् ।
प्रियातिथिं सर्वसमृद्धियुक्तं
    धर्मप्रधानं बहुवल्लभं च ॥४४॥
बुधेन दृष्टः प्रकरोति भौमः
    स्थितो ऽलिराशौ प्रचुरप्रतापम् ।
सुधर्मशीलं बहुतीर्थरक्तं
    विवर्जितं पापजनेन नित्यम् ॥४५॥

41d. °सज्जनानां C after 42 C adds इति तुलफलं, ET add इति तुलायां भौमफलं 43b °रोगभाजं C 43c. after हीनं ABCEIOQRTW add बहुदोष (रोष ET) युक्तं व्ययेन (व्यपेत Q) शीलं 43d om. QW 44b. तिनत्या R, त्निनीत्या ABCIQRW, तिभीत्या S, मि नीत्या ET, हि नीत्या O 44d. बहुव्वालभं C 45b. लिसंस्थः R

नीलेन दृष्टः प्रकरोति भौमः
    सट्टालिसंस्थः स्तोतिभिः समेतम् /
नित्ताक्षधर्मोन्नरतं प्रशान्तं
    सपूजितं बान्धवजनैः सतैव //४६//
शुक्रेण दृष्टो ऽलिगतः प्रसूते
    भौमः स्वरूपं स[illegible]गम् /
शूरं कृतघ्नं धनधान्ययुक्तं
    मेधाविनं सत्त्वप[illegible] [illegible]नरीनम् //४७//
सौरेण दृष्टो ऽलिगतस्तु भौमो
    नरं प्रसूते विज[illegible]समेतम् /
पापानरकं विषयालिगं च
    व्योमेन शीलं सततं कृतघ्नम् //४८//
चापाश्रितो भूतनयः प्रसूते
    सूर्येण दृष्टो ज्वरापित्त[illegible]नम् /
श्लेष्मातिसारातियलं सा[illegible]वं
    गतप्रभावं विनयेन [illegible]नम् //४९//
भौमो हयस्थः शशिना च दृष्टः
    करोति शय्यासन[illegible]स्त्रभा[illegible]नम् /
नरं सुवच्चं बहुशास्त्रकं
    [illegible]ने सत्यपरं प्रधानम् //५०//

46b-46d om. W, which substitutes 45b-45d   46a om. C
46d. सपूजितं A, स्वपूजितं EST   47b. स्वरूपं QW   47d.
सत्यपरं S, सरूपरं B, रूपधरं Q, रूपपरं W   48b. विजया
ABCEIORST   48d. व्ययेन ABCEIOQRTW, नयेन S   after 48
CET add इति वृश्चिकफलं   49b. °मानभाजं B, °पीतभाजं Q,
°ज्ञापभाजं W   50b. सत्यासन° A, सत्यासन° S, सर्पासन° W
    °वस्त्रभाजं T, °वस्त्रलाभं Q, °व --- मानं W   50c.
सुवाच C

चापाश्रितो भूतनयः सवाते
बुधेन दृष्टः सभगं मनुष्यम् /
सुतीर्थैरक्तं नृपकार्यदक्षं
दयापरं सर्वकलासु दक्षम् //५१//
जीवेन दृष्टः क्षितिजो हयस्थो
नरं प्रसूते बहुधा धनाढ्यम् /
सुवर्णरत्नाम्बरसौख्ययुक्तं
विहीनशत्रुं प्रमदाप्रियं च //५२//
शुक्रेण दृष्टः क्षितिजो हयस्थो
नरं सवाते विनयप्रधानम् /
सदा विनीतं हययानयुक्तं
विभूषितं पार्थिवभूषणेन //५३//
सौरेण दृष्टः क्षितिजो हयस्थ
करोति पापाकुलमेव नित्यम् /
शरोर्तिदोषाकुलितं नृशंसं
निपीडितं मानसजैश्च दुःखैः //५४//
भौमो मृगस्थो रविणा च दृष्टो
नरं सवाते विकृतं कृतघ्नम् /
[illegible] बन्धुवधाभितप्तं
विदेशभाजं प्रभया विहीनम् //५५//

51a प्रसूते Q 51c. सतीर्थयुक्तं R 51d. °कलाप्रवीणं Q 52b. सवाते W बहुना ABCEIORST, बहुवां° Q, न बहु° W धनवाढ्यं Q, °धनाद्यं A, °धनाप्यं ET 53c. विहीनं QW 54c °रोषा° ET, °रोगा° QW, °शोषा° R, °सेवा° ABIOS सनृस्सं T, सनृणं AEIS, सनृणां O, सनृत्नं B, सतृष्णं R, सदैव C 54d. मानशनैश्च CEIRT, मानुसतैश्च O, माशनैश्च AB, प्राशनैश्च S, संजैश्च Q after 54 CET add धनफल भौमस्य (भौमस्य om. C)

भौमो मृगस्थः शशिना च दृष्टः
करोति सौम्यं रतिसौख्यपुष्टम् /
विनीतवेषं प्रचुरान्नपानं
नराधिपाद्यैः सहितं सगर्वम् //५६//
बुधेन दृष्टो मकरे विलीन
करोति नित्यं विनयप्रधानम् /
नरं कृतघ्नं निरुजं निधान
पराक्रमाप्तैः सुधनैः समेतम् //५७//
करोति भौमः खलु जीवदृष्टो
मृगाश्रितः पुण्यधनैर्मनुष्यम् /
प्रसह्यमाकर्षणलब्धलाभं
हतप्रतापं नियमैः समेतम् //५८//
शुक्रेण दृष्टो मृगगो ऽपि भौमः
करोति भोगैः सततं समेतम् /
मित्रानुरक्तं कृषिकर्मदक्षं
प्रजानुकूलं भयवर्जितं च //५९//
भौमो मृगस्थः शनिना च दृष्टो
नरं स्वाते बहुसारमेव /
मित्रैर्विहीनं बहुशोकयुक्तं
सदा नितान्तं परमवज्ञानाम् //६०//

56b. °पुष्टि ET, °मत्रं W 56d. नराधिपाद्यैः BR सगर्व ABCEIORT 57a. विलीय: ABCEIOSTW, तु वीक्ष्य: R 57b-d om. I 57b. विनयं प्रधानं R 57c. कृतघ्नं S 58b. पण्यधनं QRW 58d. तीक्ष्णप्रतापं S 60a. शशिना W 60b. बहुसारमेव] ° सरमेव ABIOR, सुरमेव S, नितरां सुदुष्टं Q, नितरां समष्टं W 60d. °ज्ञानां T, °भाजं QW after 60 C adds इति मकरफलं, ET add इति कुम्भफलं .

भौमो घटस्थो रविणा च दृष्टः
    करोति मर्त्यं सकलप्रभावम् /
व्यपेतलज्जं सतबन्धुहीनं
    कृष्याधिकं मोहदवर्जितं च //६१//
चन्द्रेण दृष्टः क्षितिजो घटस्थो
    नरं सवाते बहुसभ्यजं च /
द्विजातितीर्थामरभक्तियुक्तं
    नयाधिकं कामफलैः समेतम् //६२//
बुधेन दृष्टो घटसंस्थभौमो
    नयेन युक्तं जनयेन्मनुष्यम् /
प्रियातिथिं पार्थिवलब्धमानं
    सदा सुशीलं बहुधर्मभाजम् //६३//
जीवेन दृष्टो घटगोऽथ वक्रः
    दानं विवेकं च विवेकभाजम् /
नरं धनाढ्यं बहुधर्मयुक्तं
    गतारिपवं सुरविप्रभक्तम् //६४//
शुक्रेण दृष्टो घटगश्च भौमः
    . . . . /
. . . .
    . . . . //६५//

61c. व्ययेन ABCEIORST मज्जं S 61d. नृपाधिकं S 62b. °सत्यजं च QW, °सत्यजंतं ET, °सत्यभाजं C, °संमतं च S 62d. नवाधिकं W मफलैः A, प्र--फलैः S 63a. घटजस्य° AORST, घजस्य E, घटस्य° QW 63b. भयेन R, न ET 64-65 om. QW 64a घटजो ABCEIORT, घटतो S प्य IO युक्त B, यक्त I, वक्त्रः O after 64a ABCEIORST add करोति भौमो ऽथ घटस्थितो वा 64c-65 om. ET 65b-d om. ABCIORS

सौरेण दृष्टः क्षितिजो घटस्थः
करोति नानाविधदुःखभाजम् /
हृतप्रतापं स्वजनैः समेतं
प्रियातिथिं ब्राह्मणवल्लभं च //६६//
मीनस्थितो भूतनयो ऽर्कदृष्टः
करोति नित्यं कलहैः समेतम् /
नरं सदीनं वयसा समेतं
कृशं विवर्णं नृपपीडितं च //६७//
चन्द्रेण दृष्टो झषगो ऽथ भौमो
नरं सवाते वरयानभाजम् /
अनुष्णदाहुर्यं वनितास्वभीष्टं
जितेन्द्रियं भोगसमन्वितं च //६८//
बुधेन दृष्टः प्रकरोति भौमो
झषस्थितः शौचपरं मनुष्यम् /
वापीतडागामरजेष्टकं
हितं स्ववचो पैरवर्जितं च //६९//
जीवेन दृष्टः कुरुते न भौमो
झषाश्रितो वृद्धिविवर्धनं च /
प्रलोचनैर्दृ शुभ्रवस्त्रभाजं
भोगाधिकं पुण्यविवृद्धिभाजम् //७०//

66c. हृतप्रताप C, हृतप्रताप Q, हृतप्रतापं ICR after 66 C adds कुंभफलं, ET add इति कुंभस्थितभौमफलं
67c. व्ययसा ABCEIORT, यशसा S 67d. चवर्णं CET
68a. सशगो B, तिमिगो QW 68b. सयातं C वरजान° I, वरयार° QW 69b. सशस्थित B, शसस्थित Q, ससंस्थितः W*
69c. पापातटागामर° ABIORS, चापीतटागामर° ET °जेष्टरकं BCIO, °तेष्टरकं AEST, °वेष्टरकं R 70a. कुरुते ज Q, प्रकरोति S 70b वृद्धिनिशारदं R 70d. भोगाधिपं R पुण्यविवर्द्धि° BCEIT, पुण्यविवर्द्धि° QW °मानं W

* 69c-d om. QW

शुक्रेण दृष्टः क्षितिजो झषस्थो
    नरं सवाते बहुसौख्ययुक्तम् /
चित्रं सरूपं गलितारिपक्षं
    सदा विनीतं नृपतेरभीष्टम् //७१//
सौरेण दृष्टो बहुमन्दभाजं
    मीनाश्रितो भूतनयः प्रसूते /
सदातुरं शाकपरं कृतघ्नं
    सदीर्घसूत्रं व्यसनैः समेतम् //७२//
इति श्रीवृद्धयवने भौमदर्शनचारः //

71c स्वरूपं ABCEIOQRSTW गबितारि° R, विगतारि° S
col. इति वृद्धयवनभाषाटीकायां सगहीजीश्रीमोहनदासजी-
कारितायां भौमदर्शनचाराध्याय Q col. श्री° om. ABIORS
°यवनजातके ET °चाराध्यायः W

मेषं गतो ज्ञो रविणा च दृष्टः
    करोति मर्त्यं कृपणस्वभावम् /
दुष्टाश्रयं बन्धुजनेन युक्तं
    भयाकुलं नित्यमुदारदुःखम् //१//
बुधो ऽजसंस्थः शशिना च दृष्टः
    करोति मर्त्यं सुजनं सुचित्रम् /
शास्त्रान्तरज्ञं कृषिकर्मदक्षं
    सुरद्विजानां प्रणतं सदैव //२//
भौमेन दृष्टः शशिजो ऽजसंस्थो
    दुर्वाग्विकारैः कुरुते प्रपीडाम् /
नरं तथा सर्वजनैर्विमुक्तं
    पराजितं वैरिभिरेव नित्यम् //३//
जीवेन दृष्टो ऽजगतस्तु सौम्यो
    नरं विधत्ते ऽतिधनप्रगल्भम् /
हितं द्विजानां सततं कृतज्ञं
    नयान्वितं पार्थिवपूजितं च //४//
शुक्रेण दृष्टः प्रकरोति सौम्यो
    मेषाश्रितो यानधनैः समेतम् /
नरं महाधान्यहयैः समेतं
    विमुक्तपापं बहुधर्मयुक्तम् //५//

1c. मुक्तं R   2b. सुचित्तं IO   2c. °कर्मरक्तं ET   3b. सपीडां R
3d. तिसं A, तिस्त्वं ET   4b. विधानं W   4c. हितं हितानां ET
4d. नयाचिनं ET   5b. मेषस्थितो धान्यधनैः W   5c.
महापापभयैः W

सौरेण दृष्टः शशिजः प्रसूते
मेषाश्रितः कीर्तिविवर्जितं च /
प्रभूतरोगं गतसौख्यमिष्टं
प्रपीडितं चौरनरेश्वराद्यैः ॥६॥
वृषस्थितः सोमसुतो ऽर्कदृष्टो
नरं प्रसूते वनजैः समेतम् /
बह्वोगदोषिप्रभवैश्च रोगैः
संपीडितं धान्यकलत्रहीनम् ॥७॥
बुधो वृषस्थः शशिना च दृष्टः
करोति मर्त्यं प्रथितं नृलोके /
सत्याधिकं सौख्यविवेकयुक्तं
क्रियाधिकं पुण्यविधौ प्रगल्भम् ॥८॥
भौमेन दृष्टः शशिजो वृषस्थो
नरं प्रसूते विकृतस्वभावम् /
प्रभूतवैरं व्यसनाभिभूतं
पाषण्डिभिः सङ्गतमेव नित्यम् ॥९॥
वृषाश्रितः सोमसुतः प्रसूते
जीवेन दृष्टः क्षितिवस्त्रभाजम् /
देवातिथिश्रेष्ठजनानुरक्तं
स्वधर्ममुख्यं प्रणतं प्रजानाम् ॥१०॥

6b. °विवर्जितांगं R   6c. प्रसूतरोगं R   after 6 C adds इति मेषस्थबुधफलं, ET add इति बुधमेषफलं
7a. वृषाश्रितः R   सौम्यसुतो ET   7b. वनिजां R, वनिजा ABCEIOST
7d. धामकलत्र° S   8c. °विवेकमुक्तं Q   9c. प्रसूतवैरं R
9d. पाखंडिनैः संगति° ABCEIORST   10a. वृषस्थितः W   10b. °वस्त्रलाभं QW   10d. स्ववर्गमुख्यं R   जनानां S

शक्रेण दृष्टः प्रणतारिपक्षं
 नरं प्रसूते शशिजो वृषस्थः /
नरेन्द्रपूज्यं विबुधैः समेतं
 प्रधानकर्माणमभीष्टलाभम् //११//
सौरेण दृष्टः शशिजः प्रसूते
 वृषं गतः पापधनं मनुष्यम् /
सतीर्थयानासनवस्त्रलाभै-
 र्विवर्जितं नीचजनप्रसेव्यम् //१२//
सूर्येण दृष्टो मिथुने च सौ
 नरं सवाते सुतविप्रयुक्तम् /
कुचैलदेहं विकृतानुकारं
 विवर्जितं सत्यधनेन नित्यम् //१३//
चन्द्रेण दृष्टः शशिजो नृ
 करोति नानाविधलाभभाजनम् /
नितान्तसौख्यैः सहितं प्रगल्भं
 तीर्थानुरक्तं सुभगं मनोज्ञम् //१४//
भौमेन दृष्टो मिथुने बुधस्तु
 प्रियं प्रसूते नृपसज्जनानाम् /
नरं परैर्वर्जितमिष्टधर्मं
 सुरक्षितं बन्धुजनैः सदैव //१५//

11c. विविधैः W, विभवैः R 11d. °मनिष्टलाभं RW 12b. पापरतं C after 12 CET add इति वृषफलं 13a. सौम्यो – 13d सत्यधने om. I 13a. सच GW 13b. °विप्रभुक्तं ACORS 13d. नित्यं] युक्तं ABCEICST 15c. धरै° A, धरै° S

जीवेन दृष्टो मिथुने नु सौम्यः
करोति नानाविधमप्रगल्भम् ।
कलत्रपुत्राप्तिसुखं सुरूपं
प्रियंवदं दानविचक्षणं च ॥१६॥
शुक्रेण दृष्टो मिथुने प्रसूते
बुधो विवाहार्थपरं मनुष्यम् ।
स्त्रीवल्लभं भूतियशो——पभाजं
प्रसन्नचित्तं द्विजवल्लभं च ॥१७॥
सौरेण दृष्टः शशिजो विधत्ते
दुःखस्त्रपीडासहितं नृयुग्मे ।
नरं प्रशंसार्थविवेकहीनं
कृतघ्नमिष्टैः परिवर्जितं च ॥१८॥
कर्काश्रितः सोमसुतोऽर्कदृष्टो
नरं प्रसूते व्यसनाभिभूतम् ।
अधर्मचेष्टं विकृतस्वभावं
मदातिगं दुःकृतसेवनेन ॥१९॥
कर्काश्रितः सोमसुतो विधत्ते
चन्द्रेण दृष्टः सुतदारयुक्तम् ।
स्त्रीणामभीष्टं सुरतानुरक्तं
प्रसन्नचित्तं गतसाध्वसं च ॥२०॥

16b. नानाविध स्सौख्ययुक्तं QW   E ends with °मप्रग°   16c. °पुत्रामरसत्वं QW   स्वरूपं BCIQW   17c. भूतिपयोपभाजं BI, भूतियशोवमानं T, भूमिपयोषभाजं QW, भूरियशः स्वभावं C   18c. प्रशंसादि° ABCIRS   18d. °मिष्टे ABCIOQR   after 18 CT add इति मिथुनफलं   19 om. S.   19a. कर्णाश्रितो B   19d. मंदातिगं CT, मंदातिकं Q   °सेवनेयः W   20c. °मनिष्टं W   सुरतादनुरक्तं R   20d. गतसाहसं T

कर्कास्थित: सोमसुतो विधत्ते
भौमेन दृष्ट: परदाररक्तम् ।
मलस्वभावं विपरीतचेष्टं
पराश्रुतं देवगुरुद्विजानाम् ॥२१॥
जीवेन दृष्ट: शशिजो विधत्ते
कर्कास्थित: पुण्यपरं मनुष्यम् ।
मनुष्यदाराद्विजभोजनाढ्यं
सुपूजितं साधुजनेन नित्यम् ॥२२॥
शुक्रेण दृष्ट: शशिज: प्रसूते
कर्कास्थितो वाजिभनाम्बराढ्यम् ।
स्त्रीपुत्रवस्त्रप्रणयेन युक्तं
सुसंस्कृतं पार्थिवसाधुलोकै: ॥२३॥
सौरेण दृष्ट: शशिजस्तु कर्के
दारिद्र्यनिद्रालससेवितांगम् ।
उत्साहहीनं बहुछिद्रयुक्तं
विवर्जितं मानधनै: सदैव ॥२४॥
सिंहस्थित: सोमसुतो विधत्ते
सूर्येण दृष्ट: कृपणस्वभावम् ।
सुदीर्घयुक्तं गुरुरोगयुक्तं
विनाकृतं सत्यदमव्रतैश्च ॥२५॥

21b. सोमेन I °दाररक: ACOT, °दासक B 22b-23a om. W
22c मनुष्यदाढ्यं द्विजभोजनाढ्यं Q 23b. कर्कस्थितो R
23d सुसन्कृतं Q, ससन्कृतं R 24c. उत्साहनीतं ABIORS after 24
CT add इति कर्कफलं 25b. कृपिशास्वभावं R
25c. सदीर्घसूत्रं Q गुरुरोगयुक्तं om. I,
गुरुरोगभाजं C 25d. सत्यदया° Q

चन्द्रेण दृष्टः शशिजश्च सिंहे
करोति मर्त्यं गुणगौरवाढ्यम् /
सुतीर्थसौम्यामललब्धसूक्तं
विशुद्धबुद्धिं सततं नयज्ञम् //२६//
भौमेन दृष्टः खलु सिंहसंस्थो
बुधो विधत्ते बहुशोकभाजम् /
विधर्मिकापामर्वविपीडिताङ्गं
सदातुरं पुण्यधनैर्विहीनम् //२७//
जीवेन दृष्टः खलु सिंहसंस्थः
करोति सौम्यः सुतदासभाजम् /
सुधामसत्यं प्रभया समेतं
नतं नरैः सर्वसुखैः समेतम् //२८//
शुक्रेण दृष्टः प्रणतं सुराणां
बुधो विधत्ते खलु सिंहराशौ /
बुद्ध्यान्वितं शीलधनं सुरूपं
व्यपेतदुःखं गतसाध्वसं च //२९//
सौरेण दृष्टः शशिजो हरिस्थः
करोति मर्त्यं कृपणं सदीनम् /
व्ययाधिकं कामसुतं विशीलं
त्यक्तं नयेनार्थविवर्जितं च //३०//

26a. शशिजस्य C, शशिजस्त T 26c. सुतीक्ष्णसौम्यं Q 27b-28a om. BQW 27c °मार्मयपीडितांगं ACIOST 28b. सुतदा° QW 28d. नुतं नरैः R, नूनं नरैः C, नरं नतैः W, नरं रतं Q, (28c. सुधर्मसत्यं W) नरैः I after 28 W adds:
जीवेन दृष्टः खलु सिं.
करोति सौम्यो बहुलप्रतापम् /
धनं च लाभं स्वजनेन दृष्टं
करोति लाभं बहुपुत्रतां च //
29c. सरूपं BIQ, स्वरूपं W 29d. गतसाहसं T 30b. सदीनं BIW
30c. व्ययाधिकं OR कामपरं Q after 30 CT add इति (om. C) सिंहफलं

कन्याश्रितः सोमसुतो विधत्ते
सूर्येण दृष्टः प्रभया विहीनम् /
सेवातुरं केशयुतैः कुभृत्यै-
र्विरक्तमोरं सततं सदुःखम् //३१//
चन्द्रेण दृष्टः शशिजो विधत्ते
कन्याश्रितः सत्यपरं मनुष्यम् /
देवानुरक्तं सकलैर्वियुक्तं
प्रभूतमित्रं नृपवल्लभं च //३२//
भौमेन दृष्टः खलु कन्यकस्थो
नरं विधत्ते सरुजं च सौम्यः /
कोपाधिकं कामसुतप्तदेहं
भयान्वितं बीभितमाकुलं च //३३//
जीवेन दृष्टः प्रकरोति सौम्यो
नरं सुशीलं सततं गतारिम् /
प्रभूतसौख्यं प्रणतारिपक्षं
नितान्तमोजःसहितं प्रगल्भम् //३४//
शुक्रेण दृष्टः खलु कन्यकस्थो
बुधो विधत्ते बहुधर्मभाजम् /
विधानी[illegible]पशुपुत्रयुक्तं
सुसत्कृतं साधुजनेन नित्यम् //३५//

31c. केशसुतं Q, लोशसुतैः AS कुभृत्यं Q 31d. सदुःखं BCIQ, स दुःखं W 32c. दवासुरक्तं W सकला° R °विमुक्तं C 33c कोपगोधकं AS कामसंतान° W, कामसुतं स° T 35d. शास्त्रंगतं ABIORS, शास्त्रांकतं QW

मन्देन दृष्टः शशिजः समन्दं
    कन्याश्रितः संजनयेन्मनुष्यम् /
परकपेष्टं गतधर्मसौख्यं
    भयाधिकं पापमतिं सदैव ॥३६॥
तुलाश्रितः सोमसुतो विभक्ते
    सूर्येण दृष्टः प्रभया विहीनम् /
प्रभूतदुःखं व्यसनैः समेतं
    कामातुरं निन्द्यतमं नृलोके ॥३७॥
चन्द्रेण दृष्टः शशिजः प्रसूते
    तुलाश्रितः सत्यधनं मनुष्यम् /
प्रियातिथिं देवगुरुप्रसक्तं
    नयाधिकं ब्राह्मणसंमतं च ॥३८॥
भौमेन दृष्टः शशिजः प्रसूते
    तुलाश्रितः पापरतं मनुष्यम् /
विषादभाजं गतसाधुभाजं
    महाव्ययं साधुविवर्जितं च ॥३९॥
जीवेन दृष्टः शशिजः प्रसूते
    तुलाश्रितः सत्यपरं मनुष्यम् /
नापैर्न युक्तं सुतसौख्यभाजं
    नयप्रधानं बहुसंश्रितं च ॥४०॥

36a. समंदे BCIQRT, समांदे AS   after 36 CT add इति (om. C) कन्याफलं   37c. प्रसूतदुःखं O   37d. निंद्यितमं Q, निंद्यमतिं W, निंदितमं ABIORS, निंदितमा CT   त्रिलोके O   38d. °संयुतं T   39a-b placed after 39d in T   39b. समरतं T   39c-d om. S   39c. विद्यादभाजं BW   गतसाधुभाजं om. A, गतसाधुयुक्तं R   40c. नापेन ABCIOQRSTW   मुक्तं Q   40d. °संश्रुतं ABCIQST, °संस्तुतं R, °संमतं W

शुक्रेण दृष्टः सविवेकयुक्तं
करोति सौम्यस्तुलगो मनुष्यम् ।
धनुष्मदाढ्यं सुतवित्तयुक्तं
गुणानुरक्तं प्रियबान्धवं च ॥४१॥

सौरेण दृष्टः शशिजः प्रसूते
नरं नितान्तं कलहेन युक्तम् ।
तुलाश्रितः कृत्रिमधर्मभाजं
पाषण्डसङ्गानुरतं सदैव ॥४२॥

बुधोऽलिसंस्थो रविणा च दृष्टो
नरं प्रसूते सुखवित्तहीनम् ।
सुतीव्रशोकं गतमानभोगं
प्रभूतवैरं प्रियसाहसं च ॥४३॥

चन्द्रेण दृष्टोऽलिगतः प्रसूते
बुधो नरं बुद्धिविवेकयुक्तम् ।
सुरद्विजानां प्रणतं प्रगल्भं
सदाश्रुतं मानधनं नयज्ञम् ॥४४॥

भौमेन दृष्टोऽलिगतः प्रसूते
बुधो नरं बुद्धिविवेकहीनम् ।
सदातुरं साधुजनप्रमुक्तं
भयाकुलं निन्दितमानसत्त्वम् ॥४५॥

41d च om. A 42c. कृतमधर्म° T 42d. पाषंडि° R after 42 CT add इति (om. C) तुलाफलं 43b. सुतवित्त° W °लीनं S 44d. सदासुतं ABCIOQRSTW 45b. °विवेकयुक्तं W 45c. °प्रयुक्तं ABCORST, °प्रियुक्तं W (45c. °नप्रमुक्तं – 46b. अलि° om. I) 45d. नंदित° ABOSW, तादित° T °मान्यसत्त्वं ABRST, °मान्यसत्यं O, °मेव नित्यं Q

जीवेन दृष्टः खलु सोमपुत्रो
नरं प्रसूते ऽलिगतः सुविक्रम् /
विपश्चितं नीतिपरं प्रधानं
सुतार्थयुक्तं सततं सुशीलम् //४६//
शुक्रेण दृष्टो ऽलिगतो बुधस्तु
नरं प्रसूते ऽतिधनैः समृद्धम् /
प्रसन्नचित्तं प्रणतं गतारिं
प्रियातिथिं प्रस्तुतमिष्टधर्मम् //४७//
सौरेण दृष्टो ऽलिगतः प्रसूते
बुधो प्रवृद्धं शुभदं मनुष्यम् /
कुकर्मरक्तं मुनिना विरक्तं
महाप्रतापं प्रणतं रिपूणाम् //४८//
सूर्येण दृष्टः शशिजः प्रसूते
स्वाश्रितः क्लेशविधर्मयुक्तम् /
नरं कुमित्रैः सहितं गतारिं
विहीनकोशं व्ययसंयुतं च //४९//
चन्द्रेण दृष्टो हयगः प्रसूते
बुधः प्रसन्नं सधनं मनुष्यम् /
सुधर्मयुक्तं कृतसाधुसङ्गं
सदानुरक्तं पतिसज्जनानाम् //५०//

46a. भौमेन R 46d. सुतीर्थ° OQSW 47a. दृष्टो] युक्तो Q 47b. निधनं R समृद्धिं ACOT 48b. वृद्धि° W प्रवृद्धि C सुभगं C 48c–d put after 50b in C 48c. मुणिना ABIOR, मणिना T, गुणिना S, गणिना C 48d. प्रणता° CIOTW °रिपुण्यं W after 48 CT add इति (om. C) वृश्चिकस्थं 49a. सहजः R 49b. °मुक्तं C after 49b C adds उक्तं C मीनोद 49c. गताद्यं R 50d. यति° S

भौमेन दृष्टो ह्यगः प्रसूते
बुधो धनाढ्यं प्रथितं मनुष्यम् /
हितं स्ववर्गे प्रवरप्रतापं
विद्यानुरक्तं भयवर्जितं च //५१//
जीवेन दृष्टो ह्यगः प्रसूते
बुधः प्रभूतार्थनयेन युक्तम् /
नरं सुवर्णाम्बररत्नभाजं
जितेन्द्रियं स्नानपरं सदैव //५२//
शुक्रेण दृष्टो ह्यगः प्रसूते
बुधो ऽतिमान्यं नृपमानभाजम् /
नरं विधिज्ञं प्रणतारिपक्षं
सुसंमतं देवगुरुद्विजानाम् //५३//
सौरेण दृष्टः शशिजो ह्यसौ
गतप्रभावं जनयेन्मनुष्यम् /
परान्नरक्तं बहुदानभाजं
प्रज्ञाविहीनं गतबान्धवं च //५४//
मृगाश्रितः सोमसुतो ऽर्कदृष्टः
करोति मर्त्यं प्रभुदुःखभाजम् /
व्यपेतशीलं सततं कृतघ्नं
विवर्जितं सत्यदयान[illegible] //५५//

51a °गो ऽभिसुते W   53b तिमा[illegible] IW, तिमन्यं R, भिमान्यं Q
53c. प्रणतारिभाजं S   53d. [illegible] गत S   54c °दानभागं B,
°द्दानभावं R   54d. प्रजाविहीनं Q, विद्याविहीनं W   after
54 CT add धनफलं   55[illegible]. बहुद[illegible]°CQ   55d. सत्यदयं IOST,
सत्यधनं AB

बुधो मृगस्थः शशिना च दृष्टः
करोति मर्त्यं सुखसंप्रगल्भम् ।
क्रियातिथिं तीर्थकथान्तरज्ञं
प्रशान्तचित्तं विनयेन युक्तम् ॥५६॥
भौमेन दृष्टो मृगगः प्रसूते
सौम्यो न सौम्यं शास्त्रवित्तहीनम् ।
सुगुह्यरोगार्दितमेव नित्यं
क्रियाविहीनं भयसंयुतं च ॥५७॥
जीवेन दृष्टो मृगगो बुधश्च
नरं प्रसूते बहुपुत्रयुक्तम् ।
सन्तुष्टचित्तं व्यसनेन हीनं
नृपप्रियं बन्धुहितं सदैव ॥५८॥
शुक्रेण दृष्टो मकरे बुधस्तु
करोति मर्त्यं विजितारिपक्षम् ।
जितेन्द्रियं वृत्तिकरं द्विजानां
सदानुकूलं विभवैः समेतम् ॥५९॥
सौरेण दृष्टः प्रकरोति सौम्यो
मृगाश्रितः पापरतं मनुष्यम् ।
शिरोऽक्षिरोगैः सहितं सुदुष्टं
विहीनवित्तं भयसंयुतं च ॥६०॥

56b. सुखसंयुतं च Q 57b. सौम्येन सौम्यं CR 57c. सगुह्य° T, स्वगुह्य° S, भगुह्य° B 58d. नृपपरं Q बंधुविवर्जितं च W 59c. वृत्तिकरं T 60a. दृष्टः om. C 60b. पापपरं R 60c. शिरोर्तिरोगैः W सदुष्टं CIOR 60d. विहीनचित्तं CT after 60 C adds मकरफलं

घटाश्रितः सोमसुतो ऽर्कदृष्टः
    करोति मर्त्यं बहुनीचरक्तम् /
क्रिया विहीनं सुजनैर्वियुक्तं
    विवर्जितं पुण्यसुखेन नित्यम् //६१//
घटाश्रितः सोमसुतः प्रदृष्ट-
    श्चन्द्रेण धत्ते सुभगं मनुष्यम् /
सुरद्विजं पुण्यधनैः समेतं
    नयानुरक्तं प्रवरं सदारम् //६२//
भौमेन दृष्टो घटगः प्रसूते
    बुधः सुबुद्धिं च सुखार्थहीनम् /
सदारुजं क्रूरमतिं मनुष्यं
    संपीडितं श्लेष्मकृतैर्विकारैः //६३//
जीवेन दृष्टः शशिजः प्रसूते
    घटाश्रितः श्रीसहितं मनुष्यम् /
स्त्रीणामभीष्टं सुरतानुरक्तं
    धर्माश्रितं शास्त्रसलालसं च //६४//
शुक्रेण दृष्टः शशिजः प्रसूते
    नरं प्रशान्तं परमप्रभावम् /
नरेन्द्रपूज्यं प्रणतं द्विजानां
    सुश्लाघितं वन्दिजनेन नित्यम् //६५//

61b. •नीचसक्तं Q   61c. सुजनै° — 62b. धत्ते om. I   61c. स्वजनै° W   •विमुक्तं CI   61d. पुण्यसुखेश T, पुण्यसुतेन ABOQRSW   62a. प्रदिष्ट° O   62c. सुरद्विजं Q   62d. नयेन रक्तं S, दयानुरक्तं W   प्रचुरं Q   सुदारैः W, सदात्तं R   63b. सुबुद्धिं च om. BW, सुबुद्धिश्च ACIORST   बुधो सुखार्थैर्विहृतं मनुष्यं Q   63c सदातुर° Q   64b. स्त्रीसहितं Q   64c. °मतीक्ष्णं ABCICRSTW   सुरतानुसक्तं W   64d. धर्मामृतं BIQW, धर्माभृतं R   •सुलाभसं O   65a. शशिजः] सविता R   65c. नरेंद्रपूज्ञा BCIORW, नरेंद्रपू A   65d. सुश्लादितं R, सुभ्माधितं S, सुष्टाधितं T, सुशाद्वितं Q, स्वभ्माधितं A   बाह्यजनेन W

मन्देन दृष्टः शशिजो घटस्थः
करोति मर्त्यं बहुमन्दभाजम् ।
प्रभूतदुःखं धनधान्यहीनं
पराङ्मुखं देवगुरुद्विजानाम् ॥६६॥
सूर्येण दृष्टो झषगो बुधस्तु
करोति मर्त्यं विकृतस्वभावम् ।
अतीव पित्तज्वरवातरोगैः
संपीडिताङ्गं प्रभया विहीनम् ॥६७॥
चन्द्रेण दृष्टः प्रकरोति सौम्यो
मीनाश्रितः सत्यपरं मनुष्यम् ।
सुबन्धुपूजासुरकार्यदक्षं
दयान्वितं प्रीतिकरं जनानाम् ॥६८॥
भौमेन दृष्टो झषगस्तु सौम्यः
करोति नानाविधरोगभाजम् ।
विहीनवर्णं कफरक्तरोगैः
संपीडितं मानविवर्जितं च ॥६९॥
देवेज्यदृष्टः शशिजः प्रसूते
मीनाश्रितः सर्वकलासु दक्षम् ।
नरं सुपुष्याश्रितमिष्टचित्तं
सदानुरक्तं नृपबान्धवानाम् ॥७०॥

66b. °मंदभाग्यं W after 66 C adds कुंभफलं 67a. दृष्टो om. S
शषिगो B 67c. नीतं त्वनातज्वर° AS, नीतं त्वनीतज्वर° BIO,
नीतं नित्वतं ज्वर° R, नित्यं विनीतं ज्वर° W, आगंतुकैवाज्वर° Q,
अतीव मित्रज्वर° T 68c. °पूज्ञांतुरं A 68d. दध्यांवितं R
द्विज्ञानां Q 69a. मध्यगस्तु B 69b. नानाधिकरोगभाज्ञं ABIR
69c. कफपित्तरोगैः C, कफवातरोगैः W 70c सुपुष्यास्तित° ABISW,
सुपुष्यास्तत° R, सुपुष्यास्मित° O, सुपुष्याधिक° Q °मितचित्तं BIW
70d सदा सुरक्तं ABCIOR

—————————— ॥७१॥

सौरेण दृष्टः शशिजो झषस्थः
    करोति संपीडितमग्नरोगैः ।
शिरोक्षिहस्तांघ्रिरुजाविकारैः
    संपीडितं नष्टधनं विरूपम् ॥७२॥
इति श्रीवृद्धयवने बुधदर्शनचारः ॥

71 om. ABIOQRST, C provides:
सौम्यो झषस्थो भृगुजेन दृष्टो
    नरं सुवाते विनयार्थयुक्तम् ।
सुरप्रियं संयमभावयुक्तं
    सदा स्थितं साधुजनप्रसंगात् ॥
W provides:
शुक्रेण दृष्टो यदि मीनसंस्थः
    करोति पुंसां धनधान्यलाभम् ।
मीनस्थितो भूपतिबंधनं च
    करोति पुंसां गजवाजिलाभम् ॥
72c. °हस्तांह्रिरुजा° C, °हणांघ्रिरुजा° T, °हस्ताहरुजा° ABIORSW, °हस्तांह्रिभावै° Q   col. इति श्रीवृद्धयवनभाषाटीकायां संगहीजीश्रीमोहनदासजीकारितायां बुधदर्शनचाराध्याय Q
col. श्री° om. ABIORST

मेषं गतो देवगुरुः प्रसूते
सूर्येण दृष्टः पशुपुत्रहीनम् /
नरं भयार्तं घृणया विहीनं
विवर्जितं सत्यसुखेन नित्यम् ॥१॥
जीवो ऽजसंस्थः शशिना च दृष्टः
करोति कान्तान्वितमिष्टधर्मम् /
नरं प्रगल्भं बहुशास्त्ररक्तं
नृपप्रसादैः सहितं सदैव ॥२॥
मेषं गतो देवगुरुः प्रसूते
भौमेन दृष्टो बहुशोकयुक्तम् /
नरं धनैर्वर्जितमिष्टपापे
पाषण्डिनां भक्तमनल्पदुःखम् ॥३॥
सौम्येन दृष्टो ऽजगतः सुरेज्यो
नरं प्रसूते सुतदारसौख्यैः /
समृद्धमन्तं गतशोकमोहं
हितं स्ववर्गे घृणया समेतम् ॥४॥
शुक्रेण दृष्टः प्रकरोति जीवो
मेषाश्रितः पुण्यधनैर्विहीनम् /
प्रणष्टदारं गतबन्धुवर्गं
प्रणष्टमेधावनिनाथचौरैः ॥५॥

1c. वृणया R 3b. भयशोक° R 3c. °मिष्टपानं Q 3d. पाखंडिनं ABCIOQRSTW 4b. °सौख्यं W 4d. हृतं IOQTW 5d. प्रणष्टचित्तं विनयार्थचौरैः CT, 5d. प्रनष्टवेधाननि° ABIORS, प्रनष्टवेधो ऽवनि° W (प्रनष्टमेधां प्रसरं च चौरे Q) °चौरं O

मेषाश्रितो देवगुरुर्विधत्ते
 सौरेण दृष्टो बहुधान्ययुक्तम् /
विद्याधनं पुत्रयुतं कृशाङ्गं
 स्त्रीलंपटं पानरतं नरं च //६//
वृषाश्रितो देवगुरुः प्रसूते
 सूर्येण दृष्टो विधनं मनुष्यम् /
क्रियाविहीनं कुजनानुरक्तं
 कुमित्रभाजं कुधनाकुलं च //७//
वृषाश्रितो देवगुरुः प्रसूते
 चन्द्रेण दृष्टः सुरकर्मदक्षम् /
नरं नयज्ञं सुधनेन युक्तं
 विवर्जितं रोगभरं सदैव //८//
भौमेन दृष्टो वृषगः सुरेज्यः
 करोति भीतं कृपणं मनुष्यम् /
बहुप्रमादं नियमैर्विहीनं
 सदा भृतं ज्ञातिविवर्जितं च //९//
बुधेन दृष्टो वृषगः सुरेज्यः
 करोति मर्त्यं सुतसौ
विद्यासमेतं नियमप्रसक्तं
 नितान्तमुत्कृष्टधनैः समेतम् //१०//

6 om. BQR, suppl. R²; W has:
जीवेन दृष्टः प्रकरोति सौरी
 मेषाश्रितः स्यात् धनधान्यहीनः /
वैरं विवादः भयबन्धुपद्वैः
 रोगं महत्यदारुणबाहुपीडा //,
and CT have:
मेषे गुरुः सूर्यसुतेन दृष्टो
 विद्यार्थसंपत्तिविहीनसत्यम् /
विद्या (विद्या C) वदेषी निजवर्ग (गर्व C) मुक्तो
 कृतघ्नवापी निजधर्महीनः //
After 6 CT add मेष (मेषगुरु T) फलं 7 om. S 7d. कुजनाकुलं C
8b. सूर्येण W सुधर्मकर्म° AO, शुभकर्म° RS 8c. स्वधनेन Q
8d. रोगपरे Q, रोगभरैः W 9b. भीतिं ABORST 9c. °प्रमादै° ACIOST, °प्रसादै° BQW 9d. नृतं T; भृत्यं Q च om. OR
10c. विद्याप्रसक्तं नियमः प्रयक्तं S 10d. नितांतमुत्कृष्ट° R

शुक्रेण दृष्टो वृषगः सुरेज्यः
    करोति मर्त्यं व्रतसंयतं च ।
महाधनं दानरतं प्रसन्नं
    विवेकिनं प्राणभृतां वरिष्ठम् ॥११॥
सौरेण दृष्टो वृषगः सुरेज्यः
    करोति दीनं विधनं मनुष्यम् ।
व्यपेतलज्जं धृतिसत्यवर्ज्यं
    निसर्गदुष्टं प्रियमाध्वसं च ॥१२॥
नृयुग्मसंस्थः प्रकरोति जीवः
    सूर्येण दृष्टः प्रणयेन हीनम् ।
विवर्जितं शौचदयाभिमानैः
    संपीडितं दुर्गतिमेव नित्यम् ॥१३॥
चन्द्रेण दृष्टो मिथुने सुरेज्यः
    करोति विद्याविनयेन युक्तम् ।
नरं प्रसिद्धं प्रचुरान्नपानं
    विहीनदोषं सुरभक्तिचित्तम् ॥१४॥
भौमेन दृष्टो मिथुने सुरेज्यः
    करोति मर्त्यं व्यथितं नृशंसम् ।
रोगावृतं पुण्ययशोविहीनं
    गतप्रभं हानियुतं सदैव ॥१५॥

12b. विधिनं B   12c. व्ययेन लज्जं T   वृतिसत्य॰ BRW, [illegible]॰ Q   ॰वर्ज्यं ABIOSTW, ॰हीनं R   after 12 CT add वृषे गुरुफलं   13c. विवर्द्धिज्जितं A, विवर्धितं BCIQTW   d. ॰मेधायुक्तं ABCIOQ T, ॰मेधयायुक्तं SW, ॰मेधा नित्यं R   14: विद्याविजयेन B   14d. सुरभक्तचित्तं R   15b. वितथं W   संचं ABIOS, नृपचं R   15c रोगाहरं BIOQRS, रोगाहुरं A, रोराहरं W   पथ्ययशो॰ R   15d. गतप्रभावं B, गतप्रभावं QW   युतं BW, वियुतं Q

बुधेन दृष्टो मिथुने सुरेज्यः
    करोति मर्त्यं बहुबुद्धिभाजम् ।
विप्रानुरक्तं प्रणतं विहीनं
    सत्याधिकं पूजितमेव भूपैः ॥१६॥
शुक्रेण दृष्टो मिथुने सुरेज्यः
    करोति नानाविधवित्तयुक्तम् ।
नरं नितान्तं बहुशीलयुक्तं
    गुणानुरक्तं पूज्यमेव लोके ॥१७॥
सौरेण दृष्टः प्रकरोति जीवो
    दुःखेन युक्तं व्यसनाभिभूतम् ।
दयाविहीनं पतितानुरक्तं
    विहीनवर्णं ज्वरपित्तभाजम् ॥१८॥
सुरेज्यमन्त्री रविणा च दृष्टः
    कर्काभिलस्त्रीप्रकरं मनुष्यम् ।
विमुक्तलज्जं विनयेन हीनं
    सदातुरं बान्धववर्जितं च ॥१९॥
चन्द्रेण दृष्टः खलु कर्कसंस्थः
    करोति जीवो विभवं मनुष्यम् ।
मनोज्ञदेहं सुरविद्विभक्तं
    कृपापरं साधुसमन्वितं च ॥२०॥

16c. प्रनतं R, घृणया W   16d. सज्जित° B, सत्पूजित° W   16d भूपैः — 17d ..... ; पूज्यमेव om. A   17c–18b युक्तं om. B; Q has:
धर्मप्रधानं परकार्यदक्षं
    सत्याधिकं सर्वसहं च सभ्यं ॥
सौरेण दृष्टो मिथुने सुरेज्यो
    करोति मर्त्यं,
W has:
पुत्रैर्धनैः बान्धवकैः सुयुक्तः
    राजप्रधानो ऽव्यसनाभिभूतः ॥
नृराशिसंस्थो मिथुने सुरेज्यः
    सौरेण दृष्टो
after 18 CT add मिथुन (मिथुने गुरु T) फलं   19b. °स्त्रीप्रतरं Q
19d. सदातुरांगं धनवर्जितं W   20a. कर्कटस्थः T   20b. विभवै° ACIORSTW, वैभवै° B, सुभगं Q   °मनुष्यैः AIOSTW
20c. सुरविद्ध° OR, सुरविप्र° W, सुरपूजि° Q   °रक्तं BW, °नाक्तं Q

भौमेन दृष्टो गुरुरेव कर्के
    नरं प्रसूते बहुपापभाजम् /
जलोदरप्लीहगुदाक्षिरोगैः
    संपीडिताङ्गं गुणवर्जितं च //२१//
बुधेन दृष्टः खलु कर्कसंस्थो
    गुरुप्रसक्तं नृपलोकभाजम् /
हिरण्यवस्त्रामणिमुक्तलाभैः
    समन्वितं सत्यपरं सदैव //२२//
शुक्रेण दृष्टः सुरराजमन्त्री
    कर्काश्रितः स्फीतिवतं मनुष्यम् /
करोति पुष्टं सुरभोजनानां
    सुरक्तपौरं प्रथितं नृलोके //२३//
सौरेण दृष्टः खलु कर्कराशौ
    जीवः सुवाते बहुतर्ककं च /
सुदीर्घपौरैर्नृपचौरदुष्टैः
    प्रपीडितं निन्दितमेव नित्यम् //२४//
सिंहस्थितो देवगुरुः प्रसूते
    सूर्येण दृष्टः पतितस्वभावम् /
विहीनधर्मं प्रकरोति वैरं
    मानान्वयुक्तं प्रणतं च नीचे //२५//

21a. गुरुदेव IORST, गुरुस्तेव Q 21b. °पापसंगं R 21c. चलोदर° S °लीह° OQ °गहाक्ष° AOS, °गुहाक्षि° IT, °गुदाक्ष° BC, °गुल्माक्षि° Q 22a. कर्कटस्थो T 22b. गुरुप्रयस्तं R नृपपूजितं च Q 22d. समन्वितं सिदैव A, समर्चितांगं --- सदैव S 23b. स्फीतिधनं C, सहीतवतं O, स्फीर्तवतं Q, स्फीति T 23c. पुष्ट Q, पुष्टिं ABCIORSTW सुरभोजनानि BW, सुरपूजितोकं Q, सुतसज्जनानां C 23d. सुरकशौरं Q 24c. सुदीर्घसौरै° BRW, सुदीर्घचौरै° T, सुदीर्घसुत्रं Q °दुष्टं W 24d. नंदित° ABCIOS, मंदित° T after 24 CT add कर्के (कर्के गुरु T) फलं 25b. सहितस्वभावं ABIOQRS, सहितप्रभावं W 25c. °धर्मैः W प्रकरारिवर्गं R 25d. मानान्वयुक्तं Q, मानंत्ययुक्तं O, मानाढ्ययुक्तं W, मत्या वियुक्तं C, मत्या विहीनं T च नीचेत् AIORS, चेत् B, मतं च W, रिपूणां Q

चन्द्रेण दृष्टो हरिगः सुरेज्यः
करोति मर्त्यं सुखबाधिताङ्गम् ।
सौभाग्ययुक्तं बहुमानभाजं
सुसंमतं साधुजनस्य नित्यम् ॥२६॥

सिंहस्थितो देवगुरुः प्रसूते
कुजेन दृष्टः प्रचुरप्रतापम् ।
विहीनवर्णं नयविप्रमुक्तं
विवर्जितं साधुसमागमेन ॥२७॥

बुधेन दृष्टः कुरुते सुरेज्यः
सिंहस्थितः सत्यपरं मनुष्यम् ।
विख्यातकीर्तिं कृतधर्मकार्यं
नरेन्द्रपूज्यं सुहृत्प्रसक्तम् ॥२८॥

शुक्रेण दृष्टो हरिगः सुरेज्यो
नरं विधत्ते मणिरत्नभाजम् ।
शय्यानुरक्तं बहुमित्रपक्षं
विपादितारिं प्रभुतासमेतम् ॥२९॥

सौरेण दृष्टो हरिगः सुरेज्यः
करोति मर्त्यं विधिहीनकृत्यम् ।
कौलप्रभावं सुजनैर्विमुक्तं
विद्वेषशीलं निजबान्धवानाम् ॥३०॥

26b. सत्यं ABCIORSTW   सुखवर्जितांगं ABCIOST, सुखवर्जितं – W, सुखसंयुतांगं Q   26d. साधुजनेन C   27b. भौमेन Q   27c. विहीनवर्गं W   नव° B, नै य Q, नय° W   °मुक्तं AIOQRS
28b–29a put after 29d in W   29c. सत्यानुरक्तं OQ, सत्यानुकं R, सत्त्यानुरक्तं W, समानुरक्तं AS   29d. विपादितारं W, व्यपाधितारं Q
29d. प्रभुतासमेतं W   30c. कलि° BQW   स्वजनै° W   °र्विमुक्तै° Q
after 30 CT add सिंह (सिंहे T) गुरुफलं

कन्याश्रितः सूर्यनिरीक्षितश्च
    करोति जीवः सततं कुशीलम् /
नरं प्रसूते कुजनैः समेतं
    विपन्नशीलं परुषस्वभावम् //३१//
चन्द्रेण दृष्टः खलु कन्यकायां
    जीवो विधत्ते जयसंग्रः
सुसाधुपूज्यं नृपतेरभीष्टं
    विवर्जितं पापजनेन नित्यम् //३२//
भौमेन दृष्टः सुरराजमन्त्री
    कन्याश्रितस्तीव्ररुजासमेतम् /
नरं प्रसूते नयधर्महीनं
    विपन्नशीलं नृपपीडितं च //३३//
बुधेन दृष्टः प्रकरोति जीवो
    नरं प्रगल्भं सतदारयुक्तम् /
स्वबन्धुमुख्यं बहुकीर्तिभाजं
    सदा हितं बान्धवसज्जनानाम् //३४//
शुक्रेण दृष्टः प्रकरोति जीवः
    कन्याश्रितः सर्वजनैः प्रशस्तम् /
नरं सुशास्त्रानुरतं प्रगल्भं
    व्यपेतदुःखं कपटेन हीनम् //३५//

31d. पुरुष° ABCORSW   33b. °स्तीक्ष्णरुजा° C   34 om. Q
34c. सबंधु° W, सबंधु° O   34d °सद्विजानां R   35b. °जनप्रशस्तं C, °जनैश्च शस्तं ABIOSW, °द्विजैश्च शस्तं R, °जनानुरक्तं Q   35d. समपेत° T, अपेत° ABCIORSW   हीनं C

कन्याश्रितो देवगुरुः प्रसूते
सौरेण दृष्टः प्रचुरार्तियुक्तम् /
व्यापन्नलज्जं विगतप्रतापं*
कलिप्रियं दुष्टमतिं नृशंसम् ॥३६॥
तुलाश्रितो देवगुरुः सुवाते
सूर्येण दृष्टः कुविधं प्रदुःखम् /
नरं सुशोकैः सहितं सपापं
मायाधिकं कृत्रिमसौहृदं च ॥३७॥
चन्द्रेण दृष्टस्तुलगस्तु जीवो
नरं प्रसूते विभवैः समेतम् /
व्यथाविहीनं नतशत्रुपक्षं
महाधनं सत्यपरं सदैव ॥३८॥
भौमेन दृष्टस्तुलगस्तु जीवो
नरं प्रसूते कलहैः समेतम् /
निस्वं कृशं पुण्ययशोविहीनं
सुसंस्कृतं नीचजनैः सदैव ॥३९॥
बुधेन दृष्टस्तुलगः सुरेज्यो
नरं प्रसक्तं विनये प्रसूते /
सुतीर्थभाजं बहुमित्रवर्गं
शास्त्रानुरक्तं बहुबान्धवं च ॥४०॥

* विगतं प्रतापैः T,

36b. प्रकरोति युक्तं ABIORST, प्रतपापरूपं W, प्रणिपातहीनं Q 36c. * विगतं पराध्यैः AORS, विपन्नतराध्यैः W, विपन्नराध्यैः B, विपराध्यैः I, विपरीतचेष्टं Q after 36 CT add इति (om. C) कन्याफलं 37a. प्रसूते Q 37b दृष्टो Q कुविधः ABCIORS, कुविधो Q, सुविधं T सदुःखं AQS 37d-38b om. R and 38c crossed out; 37d-38c supplied by R² 38a. °स्तुलगः स जीवो ABCIORS, तुल गः स जीवो T 39c. °यशोविहीनं S, °यशोवितानं A 39d. सुसंगतं W 40b. प्रसक्तं Q, प्रसूते R विनयैः W प्रशान्तं R 40c. सुतार्थ° BC °मित्रवर्ज्यं R

शुक्रेण दृष्टः प्रकरोति जीव-
स्तुलाश्रितः सत्यधनं प्रसूते /
गुणानुरक्तं विविधान्नपानैः
सेवाविनीताङ्गं गुरुदेवभक्तम् //४१//
सौरेण दृष्टः प्रकरोति जीव-
स्तुलाश्रितः क्लेशभवा समेतम् /
विहीनपद्वं सुतदारहीनं
सदा नरं रोगसमन्वितं च
जीवो ऽलिसंस्थः प्रकरोति म·
सूर्येण दृष्टः कृपणं म-
वातामयक्लेशसुपीडिताङ्गं
गतप्रभावं मलिनं कुचैलम् //४३//
चन्द्रेण दृष्टो ऽलिगतः सुरेज्यः
करोति मर्त्यं गतपापसङ्गम् /
सौभाग्ययुक्तं विनयैः समेतं
प्रभूतमित्रं गतशोकमोहम् //४४//
भौमेन दृष्टो ऽलिगतः प्रसूते
जीवो जितं स्त्रीतनयैश्च नित्यम् /
विवेकहीनं गतमानलाभं
विरूपवेषं पिशुनस्वभावम् //४५//

41b–42a om. I 41c. विविधाभ्यपाने: AS 42c. °पद्वे C, °पद्वैः BIOT, °पद्वौः AS, °पक्षं Q 42d. सदातुरं R after 42 CT add तुलाफलं 43b. मनुष्यं] कुशीलं R 44d. °शोकभावं W

बुधेन दृष्टो ऽलिगतः प्रसूते
    जीवो सुतं बन्दिजनेन नित्यम् /
विरुद्धकर्मं परुषप्रतापं
    संपादितं सर्वकलासु दक्षम् //४६//
शुक्रेण दृष्टः प्रकरोति जीवो
    जितेन्द्रियं जीवदयासमेतम् /
प्रभूतलाभं विकृतैर्वियुक्तं
    मनुष्यदग्रामधनैः समेतम् //४७//
मन्देन दृष्टः सुरराजमन्त्री
    करोति मर्त्यं ज्वरपीडिताङ्गम् /
मन्दाग्निसंस्थः प्रभया समेतं
    बहुव्ययं शास्त्रविवर्जितं च //४८//
मायाश्रितो देवगुरुः प्रसूते
    सूर्येण दृष्टो गतमानधानम् /
स्वधर्महीनं परधर्मरक्तं
    नानाविधैः कर्मसुखैर्विहीनम् //४९//
चन्द्रेण दृष्टो ह्ययगः प्रसूते
    जीवो जनाढ्यं नियमैः समेतम् /
यतिद्विजप्रव्रजितानुरक्तं
    मध्ये सदा तीर्थरतं प्रसिद्धम् //५०//

46a. विगतः T 46b. नुतं R 46c. विरुद्ध° R कर्मा पुरुषः ABCIORSTW, °कर्माणमति° Q 46d. संवादितं BW
47c. °विमुक्तं S 47d. °ग्रामजनै Q 48b. करोति om. O
मृत्युं C ज्वरपीडितांगं W 48c. मंदो ग्निसंस्थः I, शत्रुभयं च Q
प्रभयं C विहीनं Q 48d. बहुव्ययं OQT, बहुव्यथा R after
48 CT add इति (om. C) वृश्चिकफलं 49c. परधर्मरक्तं W
49d. कर्मसुखं ABCIORS 50b. जनाढ्यं T, जनाप्यं S, जनाका BRW,
धनाढ्यं AC, मनुष्यं Q 50c. जति° BW °प्रवृजिता° B,
°प्रवृजिता° W 50d. मध्यं Q

जीवो ह्यजस्थः क्षितिजेन दृष्टो
    नरं प्रसूते ऽतिखलं सपापम् /
प्रपंचमायासहितं [illegible]
    कृतापराधं नृपताधनलोकैः //५१//
बुधेन दृष्टो ह्यगः सुरेज्यः
    करोति मर्त्यं बहुसौख्ययुक्तम् /
विनीतमल्पद्युतलाभभा
    प्रभूतमूर्तिं सदयं च नित्यम् //५२//
शुक्रेण दृष्टो ह्यगो ऽथ जीवो
    नरं सुवाते शुचिमन्नलाभम् /
सत्यानुरक्तं सुवृत्तगात्रं
    सुरद्विजेन्द्रैः प्रणतं च तेषाम् //५३//
चापाश्रितो देवगुरुः प्रसूते
    सौरेण दृष्टः परदाररक्तम् /
विहीनसत्त्वं मतिविप्रयुक्त-
    मृणाधिकं व्याधियुतं तदन्तम् //५४//

51a. क्षितियेन C   51c. विसंचकं R, विषाके W   51d. °लोके R
52c. °मन्मद्युत° ABCIOR, °मल्पकृत° S, °मन्महृत° T   52d. प्रसूत° AS   °मूर्त्तं O   53c. °वृत्तमात्रं IOST   53d. सुतद्विजे°: ABCIQRSTW   54b. चौरेण S   54c. °सत्वं O, °संगं S   54d. ऋणाधिकं B, ऋगाधिकं W, गुणाधिकं S, ऋणा...कं T, व्रणाधि I   व्याधि° om. IW   तदंत्यं T, तदंग ABIOSW, तदांगं R, सदैव Q   after 54 CT add ध्यान (ध्याने गुरु T) फलं

——————— //५५//
——————— //५६//
——————— //५७//
——————— //५८//
——————— //५९//
——————— //६०//

55-60 om. ABCIOQP: T; W provides:

मृगेण संस्थित सुररा   न्त्री
    सूर्येण दृष्टः चपलस्वभावं /
वातादिपीडाभयसंयुता च
    स्वबान्धवैर्मित्रविरक्तता च //
चन्द्रेण दृष्टो मृगराशितांगवैः
    गुरुः प्रयुक्तो धनलाभता च /
मानं विवेकं स्वजनं सुखं च
    शास्त्रं देवगुरोश्च भक्तिं //
जीवः प्रसूते मृगलग्नगे च
    भौमेन दृष्टः कुरुते भयं च /
शत्रुं विवादं निजबन्धुवैरं
    वेश्यानुरक्तं मतिविभ्रमं च //
बुधेन दृष्टः प्रभुतासमेतं
        च संस्थो मृगराशिकश्च /
वाणिज्यमेतत्त्वं विविधं विलासं
    क्षेत्राभिलाभं धनवल्लभं च //
शुक्रेण दृष्टः सुरराजमन्त्री
    मृगेण संस्थो द्विजदेवभक्तं /
        वल्लभकामिनीनां
    पुत्रैः मित्र -- च राज्यलाभं //
मृगेण संस्थः सुरराजमन्त्री
    शौरेण दृष्टः भयसंयुता च /
जनापवादं नृपचौरकाग्नि
    स्त्रीणां विवादे धनधान्यनाशं //

घटस्थितो देवगुरुः प्रसूते
सूर्येण दृष्टः सुतदारदुःखैः ।
संपीडिताङ्गं गतबुद्धिवित्तं
विरक्तपौरं निजबन्धुहीनम् ॥६१॥
चन्द्रेण दृष्टो घटगः प्रसूते
सुरेज्यमन्त्री नयनाभिरामम् ।
अकल्मषं शास्त्रकथानुरक्तं
प्रियंवदं साधुजनस्य नित्यम् ॥६२॥
2 भौमेन दृष्टो घटगः
करोति मर्त्यं बहुदोषमुग्रम् ।
पेलाबद्धं कृपया विहीनं
निर्लज्जमत्युद्धतकामसक्तम् ॥६३॥
बुधेन दृष्टो घटगः सुरेज्यः
करोति सिद्धा सहितं [illegible]म् ।
नरं विशिष्टार्थपरं सरूपं
सदानुकंपासहितं विनम्रम् ॥६४॥
शुक्रेण दृष्टो घटगः सुरेज्यः
करोति मेधाविनमल्प[illegible]म् ।
नरं निरीहं सततं सदान्तं
मनस्विनं पार्थिवकार्यदक्षम् ॥६५॥

61a. घटाश्रितो QW 61c. °बुद्धिचित्तं CIQRS 62b. सुरेज्यवाते ABCIORSTW, सुरेज्ययाते Q 62c. विकल्मषं W 62d. प्रियं प्रदं IO 63b. बहुदीन° R 63c. °बैरं R 63d. निर्लज्ज° CT, विलज्जं S °मत्युद्धत° R, °मत्यद्धुत° O, °मत्यद्भुत° Q, °मत्यल्बुत° S, °मत्यद्धुद्धत° A, °मत्युद्धृते° T 64a. बुधेन B गुरुश्च R 64b. सिद्धो] कंपा C 64c. स्वरूपं W 64d °नुपापा° O, °नुगंपा° R, °नुसंपाशी° B, °नुसंध्या° W, °नुपा° AI, प्रसंज्ञा° Q 65b. मेधाविन° R °मल्पभोगी S, °मल्पभोजी ACIOT, °माल्पभोजी BRW 65c. सदारं W

सौरेण दृष्टो घटगो ऽथ जीवः
करोति रोगैर्विविधैः समेतम् ।
सुकर्मतप्तं प्रभुताविहीनं
विवर्जितं भोगनयैः सदैव ॥६६॥
जीवो झषस्थो रविणा च दृष्टः
करोति नानाविधमुग्रतापम् ।
छर्दिप्रकोपं ज्वरदाहमुग्रं
महाभयं पार्थिवजं सदैव ॥६७॥
चन्द्रेण दृष्टः सुरपूजिताङ्गो
झषस्थितः संजनयेन्मनुष्यम् ।
प्रियंवदं सत्यसुखार्थयुक्तं
स्त्रीणामभीष्टं रतिलालसं च ॥६८॥
भौमेन दृष्टो झषगः प्रसूते
सुरेज्यमन्त्री ज्वरया समेतम् ।
महातिसारज्वरपीडिताङ्गं
मित्रे न युक्तं नयवर्जितं च [illegible]
बुधेन दृष्टः प्रकरोति जीवो
मीनस्थितः शौचपरं मनुष्यम् ।
प्रियातिथिं मानधनैः समेतं
विरागचित्तं सुरविप्रभक्तम् ॥७०॥

66c. सुकायलसं R after 66 C adds कुंभफलं, T adds इति घटे गुरुफलं 67 om. C 67c–68[illegible] om. T 67c. ज्वरदाघं ABOQR °युक्तं Q 68b [illegible] C 69a. कृदुग. B 69b. सुरेश° W ज्वरया T, त्वरया OR 69d. मित्रेण . BCI[illegible]QRSTW 70b. स्वोच्चपरं W

शुक्रेण दृष्टो भ्रषग: सुरेज्यो
नरं प्रसूते विविधार्थयुक्तम् /
गुणाधिकं प्राणदयासमेतं
सदानुकूलं पितृमातृभक्तम् //71//
जीवो भ्रषस्थो रविपुत्रदृष्टो
नरं सुवाते विकृतस्वभावम् /
विवर्जितं दारसुखेन नित्यं
विद्याविहीनं सततं नृलोके //72//
इति श्रीवृद्धयवने गुरुदर्शनचार: //

71c. प्राणि° W 71d. मातृपितृ° S 72d om. ABIORS (ABORS note पाठोनफलं, I notes पूर्वं मद्दूलकेन - पाठोनफलं), Q supplies सदानृतल्लोकपरं कृपणं, W provides [illegible] पादपीडनं च
col. इति श्रीवृद्धयवनभाषाटीकायां सगड़ीजीश्रीमोहनदाससञ्जी-कारितायां गुरुदर्शनचाराध्याय: Q col. श्री° om. ABIORT

मेषस्थितो दैत्यगुरुः प्रसूते
    सूर्येण दृष्टः कृपणस्वभावम् /
नरं नितान्तं बहुकोपयुक्तं
    विवादशीलं गुरुतल्पगं च //१//
चन्द्रेण दृष्टो भृगुजोऽजसंस्थो
    नरं प्रसूते विनयार्थयुक्तम् /
बहुप्रसादं रहितापवादं
    नरेन्द्रकर्मोद्यतमेव नित्यम् //२//
भौमेन दृष्टः खलु मेषसंस्थः
    शुक्रः प्रसूते विधनं मनुष्यम् /
संपीडितं रक्तविकारशोकै-
    र्विराजितं नीचजनेन नित्यम् //३//
मेषाश्रितः सोमसुतेन दृष्टः
    शुक्रः प्रसूते सततं सुशीलम् /
नरं नयज्ञं निजबन्धुपूज्यं
    मनोज्ञरूपं प्रथितं त्रिलोके //४//
जीवेन दृष्टो भृगुजः प्रसूते
    मेषं गतः सह्यसदारचित्तम् /
महाप्रभावं विजितारिपक्षं
    कृतज्ञमोजस्विनमिष्टधर्मम् //५//

1a. मेषे स्थितो ORS दैत्यगुरुः AS 1d. गुरुतल्यगं CO 3a. सोमेन R
3b–4a om. ABIOQSW 3b. विधिनं T 3d. °र्वृंधाजितं
नीरजनेन R 4b. सततं] सुतगं R 4c. नयशं Q, नयज्ञं W
द्विजबंधु° QW 4d. नृलोके O after 4 Q repeats 2, but with
बुधेन in 2a. 5b. सत्य° AOS, सद्य° Q 5d. °मृष्टधर्मं AB,
°मृष्टधर्मे T

सौरेण दृष्टः खलु मेषसंस्थो
    नरं प्रसूते भृगुजः सकोपम् ।
निरुद्धमेहं खलु श______
    क्षीणं कृशं बन्धुजनेन मकम् ॥६॥
वृषस्थितो भास्करदृष्ट एव
    करोति शुक्रः प्रणतं सु[illegible]म् ।
नरं प्रजापूजितमद्भुतार्थं
    प्रियंकरं साधुजनेन मि[illegible] ॥७॥
चन्द्रेण दृष्टो भृगुजः प्रसूते
    वृषं गतः कीर्तिधनैः समेतम् ।
नरं प्रगल्भं प्रणतारिपक्षं
    प्रियाधिकं बान्धववल्लभं च ॥८॥
भौमेन दृष्टो भृगुजो वृषस्थः
    करोति हीनं पशुवित्तदारैः ।
नरं सदा स्त्रीजितमुग्रवैरं
    विवर्जितं भूमिपदातिलाभैः ॥९॥
बुधेन दृष्टो भृगुजो वृषस्थः
    करोति बुद्ध्या सहितं सुसत्यम् ।
नरं सुदेहं बहुवित्तभाजं
    पराक्रमप्राप्तयशोर्थमानम् ॥१०॥

6c. खलु] बहु° S 6d. मूकं R, शत्रुं S, सत्यं CT after 6 CT add मेषे शुक्रफलं 7a. भास्कर एव दृष्टः ABCIOT, भास्करपुत्रदृष्टः S, वासरपेन _ : Q 7b. सुसारं W 7c. पुत्रापूजित° C 7d. साधुजनेषु Q 8b. वृषे C 9b–10a om. W 9b पशुचित्रदारैः B, पशुपुत्रदारैः S 10b. सुशीलं Q, मनुष्यं CT 10d. °प्राप्ति° C °यशोभिमानं S, °यशोर्थलाभं T

जीवेन दृष्टो भृगुजः प्रसूते
[वृषं गतः कीर्तिधनैः समेतम् /
नरं प्रगल्भं प्रणतारिपक्षं
प्रियाधिकं बान्धववल्लभं च] //११//
सौरेण दृष्टो भृगुजो वृषस्थो
नरं सवाते गतपौरुषं च /
वृद्धा विहीनं विकृतस्वभावं
विवर्जिताङ्गं विभवोत्थभोगैः //१२//
तृतीयराशौ भृगुजः प्रसूते
सूर्येण दृष्टो ज्वरपीडिताङ्गम् /
गतानुरागं मलिनस्वभावं
प्रमादिनं नीचजनैः सदैव //१३//
चन्द्रेण दृष्टो मिथुने ऽथ शुक्रो
नरं प्रसूते बहुभोगभाजनम् /
स्वभावशुद्धं विनिवृत्तरोगं
जितेन्द्रियं नीतिविशारदं च //१४//
भौमेन दृष्टः प्रकरोति शुक्रो
राशौ तृतीये पुरुषं विरूपम् /
रोगाभिभूतं बहुदैन्यभाजं
विवर्जितं मानधनैः नित्यम् //१५//

11b–11d = 8b–8d. 11b. वृषे C 11b कीर्तिधनैः — 11d om. C with the note: चंद्रदृष्टिवत् 12b. प्रसूते Q 12c. बुद्ध्या IQTW 12d. विभवस्थभोगैः BCIQW after 12 CT add वृषे (वृषे T) भृगुफलं 13c. गतासुरागं ABIOSW, गतास्वरागं Q 13d प्रमादिनं ABCIOQRST, प्रमादिनं W नीचरतं R 14b–15a in marg. C 14b. बहुभोगवंतं W 14c. °शुद्धिं R विनष्टदृष्ट° B, विवष्टदृष्ट° I, विनिस्पृह° S, प्रविनष्ट°CT, च विनष्ट° Q, विनिष्ट° O 14d. नीचविशारदं R

बुधेन दृष्टो भृगुजः प्रसूते
तृतीयराशौ सुभगं मनोज्ञम् /
प्रसिद्धवीर्यं गुणसत्त्वयुक्तं
प्रभाविनं सौख्ययुतं सदैव //१६//
जीवेन दृष्टः प्रकरोति शुक्रो
राशौ तृतीये धनवस्त्रभा[illegible] /
नरं कृतघ्नं प्रचुरप्रभावं
सुसंयतं सर्वसखैः समेत[illegible] १७//
मन्देन दृष्टो भृगुजस्तृतीये
राशौ सुरोगाभिहतं मनुष्यम् /
सदा नरं बान्धवपक्षदुष्टं
सदा विहीनं पतितस्वभावम् //१८//
कर्कस्थितो भार्गवजोऽर्कदृष्टः
कुर्यात् कुशीलं कृपणस्वभावम् /
विवर्जिताङ्गं सुखभोगवस्त्रैः
प्रपीडितं बन्धुभिरेव नित्यम् //१९//
चन्द्रेण दृष्टो भृगुजस्तु कर्के
करोति मर्त्यं धनवाजियुक्तम् /
सुसाधुसक्तं प्रवरान्नपानं
हितं द्विजानां परमं प्रहृष्टम् //२०//

16c. गुणसत्त्वयुक्तं R 17b. नववस्त्र° S °भाज्ञं R 17d. सुसंयुतं RST, सुसंपदं QW 18b. सरोगा° I 18c. °पक्षदुष्टे S 18d. सदा] दया° Q after 18 CT add मिथुने भृगुफलं 19b. कुर्वन् W 20c. °संगा° ABCIORS °प्रवरा° RS, प्रचुरा° T 20d. प्रकृष्टं C, प्रदृष्टं Q

भौमेन दृष्टः प्रकरोति शुक्रः
कर्कस्थितः पुष्टियुतं मनुष्यम् /
स्त्रीणामभीष्टं सुरदेवभक्तं
सरक्षिताङ्गं विविधैश्च भृत्यैः ॥२१॥
शिरोक्षिजिह्वागुदरोगयुक्तं
स्वभावपापं विनयेन हीनम् /
बुधेन दृष्टः प्रकरोति शुक्रः
कर्कस्थितः सत्यविवर्जितं च ॥२२॥
जीवेन दृष्टः प्रकरोति शुक्रः
कर्काश्रितः सत्यधनं प्रसूते /
नरं विशिष्टान्वितसाधुचेष्टं
सदानरक्तं यजनार्थदानैः ॥२३॥
मन्देन दृष्टः प्रकरोति शुक्रः
कर्काश्रितस्तीव्ररुजासमेतम् /
महारिपक्षं क्षुधयार्तदेहं
निसर्गमन्दं विगतप्रपञ्चम् ॥२४॥
सिंहाश्रितः सत्यविहीनमेव
शुक्रः प्रसूते रविणा च दृष्टः /
उद्वेगशोकज्वरपीडिताङ्गं
नरं महादोषसमन्वितं च ॥२५॥

in CRT the order is: 21a, 22d, 22a–c, 21b–c. 21b. कर्काश्रितः CT पुष्टियतिं O, पुष्टितरं CT 21c. गुरुदेव° RW 21d. विधियैश्च R भोगैः T 22c–d before 22a–b in Q 22a. °रोगिशुक्रः W 22d. कर्काश्रितः CRT 23b–24a om. ASW 23c. वरिष्ठान्वित BQ 24c. महाहिपक्षं IORSW 24d. निसर्गदेहं CT गतविप्रपंचं ABIORSW after 24 C adds कर्के भृगुफलं 25 om. S

सिंहाश्रितो दानवपूजिताङ्गो
दृष्टो ऽथ चन्द्रेण नरं प्रसूते /
सुतीर्थसेवानिरतं मनुष्यं
दत्तं पितॄणां च सुधाविहीनम् //२६//
भौमेन दृष्टः प्रकरोति शुक्रः
सिंहाश्रितः शत्रुनिपीडिताङ्गम् /
नरं दरिद्रं मिथुनाभिभूतं
निस्तेजसं पापविवर्जिताङ्गम् //२७//
बुधेन दृष्टः प्रकरोति शुक्रः
सिंहे सुस्वार्थं विजितारिपक्षम् /
कुलस्वधर्मे परमं प्रहृष्टं
विवादयुक्तं नृपवल्लभं च //२८//
जीवेन दृष्टो भृगुजो विधत्ते
सिंहाश्रितः सत्यधनेन युक्तम् /
नरं प्रगल्भं विभुतासमेतं
कृषिप्रभावाद्गृहसौख्ययुक्तम् //२९//
मन्देन दृष्टो भृगुजस्तु सिंहे
नरं प्रसूते सुखपुत्रहीनम् /
विवर्जितं धर्मधनैश्च मर्त्यै-
र्गतप्रभावं सरुजं मदेन //३०//

26a. दानचपूजितांगो B, दानिवपूजितांगो W   26b. दृष्टश्च S
नरैः ABIOS   26c. कुतीर्थ° W   26d.
धत्ते W   पितृणामपि वल्लभं च Q   28c. प्रकृष्टं C
29d. कृषि° R   30b. सुख पुत्रहीनं C.   30d. सहजं ABIORSW
after 36 CT add इति सिंहे फलं

कन्याश्रितो भास्करदृष्टदेहो
नरं प्रसूते भृगुजः सुतीव्रम् ।
नयनहीनं गतमानसत्यं
स्वबन्धुमार्गेण बहिष्कृतं च ॥३१॥

कन्याश्रितो भार्गव इन्दुदृष्टो
नरं सुवाते सहितं सुताद्यैः ।
पराक्रमाद्यैर्विभवैः समेतं
सुपूजितं साधुजनेन नित्यम् ॥३२॥

भौमेन दृष्टो भृगुजस्तु कन्ये
करोति मर्त्यं सरुजं सकामम् ।
सदा विरक्तं निजबन्धुवर्गै-
र्विहीनवित्तं बहुवैरयुक्तम् ॥३३॥

कन्याश्रितो दैत्यगुरुस्तु सौम्य-
दृष्टः प्रसूते सदयं सधर्मम् ।
मनोज्ञदेहं बहुशास्त्ररक्तं
सदा सुशीलं [illegible]युक्तम् ॥३४॥

जीवेन दृष्टो भृगुजः प्रसूते
कन्याश्रितः सत्यमुदारचेष्टम् ।
नरं नितान्तं नृपमानभाजं
गतारिपक्षं निजवर्गसख्यम् ॥३५॥

31a. भार्गवदृष्टदेहं W 31b. सुतीक्ष्णं Q 31c. °मानमर्त्यं ABCIORST
31d. स्वबंधुवर्गेण T 32a. भास्कर T °चंद्रदृष्टो ACIST,
°चंद्रदृष्टो O, टंडदृष्टो B 32b. प्रसूते Q सुतार्थैः QTW
33a. सौमेन A भृगुजः सकामे ABCIORSTW, भृगुजो बलायां
Q 33b. मर्त्यं ABCIOQRSTW 33c. °वर्गै W 33d. °वैरि° W
34a. दैत्यगुरुः स ABCIORSTW 35a. नीचेन S 35d. °वर्गसौख्यं
BCIQTW

चन्द्रेण दृष्टो भृगुजः प्रसूते
कन्याश्रितः कान्तिविवर्जिताङ्गम् /
नरं सुनीचं प्रणतं कृतघ्नं
विवर्जितं भूमिपमानदानैः //३६//
तुलाश्रितो दैत्यगुरुः प्रसूते
सूर्येण दृष्टो ऽहिभुजासमेतम् /
करोति मर्त्यं बहुदैन्ययुक्तं
नयेन हीनं सततं कुरकम् //३७//
चन्द्रेण दृष्टः प्रकरोति शुक्र-
स्तुलाश्रितः प्रीतमलोलुपं च /
नरं प्रभासत्यविवेकयुक्तं
सुशिक्षितं सर्वकलासु नित्यम् //३८//
भौमेन दृष्टो भृगुजस्तुलायां
करोति नीचैर्विजितं विशूलम् /
नयेन हीनं विक्रियासमेतं
नरं निरस्तं सुजनैः सदैव //३९//
बुधेन दृष्टः प्रकरोति शुक्र-
स्तुलाश्रितः सौख्यनयेन युक्तम् /
नरं प्रगल्भं प्रचुरप्रतापं
विपक्षरोगं प्रियदर्शनं च //४०//

36b. °विवर्जितं च T 36c. सुनीचं] सुवानां A 36d. भूमिपनादनोदैः ABIORS, भूमिपदापरोदैः W, भूमिपतेर्विनोदैः Q 37b. हिनुजा° I, हि रुजा° Q 38b. प्रीति° ABCIORSTW, प्रीती° Q 38c. प्रभा – त्य° W, प्रभावसत्य° Q 39a. रविज° R 39b. °र्जनसंप्रयोगं C 39c. विवेकहीनं R विनं विक्रिया° R, -- विक्रिया° BI, विकृपा° T, च क्रिया° W, कुधिया° Q 39d. निरस्वं C 40b. सौख्यजनेन Q

जीवेन दृष्टो भृगुजः प्रसूते
नरं सुसत्त्वं नृपकार्यदक्षम् /
प्रभूतलाभं विजितारिपक्षं
जितेन्द्रियं बान्धववल्लभं च //४१//
सौरेण दृष्टो भृगुजः प्रसूते
नरं सुदुष्टं कृपणस्वभावम् /
मायाधिकं दम्भपरं विहीनं
धर्मेण सत्येन च पौरुषेण //४२//
शुक्रो ऽलिसंस्थो रविणा च दृष्टो
नरं प्रसूते मदनातिदेहम् /
व्ययान्वितं पापरतं कृतघ्नं
व्यपेतलाभं गतपौरुषं च //४३//
चन्द्रेण दृष्टो ऽलिगतस्तु शुक्रो
नरं विधत्ते परमप्रभावम् /
सदानुरक्तं द्विजदेवतानां
तपस्विनं शीलधनैः समेतम् //४४//
भौमेन दृष्टः प्रकरोति शुक्रो
नरं कृतार्थाभिहतं नृशंसम् /
सदा कृतघ्नं कृतदोषसङ्गं
व्यपेतलज्जं सततं च रुद्धम् //४५//

41a-b. भृगुजस्तुलायां नरं प्रसूते Q 42b. सुदृष्टं ABCIOR T, सुहृष्टं S, तुलायां Q after 42 CT add तुलाफलं 44c. द्विजदेवभक्तं T 44d. शीघ्रधनैः W 45d. व्यपेतलक्ष्यं I सत्त वृश्चीकस्थः Q विरुद्धं T अद्धं O, वृद्धं W, क्रुद्धं BR, जतै AI, लक्ष्यं S

बुधेन दृष्टः प्रकरोति शुक्रः
    करोति मर्त्यं खलु वृश्चिकस्थः /
बुद्ध्यान्वितं प्रीतिकरं प्रसन्नं
    सतीर्थ्ययुक्तं महिमाधिकं च //४६//
जीवेन दृष्टो ऽलिगतः प्रसूते
    शुक्रः सुरक्तं निजबन्धुवर्गैः /
नरं निरीहं हृतपापसङ्गं
    गुणाश्रयं भूतिसमन्वितं च //४७//
शुक्रो ऽलिगः सूर्यसुतेन दृष्टो
    मर्त्यं प्रसूते ऽतिधनैः समेतम् /
प्रभूतकोशं विगतार्तिभावं
    तीर्थानुरक्तं द्विजबद्धभं च //४८//
चापाश्रितो दैत्यगुरुः प्रसूते
    सूर्येण दृष्टः परदाररक्तम् /
नरं व्ययैः पीडितमुग्ररोगं
    सदा जितं दारनृपात्मजैश्च //४९//
चन्द्रेण दृष्टः प्रकरोति शुक्र-
    श्चापाश्रितो वस्त्रधनैः समेतम् /
नरं सदेहं गतपापदेहं
    विचक्षणं धर्मकथासु नित्यम् //५०//

[illegible]

46b. महाधनं वृश्चिकगो मनुष्यं Q 46c. प्रधानं R 47c. परं W
48b. सुधनैः Q समेतं om. C 48c. प्रसूतकोशं S,
प्रभूतकोशाः° W, कोशान्वयं च C ऽलिगतार्ति° AIOT,
गतार्ति° B W after 48 C adds वृश्चिकफलं, T वृश्चिके शुक्रफलं
49d. जितं om. AS दारतपात्मजैश्च BIR, दारपात्मजैश्च W,
रपात्मजैश्च A, रतं पा----त्मनैश्च S, दारपरात्मजैश्च Q
50b. वस्तुधनैः W 50c. गतपापसिद्धं R

*च गतार्ति° Q,

भौमेन दृष्टो हयगः प्रसूते
    शुक्रः कृतघ्नं विगतप्रभावम् ।
शिरोर्तिछर्दिज्वरदाहरोगैः
    संपीडितं त्रासकरं नराणाम् ॥५१॥
बुधेन दृष्टः प्रकरोति शुक्रो
    धनुर्धरस्थः प्रकरोति मर्त्यम् ।
प्रभूतलाभं सुधिया समेतं
    धर्माधिकं साधुजनानुरक्तम् ॥५२॥
सुरेज्यदृष्टो हयगः प्रसूते
    शुक्रः प्रसन्नं प्रणतप्रगल्भम् ।
द्विजामरार्थं कृतकर्मसंघं
    शान्तं महाशास्त्ररतं सदैव ॥५३॥
मन्देन दृष्टो भृगुजः प्रसूते
    चापाश्रितो हानि
नरं सुतार्थै रहितं कुरूपं
    प्रधानवैरं मतिवर्जितं च ॥५४॥
मृगाश्रितो दैत्यगुरुः प्रसूते
    सूर्येण दृष्टो ऋणरोगयुक्तम् ।
नरं सदोषान्वितमिष्टशत्रुं
    विवेकहीनं गतसाध्वसं च ॥५५॥

51b. विगतस्वभावं Q   51c. °वृद्धि° A, °वांति° Q   °दाघ° ABCORTW, °दाव° I   52b. प्रगुणं मनुष्यं Q   52d. धर्मार्थिकं BW, धर्मार्थकं Q   53c. द्विजामरार्यं ABIOQSTW, द्विजामतर्यं C कृतकर्मसिद्धिं C   53d. शास्त्रं ABIORSW, शूरं T, सुरं C   महा° सदा C   54c. सतीर्थैः QW   सहितं BCIQT   after 54 C adds इति धनफलं   55b. रुण° BW, रिण° O, व्रण° AQS, क्षन° I
55c. सदोषान्वित° I, सुदोषाश्रित° S

चन्द्रेण दृष्टो भृगुजः प्रसूते
मृगाश्रितो मातृपितृप्रभक्तम् ।
नरं सदा स्त्रीदयितं मनोज्ञं
मेधाविनं विचरतं सदैव ॥५६॥
भौमेन दृष्टो भृगुजः प्रसूते
मृगाश्रितो ऽतिव्यसनैः समेतम् ।
गतारिं गतमानशौर्यं
महाविपक्षं हतवत्सलं च ॥५७॥

56a. ऽभिसूते W 56b–57a om. AS 56b. मात्रपितृप्रस (?) मातृचपितृभक्तं CT 56c. वरं T. after 56 Q inserts 9,1–4 and repeats 14,55–56. 57b. मृगाश्रितो om. T निहतानैः C, हतानैः T 57c–61b om. B Q,W substitutes 61c–d for 57c–d

बुधेन दृष्टः प्रकरोति शुक्रो
 मृगाश्रितः साधुजने सुरक्तम् ।
धर्मस्वभावं बहुबुद्धिभाजं
 नयाधिकं पार्थिववल्लभं च ॥५८॥
जीवेन दृष्टः प्रकरोति शुक्रो
 मृगाश्रितो दारसुतार्थयुक्तम् ।
अनष्टदेहं विगतोद्यमं च
 दयाधिकं पुण्यपरं नितान्तम् ॥५९॥
मन्देन दृष्टः प्रकरोति शुक्रो
 नरं दुःसप्राप्यमनल्पदुःखम् ।
विहीनधर्मार्थयशोनुरागं
 प्रद्वेषशीलं सततं द्विजानाम् ॥६०॥
घटाश्रितो दैत्यगुरुः प्रसूते
 सूर्येण दृष्टो भयशोकयुक्तम् ।
नरं निराहारतयाणदेहं
 श्लेष्माधिकं कीर्तिविवर्जितं च ॥६१॥

W has in place of 58–61:

मृगाश्रितो दैत्यगुरुः प्रसूते
 देवार्चितो दृष्टिसमागमं च ।
धनं च धान्यं बहुलप्रतापं
 गजाश्वगोवाहनगेहसौख्यं ॥
 दृष्टो भृगुजः प्रसूते
 मृगाश्रितो राजजने प्रधानं ।
वाणिज्यधूर्तं कुटिलस्वभावं
 वेश्यानुरक्तं धनताविहीनं ॥
मृगस्थितो दैत्यगुरुः प्रसूते
 मंदेन दृष्टो धनहीनतां च ।
वातादिरोगं भयविभ्रमं च
 चौराग्निभिर्भीनृजनेन वादं ॥
शुक्रो घटस्थो दिनराजदृष्टो
 राज्यं प्रभूतं स्वजने च सौख्यं ।
मानोदयं कीर्तिविवर्धनं च
 वातादिपीडां स्वजने विवादं ॥

14,58a प्रकरोति —15,6b मेषं om. T 58b. °जनेषु रक्तं IS 58c. बहुधा विभाजं° IO, बहुधा विभाजं° AS 59c. अनिष्टदेहं C विहितोद्यमं R 59d. पुण्यवरं CI 60b. सुखप्राप्य° C 60c. °नुरागैः ACIORS 60d प्रद्वेश° AIORS after 60 C adds मकरफलं 61c. °नयोनुदेहं ABCIO, °नयोनदेहं RW, °नयान्तदेहं S 60d. च om. R

चन्द्रेण दृष्टो घटगस्तु शुक्रो
नरं प्रसूते नयनाभिरामम् ।
नरं हितं साधुजनस्य नित्यं
नरेन्द्रपूज्यं सततं सुखार्थम् ॥६२॥
भौमेन दृष्टो घटगश्च शुक्रो
नरं भयार्तं गतवित्तभोगम् ।
विहीनकोशं दयिताविहीनं
सुगुह्यरोगाभिहतं करोति ॥६३॥
बुधेन दृष्टो घटगोऽथ शुक्रः
करोति सत्याधिकमिष्टधर्मम् ।
प्रभूतमित्रं प्रचुरान्नपानं
नरं विनीतं सुतसौख्ययुक्तम् ॥६४॥
जीवेन दृष्टः प्रकरोति शुक्रो
नरं प्रियैः संयुतमेव नित्यम् ।
घटस्थधान्यप्रवरैः समेतं
विशुद्धिभाजं गतपापसङ्गम् ॥६५॥
मन्देन दृष्टो घटगः प्रसूते
शुक्रः क्रियाहीनमनल्पशोकम् ।
विवर्जितं धर्मधनार्थसौख्यैः
सुदुष्टभावं सदयं सदैव ॥६६॥
मीनाश्रितो दैत्यगुरुः प्रसूते
सूर्येण दृष्टः प्रणयेन हीनम् ।
सुनिष्ठुरं कोपपरं सुदुष्टं
धर्मातिगं धर्मगुरुप्रभावम् ॥६७॥

62a. घटगश्च W 62d. सुनार्थे R 63a. घटगस्तु S 63b. भयार्तिं I °वित्त° om. A °रोगं ABCIOQRSW 64a. घटगस्तु Q 64b. सत्वाधिक° S 64c. प्रसुत° Q °मर्त्यं BCIQW 65a. प्रकरोति] घटगस्तु Q 65b. प्रियं QW नित्यं] धत्ते Q 65c. घटस्व° R, घटप्र° C, सुवर्ण° Q 65d. विशुद्धभाजं W 66d. सद्दुष्टभावं A, दुष्टस्वभावं W सभयं Q after 66 C adds कुंभफलं
67d हीनतरप्रभावं C

चन्द्रेण दृष्टो झषगः प्रसूते
  शुक्रः सुरूपं सुभगं मनुष्यम् /
देवेज्यसक्तं सुतमित्रहीनं
  दयाधिकं पुण्यपरं सदैव //६८//
भौमेन दृष्टः प्रकरोति मीने
  शुक्रो विहीनं पशुपुत्रदारैः /
विगर्हितं धर्मक्रियाविरक्तं
  सरोगदेहं सततं कुचैलम् //६९//
बुधेन दृष्टो झषगो विधत्ते
  शुक्रः सुरूपं विनयप्रधानम् /
सदानुरक्तं द्विजलिङ्गिनां च
  धर्मार्थभाजं गुरुभक्तियुक्तम् //७०//
जीवेन दृष्टो भृगुजः प्रसूते
  नरं प्रियं पुण्यधनैः समेतम् /
श्रुतार्थविद्याविभवैः समेतं
  प्रज्ञाधिकं सत्यपरं मनोज्ञम् //७१//
सौरेण दृष्टः प्रकरोति शुक्रो
  नरं झषस्थः सुतसत्यहीनम् /
चौरावनीशैर्हृतवित्तसारं
  रोगातुरं बुद्धिविवर्जितं च //७२//
इति श्रीवृद्धयवने शुक्रदर्शनचारः //

68b. सरूपं Q, स्वरूपं W   68c. देवेज्यभीष्टं C, देवेषु शक्तं Q सुमतिं सुभोगं C   69c. धर्मविधाविरक्तं Q   70b. स्वरूपं C, शरूपं Q   70c. °लिंगिनानां ACRSW, °लिंगनानां O, °लंगिनानां BI, °देवतानां Q   71a. प्रसूते] झषस्थो Q   71c. सतीर्थ° W, करोति Q   72b. नरं om. S   सुतसौख्यहीनं Q   72c. °हृत° C, °हृत° ABIW   °वित्त° om. Q   col. इति श्रीवृद्धयवनभाषाटीकायां सगाद्धिजीश्रीमोहनदाससनीकारितायां शुक्रदर्शनचारः समाप्त Q
col. श्री° om. ABIORS

मेषं गतः सूर्यसुतो विधत्ते
सूर्येण दृष्टो विकृतानुरूपम् ।
प्रवासशीलं विजितं स्वदारै-
र्व्यपेतलज्जं बहुसाध्वसं च ॥१॥
मेषं गतः सूर्यसुतो विधत्ते
चन्द्रेण दृष्टः सुनयं † विहीनम् ।
नरं सुरूपं बहुलाभभाजं
गुणानुरक्तं बहुस.. .मित्रम् ॥२॥
मन्दोऽथ मेषे क्षितिजेन दृष्टो
नरं प्रसूते ज्वरपीडिताङ्गम् ।
छर्दिप्रकोपप्रभवैश्च रोगैः
समन्वितं द्वेषकरं गुरूणाम् ॥३॥
बुधेन दृष्टो रविजोऽजसंस्थः
करोति बुद्ध्या सहितं मनुष्यम् ।
प्रसन्नदेहं नृपतेरभीष्टं
कृतश्रमोजोधिकमेव नित्यम् ॥४॥
[रो मेषगतः प्रसूते
जीवेन दृष्टः प्रवरं प्रगल्भम् ।
नरं सुसत्त्वं सुभगं प्रशान्तं
सदानुकूलं द्विजबान्धवानाम् ॥५॥

1a. मेषे C 2a. मेषे C 2b. सनयै° W, सुमयं S नितांतं Q
2d. °साधमंत्रं ARS 3a. ऽथ] हि QW 3b. विधत्ते W
3c. छादि° Q, बर्हि° C, वृद्धि° A °प्रसवैश्च W 5b. गाबेन B 5c. वरं S प्रणीतं S, मनुष्यं C 5d. सदानरतं C

शुक्रेण दृष्टो रविजः प्रसूते
    मेषं गतः शास्त्रपथानुरक्तम् ।
प्रभूतमित्रं विजितारिपक्षं
    सदानुगं साधुतपस्विनां च ॥६॥
वृषं गतोऽर्की दिनपेन दृष्टो
    नरं प्रसूते कठिनस्वभावम् ।
पराचरकं विषयार्तदेहं
    प्रपंचशीलं कुटिलस्वभावम् ॥७॥
वृषं गतः सूर्यसुतोऽर्थदुष्टं
    करोति मर्त्यं शशिना च दृष्टः ।
सद्वस्त्रमन्नाशनभोजनं च
    श्लाघ्यं सतां दम्भविवर्जितं च ॥८॥
भौमेन दृष्टो गवि सूर्यसूनुः
    करोति कीर्त्या रहितं मनुष्यम् ।
सुदुष्टभावं विधिना विहीनं
    परान्नयोषिद्धनलालसं च ॥९॥
बुधेन दृष्टो गवि सूर्यपुत्रो
    नरं प्रसूते कृषिवित्तभाजम् ।
नानासुपुष्पैः सहितं सदानं
    सतामभीष्टं सुरतैः समेतम् ॥१०॥

6b-d om. B   6b. मेषे C   शास्त्र° Q   °कथा° W   6d. °तपस्विनं वा W, °तपस्विनानां AIOS, °तपस्विनीनां RT
after 6 CT add मेषे शनिफलं   7a. वृषे W   र्कि° R, के O
7b. काठिन° C, कथित° ABIOQRSTW   7d. कुटिलं तथैव Q
8a. वृषे C   र्थपुष्टं C, ऽथ दुष्टः W   8b. शनिना R   8c. °मन्नासन° S   8d. श्लाघ्या सतां ABIQSW   9b. सहितं W
9c. विधिधानहीनं W   9d. परान्नयोषिद्धहलालसं Q
10b. कृषिवृत्तभाजं O   10c. सुदांतं A, सुदारं W   10d. सदाम° R

जी॰ न दृष्टो वृषगो ऽथ सौरिः
करोति धर्माधिकमद्भुतार्थम् /
नरं गुरूणां विनयप्रसक्तं
सदातिथिं दानपरप्रसक्तम् //११//
शुक्रे ण दृष्टो रविजः प्रसूते
हृतारिपक्षं पितृमातृभक्तम् /
म॰ स्त्रवस्त्रं सुतसौख्यभाजं
विवर्जितं पापजनेन नित्यम् //१२//
मन r ऽर्कदृष्टो मिथुने प्रसूते
नरं कलत्राकुलितं सदैव /
वि॰ मित्रं क्लेशक्लासमेतं
धयान्वितं बान्धववर्जितं च //१३//
च॰ ण दृष्टो रविजो नृयुग्मे
सताम्भीष्टं जनयेन्मनुष्यम् /
वि॰ प्रतापार्थसुखैः समेतं
नैसर्गविज्ञानपरं सदैव //१४//
ध॰ येन दृष्टो रविजो नृयुग्मे
नरं प्रसूते विभवेन हीनम् /
प्र॰ सकोपं गुरुरोगभाजं
सदा कुशीलं † विभवैर्विहीनम् //१५//

11a. om. W 11b. °मद्भुतीर्थं W after 11c A inserts 12c–13a मि°, S ... 12c-d 11d. सदा तथा Q दानपरं च सत्यं R
12d ...जनैर्वृषस्थ Q after 12 C adds वृषे शनिफलं, T adds इति वृषः 13b. क्लेशसुतासमेतं ABCIORSTW, क्लेशसुतं तथैव Q
14b नयेन नित्यं T 15a. रविणा W 15b. विनयेन C 15c–d om 15c. °कोप om. C

बुधेन दृष्टो रविजो नृयुग्मे
करोति सत्यं सुधिया समेतम् /
नरं निधिग्रामपुरार्थभाजं
सुरूपदेहं नृपकार्यदक्षम् //१६//
जीवेन दृष्टो रविजो नृयुग्मे
नरं प्रसूते मणिविद्रुमाद्यैः /
समन्वितं धर्मकथानुरक्तं
प्रियातिथिं शंसितमेव लोके //१७//
शुक्रेण दृष्टः प्रकरोति सौर-
स्तृतीयराशौ सततं धनाढ्यम् /
नरं निकामं सुखसिद्धियुक्तं
महानुकंपं प्रणयप्रपन्नम् //१८//
कर्काश्रितः सूर्यसुतो विधत्ते
सूर्येण दृष्टः क्षतपीडिताङ्गम् /
ज्वरातिसाराकुलमेव नित्यं
प्रद्वेषशीलं गतधर्मकृत्यम् //१९//
चन्द्रेण दृष्टो रविजः प्रसूते
कर्काश्रितः कीर्तिधनैरुपेतम् /
नरं सधर्माभिरतं प्रधानं
विवर्जितं नीचजनप्रसङ्गैः //२०//

16c. निधेपानपुरार्थभाजं R . for 16d W substitutes 17d (°मत्र for °मेव) 17d. लोके] नित्यं S 18 om. S 18a दृष्टः·
18d प्रण° om. A 18a. सौरिः W 18b. सुतरां R 18c. सुतसिद्धि T 18d. प्रणये प्रपन्नं BI, प्रणयोपपन्नं W after 18 CT add मिथुन (मिथुने शनि C) फलं 19b. क्षित° C, कृत° I 19d. गहधर्म° R 20c. सुधर्मातिरतं OR, सधर्माधिरतं W, सुधर्मानीति° S, सधर्मै चिरतं Q 20d. नीचजने प्रसंगः

भौमेन दृष्टो रविजः सुजाते
कर्काश्रितो घातपरं मनुष्यम् /
विवादशीलं सततं नृपाद्यं
मिथ्याभिकं कामपरं कृतघ्नम् //२१//
बुधेन दृष्टो रविजस्तु कर्के
हिरण्यरत्नैश्च युतं करोति /
नरं निरीहं सुरलोकपूज्यं
महाजनैः सेवितमत्युदारम् //२२//
जीवेन दृष्टो रविजः सुजाते
कर्के गतः सर्वसुखैः समेतम् /
भानबुद्धिं यशसंप्रयुक्तं
सदानुरक्तं द्विजबान्धवानाम् //२३//
शुक्रेण दृष्टो रविजः प्रसूते
कर्काश्रितो नीतिपरं मनुष्यम् /
सुरूपदारं हतपापवर्गं
जितेन्द्रियं सत्यकथानुरक्तम् //२४//
सिंहाश्रितो भास्करिरर्कदृष्टः
करोति कामाधिकमल्पधर्मम् /
नरं विवेकाकृतिवर्जिताङ्गं
गुणैर्विहीनं परभाकिकं च //२५//

... प्रसूते Q 21b. द्यूतपरं CT, घात्सनपरं W 21c. विकारशीलं
विकादिशीलं T नृपाद्यं ABS, नृपादृयं R, नृपाग्रं Q, नृपैव W
...d. कृप्यपरं W 22a. स्तु कर्के — 23a. रविजः om. S 22a.
कर्के BCIOR, स कर्के ASTW 22c. वरलोक° R 22d.
...त्युदारं ABCORT, °मत्सरं च Q 23a. प्रसूते Q 23b. कर्के CS
23c. यशःसंप्रयुक्तं W 23d. बान्धवानां C after 24 CT
...d कर्के शनिफलं, I adds इति कर्कराशिस्थितशन्युपरिदृष्टिफल
... सिंहास्थितो W भास्करजो W 25b. °मर्त्यधर्मं S

चन्द्रेण दृष्टो हरिभे ऽर्कसूनुः
करोति मर्त्यं परमार्थसख्यम् /
नरं प्रधानं सुकुलस्य मध्ये
मायाविहीनं शुभकर्मदक्षम् //२६//
भौमेन दृष्टः प्रकरोति मर्त्यं
सिंहस्थितो ऽर्किस्तु रुजासमेतम् /
विहीनवर्णं ऽ रामयाढ्यं
नरं सदाकारविवर्जिताङ्गम् //२७//
बुधेन दृष्टो रविजः सवाते
नरं सदक्षं प्रियाविप्रदेवम् /
स्वबन्धुसौख्यं बहुदानभाजं
विषक्रियाव्याकुलितं प्रधानम् //२८//
जीवेन दृष्टो रविजः सवाते
सिंहाश्रितस्त्राणपरं द्विजानाम् /
क्रियासमेतं वरतीर्थयुक्तं
विवर्जितं दुष्टसमागमेन //२९//
शुक्रेण दृष्टः प्रकरोति सौरः
सिंहस्थितो धान्यधनप्रधानम् /
नरं सविद्यं गुरुदानरक्तं
सुपूजिताङ्गं नृपसाधुवादैः //३०//

26a. हरिगो W 26b. प्रसुरार्थसौख्यं C 26c. प्रधानं om. S सुकुलस्य S 27a. मर्त्यं om. C 27b. ऽर्किस्तु om. AS, किं: स T, केसूनुस्स C, मेक° BW, नेक° Q, मेद° I, मेष° R, सौरि O 27c. °मयाद्यं Q, °मपाद्यैः W 27d. °विवर्जितं च QT 28a. रविजस्तु सुते Q 28b–29a om. S 28b. °विप्रकेटं Q 28c. स्वबंधुदत्तं W 28d. विस्त° W, विरु° R, सिंहे Q 29a. प्रसुते QR 29c. च वरार्यरक्तं Q, बहुधार्यरक्तं W 30a. सौरिः Q 30c. गुरुदांत° C, गुरुदार° R 30d. प्रपूजितं साधुजनानवादै Q after 30 C adds हरौ शनिफलं, I adds इति सिंहराशिस्थः शन्युपरिदृष्टयः

कन्याश्रितः सूर्यसुतः प्रसूते
सूर्येण दृष्टः कफपित्तधानम् /
विद्याविहीनमृणवृत्तिभाजं
विहीनधर्मं च खलं मनुष्यम् //३१//
कन्याश्रितः सूर्यसुतः प्रसूते
चन्द्रेण दृष्टः प्रभया समेतम् /
नरं सुधर्मानुरतं नितान्तं
स्वैधर्मरक्तं प्रियसङ्गयुक्तम् //३२//
कन्याश्रितः सूर्यसुतः सुबाते
भौमेन दृष्टो ऽतिभृणं प्रसूते /
नरं प्रधानैः परिहीनमानं
सुनिष्ठुरं पापरतं कुबुद्धिम् //३३//
बुधेन दृष्टो रविजः सुबाते
नरं प्रशंसाभ्यधिकं सुरूपम् /
जनेषु पूज्यं सुधिया समेतं
कुलप्रधानं बहुबुद्धियुक्तम् //३४//
जीवेन दृष्टः प्रकरोति सौरिः
सदा सुशीलं भयवर्जिताङ्गम् /
गुणानुगं चैव तु शास्त्ररक्तं
प्रभूतलाभं जनवल्लभं च //३५//

31a. सुबाते T 31b-32a om. OS 31c-d. °मृण विहीन° om. Q 31c. तृण° ABCIW, वृण° R °वित्त° W 31d. च] सु° R 32a. सनाते R 32c. स्वधर्म° R 33a. प्रसूते Q 33b. तिरिणं AORST, तिरिंगं B, तिरिगां IW, तिरीम Q, तिरूजं C प्रसूते] कृम्नं Q 33c. प्रधानं W परहीन° BCIW, रतिहीन° Q °पानं AOS, यानं I, यानां C 33d. पापरतिं W च बुद्धि Q 34a. प्रसूते Q 34b. °भ्यधिकं S, °भ्युदिकं ABORT, °भ्युदिजं I, °भ्युदिजः C 35a-b. षष्ठे शनिः Q 35b. भय° om. Q, नय° ABCIORSTW °वृद्धिताङ्गं C 35c. गुणानुरागं प्रिय° CT गुणानुरं ABIORSW तु] पृय° R 35d. प्रसूत° Q जयनवल्लभं W

शुक्रेण दृष्टः प्रकरोति सौरः
कन्यां गतः कान्तिधिया समेतम् /
नरं हिरण्यार्थसमृद्धियुक्तं
प्रियं रतं पापजनानुषक्तम् //३६//
तुलाश्रितो धर्मसुतं सुजाते
प्रभूतमित्रं प्रचुरान्नपानम् /
सुरप्रियं ब्राह्मणदेवरक्तं
महाजनैः सेवितमिष्टभक्तम् //३७//
चन्द्रेण दृष्टः प्रकरोति सौर-
स्तुलाश्रितः सत्यदयासमेतम् /
प्रभूतवित्तं प्रचुरप्रभावं
हतद्विषं भृत्यसुतं सुरक्तम् //३८//
भौमेन दृष्टः प्रकरोति मन्दः
सरोगयुक्तं विकृतानुकारम् /
पित्तज्वरश्लेष्मभयार्तियुक्तं
दयाविहीनं गतमानलाभम् //३९//
बुधेन दृष्टो रविजः सुजाते
तुलाश्रितो हस्तिहयार्थभाजम् /
नरं विदग्धं नुतमेव लोकैः
सतामभीष्टं गुणवृद्धिरक्तम् //४०//

36a. सौरिः S 36b. कामां A 36d. प्रियेतरं W after 36 C adds कन्यायां शनिफलं, I adds इति कन्याराशिस्थशन्यपरिदृष्टिफलं
37a. तुलाश्रितो CW प्रसूते Q 37b. शनिर्यदा भास्करदृष्टदेहः Q
37c. प्रियंवदं W °देवभक्तं Q, °रक्तदेवं W 37d. महस्तनैः W
°नित्यभक्तं R 38a. सौरि° W 38d. हतद्वयं BIQ, हृतद्वयं h
हतव्ययं C for 39a-b Q has:

ं कुजदृष्टि
करोति जातं विकृतानकारी /

39b. विकृतानुकारि ABCIOS 39c. °श्लेष्ममया° S, °शृत्तेष्मभया° A
40a. प्रसूते Q 40b. हस्तिदया° ABCIOQRST 40c. विदग्धानुत° ABIORS, विदग्धानुग° CT, विदग्धौ नुत° Q
लोके Q 40d. °वृद्धियुक्तं T

जीवेन दृष्टः प्रकरोति मन्द-
स्तुलाश्रितो दानपरं मनुष्यम् /
स्वभावसौख्यं क्षमया समेतं
पतिप्रियं धर्मविशारदं च //४१//
शुक्रेण दृष्टः प्रकरोति मन्द-
स्तुलाश्रितः पार्थिवला[illegible] /
स्ववर्गपूज्यं परवर्गहीनं
दयाश्रितं शंसितमेव धीरैः //४२//
मन्दो ऽलिसंस्थो रविणा च दृष्टो
नरं प्रसूते कुटिलस्वभावम् /
विरक्तचौरं परसेवयाढ्यं
नृशंसकर्माणमधर्मशीलम् //४३//
चन्द्रेण दृष्टो रविजो ऽलिसंस्थः
सुवीर्यवित्तैश्च स्त्रिया समेतम् /
द्विजान्नरक्तं विविधान्नपानं
सुरक्षिताङ्गं द्विजदेवकृत्यैः //४४//
भौमेन दृष्टो रविजः प्रसूते
नरं सुतीक्ष्णं खलु वृश्चिकस्थः /
सदातुरं रुद्रवपुर्नितान्तं
निदेशरक्तं सुरुजासमेतम् //४५//

Q has the order: 41a, 42b–d, 42a, 41b–d. 41b. तुलाश्रितो] नृपपरं Q 41c. स्वभावसौर्यं CT रक्षया Q 41d धर्म° — 42c पर° om. AS 42c. परकार्यहीनं CT 42d. मेव वीरैः R, बुधीदारै Q after 42 C adds तुलराशिफलं, T adds इति तुलास्थे शनिफलं, I adds इति तुलाराशिस्थशस्यपरिदृष्टिफलं 43a. मंदेन संस्थो Q 43b. °स्वभावं Q 43c विरक्तभावं W °सेवनाढ्यं C, °सेवयाच्यं BW, °सेवज्ञाच्यं Q 44–49 om. W 44b. सुवीर्यवित्ताद्य R, सूविर्यविद्यास्तु Q 44c द्विजान्नरक्तं R विविधानुपानुयातुं Q 44d सुतप्रियं कामिनिवल्लभं च T, रतः प्रियं कामिनीवल्लभं च C 45c रौद्र° QRS, गैद्र° AO 45d. सरुजा° C

——————— //४६//

जीवेन दृष्टः खलु वृश्चिकस्थो
मन्दो विधत्ते गुणमानयुक्तम् ।
नरं निरीहं सुतदारसौख्यैः
समन्वितं यज्ञविधानरक्तम् //४७//

शुक्रेण दृष्टोऽलिगतश्च मन्दः
करोति लाभैः प्रचुरैः समेतम् ।
प्रियातिथिं वस्त्रविहीनभाजं
भयाधिकं कीर्तिधिया समेतम् //४८//

चापाश्रितः सूर्यसुतः प्रसूते
सूर्येण दृष्टः परिहीनसत्यम् ।
नरं क्रियाहीनमुरुप्ररोगं
रुग्व्याकुलं शास्त्रमतेन हीनम् //४९//

चन्द्रेण दृष्टः प्रकरोति मन्दो
नरं विशेषाचरितानुरक्तम् ।
सुधर्मशीलं बहुशास्त्ररक्तं
सुसंस्कृतं बान्धवभूमिपालैः //५०//

46 om. all MSS., but C has बुधेन दृष्टो रविजो ऽलिसंस्थो, I has बुधेन दृष्टो 47c. सत्वंतरासौख्यैः Q 48b. लाभैः T 48d. द्याधिकं S, याधिकं A कीर्तिदया° O after 48 CT add इति (om. C) वृश्चिकफलं, I adds इति वृश्चिकराशिस्थशनेः परिदृष्टि फलं 49c. गुरुप्ररोगं BCIT, गुरुप्रकोपं Q 49d युद्ध कुलं R शास्त्रसमेतहिनं Q

पापान्वितः सूर्यसुतो विलग्ने
    भौमेन दृष्टः सुधिया समेतम् /
सुनीतिरक्तं चतुरं प्रगल्भं
    धनप्रियं कान्तिविवर्जितं च //५१//
बुधेन दृष्टो रविजः प्रसूते
    पापान्वितस्तीर्थकरान्तरकम् /
नरं विनीतं सुधिया समेतं
    नृपप्रियं ब्राह्मणसंमतं च //५२//
जीवेन दृष्टो रविजो विलग्ने
    धनुर्धरस्थः सुतमित्रयुक्तम् /
नरं धनाढ्यप्रधानैः समेतं
    सदा विहीनं कुजनागमेन //५३//
शुक्रेण दृष्टो हयगः प्रसूते
    शनिः सुदातारमलोलुपं च /
नरं प्रतापप्रधानं प्रसह्यं
    प्रभूतवित्तं सततं निरीहम् //५४//
मन्दो मृगस्थो रविणा च दृष्टो
    नरं प्रसूते तनयार्तियुक्तम् /
विषादभाजं विजितं खलाद्यैः
    वीर्येण हीनं सततं भयार्तम् //५५//

51c. सुनीतियुक्तं C, सभातिरिक्तं W प्रगल्भं om. ABIOSW
51d. धनाप्रियं ABIS, गनाप्रियं O, प्रियं च सुमित्र° W
52b. °स्तीर्थकयान्तरकं QT 52d. नृपप्रियं Q 53c. धनाढ्यस्वधनैः T °प्रयनैः Q 54b. सदातार° OQT 54c. प्रतापप्रवनं S, प्रतापययनं A 54d. प्रसूत° R after 54 C adds धनफलं, I adds इति धनराशिस्थशन्यपरिदृष्टिफलं 55a. तनयार्ति° AS, नयार्ति° B, नमतार्ति° T, विनयार्ति° W 55c. विषाद्य° C, विषाज° I खलाद्यैः O 55d. भयार्तिं Q

चन्द्रेण दृष्टः प्रकरोति मन्दो
मृगाश्रितः प्राणयुतं मनुष्यम् ।
सुतार्थयुक्तं महिमासमेतं
विद्यानुरक्तं बहुवित्तभाजम् ॥५६॥
भौमेन दृष्टोऽर्कसुतो मृगस्थो
नरं विधत्ते व्रणरोगभाजम् ।
विहीनपक्षं क्षतजार्तदेहं
प्रपंचशीलं भयसंयुतं च ॥५७॥
बुधेन दृष्टो मकरे प्रसूते
मन्दो विधिज्ञं परमं प्रदक्षम् ।
गुणाधिकं कीर्तिसुखैः समेतं
सदानुरक्तं द्विजबान्धवानाम् ॥५८॥
मन्दः सुरेज्येन मृगेऽपि दृष्टः
प्रभूतवित्तं जनयेन्मनुष्यम् ।
नरेन्द्रपूज्यं सुतसौख्ययुक्तं
सतां प्रियं शीलधनैः सदैव ॥५९॥
शुक्रेण दृष्टो मकरेऽर्कसूनुः
करोति मर्त्यं धनसौख्ययुक्तम् ।
तेजोधिकं सत्यमुदारदानं
चित्तप्रसन्नं प्रणतं द्विजानाम् ॥६०॥

56b. त्रायसुतं W 56c. सुतीर्थ° W 57a. मकरे कैसून्° R
57b. रिण° ABCIORST, रण° Q, सृण W 58a. भौमेन W
58b. विधात्रं BIO, विधात्ते C 59a. मृगो BCISTW
प BCIT, ष QW 59d. शांतिप्रियं W. शीलधनं RW
60d. प्रसन्नचित्तं QW after 60 CT add मकरे शनि (मकर C)
फलं, I adds इति मकरराशिस्थशन्युपरिदृष्टिफलं

घटाश्रितो भास्करजः प्रसूते
सूर्येण दृष्टो ऽथ विहीनसत्त्वम् ।
विवर्जितं मानधनैः सकृष्टैः
स्त्रीणां स्वभावं सुहृदप्रयुक्तम् ॥६१॥
चन्द्रेण दृष्टो घटगः प्रसूते
मन्दो विहीनं रिपुभिर्मनुष्यम् ।
धर्मध्वजं दानपरं गतारिं
सदानरक्तं कृषिवित्तवर्गैः ॥६२॥
भौमेन दृष्टो घटगो ऽर्कसूनु-
र्नरं प्रसूते ऽर्थधनं सदैव ।
शिरोऽर्तिपित्तज्वरजैर्विकारैः
क्रुद्धं विरुद्धं गतसौहृदं च ॥६३॥
बुधेन दृष्टो घटगो ऽथ मन्दो
नरं विधत्ते विधनं मनुष्यम् ।
सत्याधिकं विद्याविधानदक्षं
सुरक्षकं देवगुरुद्विजानाम् ॥६४॥
जीवेन दृष्टो घटगो ऽथ मन्दो
नरं सवाते ऽर्थयशोनुरक्तम् ।
हितं गुरूणां विरुजं सदैव
प्रधानमुक्तं नृपकार्यदक्षम् ॥६५॥

61b. ऽर्थ° ABC °विहीः Q 61c. सकष्टैः W, सकुल्यैः R 61d. सुभावं R °प्रमुक्तं ORS, °प्रसक्तं Q
62a घटगः — 63a दृष्टो om. S 62d. कृषिवृत्ति° O
63d. कृद्धं R 64b. प्रसूते R विधानं BIQ 64c. वित्त° S, विज° T 65b. प्रसूते CQ ऽर्थयशोर्थयुक्तं C 65c. विहृजं I

शक्रेण दृष्टो घटगो ऽर्कसूनुः
करोति वित्तार्थयुतं मनुष्यम् ।
नरं गतार्थं घृणया समेतं
चारित्रशालं सततं च दुष्टम् ॥६६॥
मीनस्थितः सूर्यसुतो ऽर्कदृष्टो
नरं प्रसूते कठिनं कृतघ्नम् ।
विवेकहीनं गतबन्धुवर्गं
सदा[illegible]सूत्रं गतमित्र
चन्द्रेण दृष्टो झषगो ऽर्क
नरं प्रसूते विभवैः प्रधानैः ।
मुख्यं प्रगल्भं धनधान्यभाजं
विद्यादि[illegible] प्रीतिकरं जनानाम् ॥६८॥
भौमेन दृष्टो रविजः प्रसूते
मानाश्रितः शस्त्रभयार्तदेहम् ।
सरोगयुक्तं कृपणस्वभावं
पराजितं नीचजनेन नित्यम् ॥६९॥
बुधेन दृष्टः कुरुते ऽर्कसूनु-
र्मीनस्थितस्तीर्थरतैरुपेतम् ।
नरं प्रधानं स्वकुलस्य मध्ये
स्थिरस्वभावं गत[illegible]पापरूपम् ॥७०॥

66c. गतार्थि BI, गतार्तिं QW 66d. चारित्र° W च तुष्टं BCW, च तुष्टयं Q, मनुष्यं I after 66 C adds कुम्भे शनिफलं, I adds इति कुम्भराशिस्थशन्यपरिदृष्टिफलं 67b. कठिणं RS, कविणं A, करिणं BCIQW, वणि T कृतार्थं W 67c. °वर्गैः W 67d. गतमित्र° Q °दारैः W 69b. शास्त्र° I 69c. कुरोग° Q
70c सकलस्य W

जीवेन दृष्टः प्रकरोति मन्दो
नरं सवीर्याधिकमिष्टसत्त्वम् /
स्वाध्यैः समेतं विविधप्रधानं
पुरोगवं बान्धवसज्जनानाम् //७१//
शुक्रेण दृष्टो झषगः प्रसूते
मन्दो ऽधिमन्दं सततं मनुष्यम् /
सुधर्मशीलं विजितारिपक्षं
स्नुतं त्रिलोके विविधप्रतापम् //७२//
इति श्रीभृगुयवने शनैश्चरदर्शनचारः //

71c. विविधैः प्रधानं QRW, विधानधानं S, विधंमधानं A
71d. बांशव° S °सच्चतानां A 72b. विमंदं Q
72d. सुतं ABIORW, श्रुतं Q, सुतं S त्रिलोकै° CT, त्रिलोक्यां Q
°स्वतापं T, °तापं AS col. इति श्रीयवनजातकभाषाटीकायां
मगहीजीश्रीमोहनदासजीका[illegible]यां शनैश्चरदर्शनचार संपूर्णं Q
col. श्री° om. ABIOR; शनिदर्शन° R after col W adds
दृष्टिफलाध्याय: संपूर्णः

मूर्तिस्थितः संजनयेद्दिनेशो
नरं सरोगं विकलं महेर्ष्यम् ।
प्रभूतकोपं बहुशत्रुपक्षं
प्रभाविहीनं परतर्ककं च ॥१॥

द्वितीयसंस्थः कुरुते ऽर्थहीनं
सूर्यः प्रसिद्ध्या रहितं कृतघ्नम् ।
श्रद्धाविहीनं विगतस्वभावं
कुमित्रयुक्तं परवंचकं च ॥२॥

सूर्यस्तृतीयः कुरुते मनुष्यं
निरोगदेहं सतबन्धुहीनम् ।
परोपकारं प्रणतं प्रसिद्धं
विवेकविद्याभ्यधिकं सदैव ॥३॥

चतुर्थगः संजनयेत् कृतघ्नं
हिंस्रं सदा शीलविवर्जिताङ्गम् ।
स्त्रीभिर्जितं युद्धपरं कुदेहं
विवर्जितं सत्यधनेन नित्यम् ॥४॥

सुतस्थितः स्वल्पसुत प्रसूते
दिवाभिनाथः ऽणयेन हीनम् ।
कुकृत्यरक्तं व्यसनाभिभूतं
पित्ताधिकं भूरिविपक्षयुक्तम् ॥५॥

1b. महेच्छं W 1d प्रभाविहीनं T परतर्कुकं BR 2b. दिवाभिनाथो मनुजं AS सदैव T 2c. विगतप्रभावं S 3a. °स्तृतीये OQW 3b. अतीवरोगं C सुनयेन हीनं R 3c. प्रणवं CIORT, प्रवणं QW, निरतं S 4a. तुर्ये रवि जनयेत् Q 4b. हीस्त्रं B, हंस: R °विवर्जितं च QW 4c. °र्जितं W, °युतं B 5c. कुलन्वरक्तं T 5d. भूरिहतारिपक्षं S, भूरिविसर्पयुक्तं Q

रिपुस्थितो वासरपः प्रसूते
हतारिपक्षं पुरुषं सुरूपम् ।
विनीतवेषं सज्जनैः समेतं
प्रियातिथिं बान्धवसंमतं च ॥६॥
कलत्रगस्तीक्ष्णकरः प्रसूते
कुरूपदेहं कुकलत्रभाजम् ।
कफानिलाभ्यां परिपीडितं
कामार्तदेहं गतसौहृदं च ॥७॥
सूर्यः खलु
विदेशरक्तं पुरुषं प्रहीनम् ।
प्रपीडितं शूलप्रभवैश्च रोगै-
र्जनानुरागेण विवर्जितं च ॥८॥
धर्माश्रितस्तीक्ष्णकरः प्रसिद्धं
करोति मर्त्यं नृपतेरभीष्टम् ।
परोत्थवित्तेन सदा समेतं
निरस्तधर्मं मतिवर्जितं च ॥९॥
कर्माश्रितो वासरपः प्रसूते
सुकर्मभाजं विनयैः समेतम् ।
प्रभूतमित्रं सुभगं सकान्तं
नयाधिकं देवगुरुप्रभक्तम् ॥१०॥

6 om. S   6a-b. मनुष्यं करोति धूर्तं प्रणयेन हीनं A
6b. विनयेन युक्तं T   A substitutes 5c-d for 6c-d   8-9 om. C
8b. प्रलीनं S   8c. सुप्रभवैश्च ABCIQTW   8d. च om. S
9a. धर्मस्थित° W   प्रगल्भं C, प्रसूते W   9c. परोच्चवित्तेन W
9d. नीतिविवर्जितं W   10a. कर्मस्थितो W   10c. सुरगं BQR,
सुतगं I, सरभं W   10d. °प्रशक्तं C

लाभाश्रितः संजनयेद्दिनेशः
    प्रभूतलाभं सुभगं निरीहम् ।
सुभोजनाच्छादनवाहनाढ्यं
    प्रियंवदं कामविचक्षणं च ॥११॥
व्ययाश्रितः संजनयेद्दिनेशो
    व्ययैः समेतं कुजनोद्भवैश्च ।
प्रपीडितं वैरिभिरेव नित्यं
    कुकर्मरक्तं कुजनं तथैव ॥१२॥
मूर्तिस्थितो रात्रिपतिः प्रसूते
    संपूर्णबिंबः सुभगं सुकान्तम् ।
तीक्ष्णव्ययाङ्गं बहुपापयुक्तं
    विहीनपक्षं गतसौहृदं च ॥१३॥
द्वितीयसंस्थः कुरुते शशाङ्कः
    कोशान्वितं सर्वसमृद्धियुक्तम् ।
प्रियंवदं ब्राह्मणदेवभक्तं
    महाप्रभावं बहुसौहृदं च ॥१४॥
ताराधिपः संजनयेत्तृतीयः
    सरूपदेहं सुभगं मनोज्ञम् ।
स्त्रीवल्लभं सर्वकलासु दक्षं
    प्रजास्वभीष्टं बहुपुत्रपौत्रम् ॥१५॥

11b. व्ययैः समेतं लाभशुभं निरीहं W (cf. 12b.)   11c. °च्छादनवाहनानां BQ, °च्छादनानां W   after 12 CIT add इति रविफलं, W adds इति श्रीवृद्धयवने द्वादशभावे रविफलं   13c. तीक्ष्णकैर्व्ययांगं W   15a. तृतीये QW   15c. स्त्रीवत्सल Q

सुखस्थितः संजनयेच्छशाङ्कः
 प्रभूतसौख्यं पुरुषं प्रधानम् ।
स्त्रीणामभीष्टं गुरुदेवभक्तं
 नयप्रधानं गतवैररोगम् ॥१६॥
चन्द्रः सुतस्थः सततं प्रसूते
 विद्याधिकं ब्राह्मणदेवभक्तम् ।
शुद्धस्वभावं विजितारिपक्षं
 प्रियंवदं पार्थिववल्लभं च ॥१७॥
षष्ठः शशाङ्कः कुरुते ऽल्पजीवं
 रोगाधिकं शत्रुनिपीडिताङ्गम् ।
कुरूपदेहं कधिया समेतं
 सौख्यैर्विहीनं परवंचकं च ॥१८॥
कलत्रगः संजनयेच्छशाङ्को
 धर्मध्वजं भूरिदयासमेतम् ।
प्रसन्नमूर्तिं विभवान्वितं च
 प्रख्यातकीर्तिं सुधिया समेतम् ॥१९॥
चन्द्रो ऽष्टमस्थः कुरुते ऽल्पवीर्यं
 स्वल्पायुषं सत्यदयाविहीनम् ।
स्नेहैर्विहीनं परदाररक्तं
 वृथाटनं बान्धववर्जितं च ॥२०॥

16d. गतबाजिसुकं वैरोग A, गतबाजियुक्तं S 17a. सततं] ससुतं R
18a. ल्पनीचं S 18c. कुत्रिया O 18d. नरवंचकं B, परपंचकं Q
20b. सत्यदयासमेतं Q 20c. स्तेयै° AS

धर्माश्रितः संजनयेच्छशाङ्कः
प्रभूतमित्रं प्रभुरान्नपानम् /
प्रसिद्धियुक्तं प्रणतारिपक्षं
प्रशंसितं साधुजनेन नित्यम् //२१//
आकाशसंस्थः कुरुते शशाङ्को
भूपप्रियं बान्धवमानपुष्टम् /
प्रियातिथिं प्रीतिकरं गुरूणां
सदैव भक्तं वरदेवतानाम् //२२//
लाभाश्रितः संजनये ——— द्विमांशुः
प्रभूतलाभं खलु शीतरश्मिः /
सरूपदेहं सज्जनान्तरक-
दारैर्भित्तं हतशत्रुपक्षम् //२३//
व्ययाश्रितः शीतकरः प्रसूते
व्ययैरनिष्टैः सहितं कृतघ्नम् /
वैरप्रधानं बहुशत्रुपक्षं
स्वल्पायुषं सत्यविहीनवेषम् //२४//
होराश्रितो भूतनयः प्रसूते
रक्तोत्थरोगैः परिपीडिताङ्गम् /
पित्तानिलाभ्यां सहितं कुरूपं
विहीनशक्तिं मतिवर्जितं च //२५//

21a. °च्छशांकः] °मनुष्यं T   21c. प्रसिद्ध° BCIOT   प्रलतारि° O
22b. °मानतुष्टं T   22d. द्विजदेवतानां AS   22d °देवतानां
— 23c सरूप° om. I, but   23a गृ — 24d and
22d °वतानां — 24d repeated after 23d.   23a °दिदंगु R,
°दि – गु IO, °दंगु B, °दि A,   °दिहैव Q, °देगीश S
°द्वितिशं T, °मनष्यं S   23b. प्रसूत° Q   after 24 C adds
इति १२भावे चंद्रफलं, I adds इति चंद्रभावः, T adds इति
चंद्रफलं, W adds इति श्रीवृद्धयवने चंद्रद्वादशभावः संपूर्णः
25a. भजनयः O   25b–26a om. Q   25b. परपीडितांगं BCI

धनस्थितो भूतनयः प्रसूते
धनैर्विहीनं जनताविरूपम् ।
कठोरवाक्यानिरतं कुबुद्धिं
प्रभावहीनं गतसौहृदं च ॥२६॥
करोति भौमः सहजाश्रितश्च
निरोगदेहं विजयप्रधानम् ।
नरेन्द्रमानान्वितमिष्टधर्मं
प्रभूतकोपं सततं सुदान्तम् ॥२७॥
सुखस्थितः संजनयेच्च वक्रः
सखैर्विहीनं हृतवीर्यमेव ।
सुबुद्धिहीनं गतबन्धुवर्गं
व्ययाश्रितं कामपरं मनुष्यम् ॥२८॥
कान्ताश्रमं क्लेशसहं विनीतं
न्वितं धर्मपरायणं च //४७//
चेष्टाबलाढ्यः प्रकरोति भौमो
नरं प्रसूते सततं कुचेष्टम् /
हितानुकूलं सुहृदां सतां च
नैपुण्ययुक्तं निपुणं क्रियासु //४८//
भौमो यदा रात्रिबलेन युक्त-
स्तदा प्रसूते सुभगं मनुष्यम् /
आरामवापीकरणानुरक्तं
स्त्रीलाभयुक्तं प्रचुरान्नयुक्तम् //४९//

45b नृपामांस° TU 46b–47a om. I 46c °गोजाति° T
47a °मक्तः L, °दुष्टः R 47b–48a om. T 47b प्रसूते] सुदान्तं Q
द्विजदेवभक्तं L कुशीलं R 49c °करुणानु° CL 49d
°रान्नपानं Q, °रान्नवस्त्रं R

स्ववारवीर्यप्रबलो महीज:
स्मृतिश्रुताचारमतिं सशीलम् ।
नरं सुवाते बहुभोगभाजं
कान्तं प्रियं स्थानविलेपनं च ॥५०॥
होरावलाढ्य: प्रकरोति भौमो
नरं नितान्तं स्मृतिशास्त्रविज्ञम् ।
प्रभूतगोभूमिसुताङ्गनाढ्यं
प्रियंवदं सर्वसहं मनुष्यम् ॥५१॥
प्रख्यातमत्यन्तसुखोपभोगं
जितारिमारेचकसाधदारम् ।
स्वमासवीर्येण यतो महीजो
नरं विधत्ते दयितं नृपाणाम् ॥५२॥
आरो यदा वर्षबलेन युक्त:
करोति मर्त्यं धनधान्ययुक्तम् ।
हृतत्विषं तद्दिपरं सहिष्णुं
प्रियंवदं सर्वजनानुकूलम् ॥५३॥
भौमो यदा पक्षबलेन पुष्ट-
स्तदा प्रसूते विगतारिपक्षम् ।
प्रभुं प्रसिद्धं द्युतिमानयुक्तं
शूरं धनाढ्यं स्वकुलप्रधानम् ॥५४॥

50b. स्मृतिस्तुता° Q, श्रुती:स्मृति° I   50c. प्रसूते बहुरोग° Q
50d. कीर्ति° L   51b स्मृत° Q, मृति° L, शृति° R   °वित्तं SW
52a. °मल्पंत° BW   52c. स्वस्वामि° ABCILOQRSTUW   जतो·
सतो I   52d. नराणां S   53c. हेम° AS   °द्विषं R   रुचि° W
54a. पुष्टि- O, युक्त- W   54c. प्रसिद्धिं R   द्युत° ABCOQTUW,
सुत° S   54d. सकुलं W

भौमो यदा मित्रबलेन हीन-
स्तदा कुमित्रं जनयेन्मनुष्यम् ।
खलं कुरूपं धनधान्यहीनं
देवद्विजानां च तथा विरक्तम् ॥५५॥
स्वक्षेत्रवीर्येण विवर्जितस्तु
भौमो ऽतिकष्टं विदधाति मर्त्यम् ।
स्त्रीवल्लभं बन्धुजनव्यपेतं
गतार्थशोकं विजितं विपक्षैः ॥५६॥
स्त्रीपानदोषप्रभवैरनर्थ-
व्ययादिदोषैः कलहैर्विचित्रैः ।
संपीड्यते सर्वजनैर्मनुष्यो
भौमो यदा तुङ्गबलेन हीनः ॥५७॥
स्वांशवीर्येण विवर्जितस्तु
भौमः प्रसूते सरुजं मनुष्यम् ।
प्रपीडितं शत्रुकृतैर्विकारैः
पराभवैर्मित्रकृतैस्तथैव ॥५८॥
शुभग्रहालोकनवीर्यहीनः
करोति मर्त्यं विकृताङ्गमेव ।
विमुक्तधर्मं सहजापरक्तं
विगर्हितं शीलपरिच्युतं च ॥५९॥

55a सौमो A 55a मित्र°—55b कु° om. A 57a. स्त्रीयान° ABCILOQRS 57c संपीपते TU 58b सहजं T, शत्रुजं Q 58c. शत्रकृतं R 59b. विषितांग° L 59c. सहजापरघ्नं L, सहजाविमुक्तं C 59d. °परं च्युतं Q च om. C |

स्वक्षेत्रवीर्यप्रविवर्जितस्तु
भौमः प्रसूते
हिंसापरं बहुणशून्यकोशं
श्रिया विमुक्तं रतिहीनसौख्यम् ॥६०॥
आशाबलेनैव विवर्जितस्तु
भौमः प्रसूते ह्यधनं मनुष्यम् ।
वृद्धाङ्गनासेवनमध्यशीलं
परार्थचेष्टास्वतिकष्टभाजम् ॥६१॥
हृद्रोगिणं दुर्बलदेहयन्त्रं
मूर्छास्मृतिं नीचपरिग्रहं च ।
बले न प्रविवर्जितस्तु
भौमः प्रसूते विगताभिमानम् ॥६२॥
विमुक्तधर्मं विगतप्रभावं
द्यूतप्रियं पापरतं कुशीलम् ।
सदा विहीनः प्रकरोति मर्त्यं
भौमः सदा शत्रुनिमर्दितं च ॥६३॥
स्वबारवीर्यप्रविवर्जितस्तु
भौमः प्रसूते विकृतं मनुष्यम् ।
स्नानोपभोगाभरणादिबाह्यं
पराङ्गनोपासनकर्मशीलम् ॥६४॥

60a. °प्रति° C °वर्जितश्च W 60c. बहुण° BCILQTUW
60d. प्रिया° O विहीनं T (61a विवर्जितश्च W) 61b-64a om. W 61b. वधनं I, निधनं BLQ, रधनं R 61c. °सेवनधर्मशीलं T
62a. हृद्रो° C, चुद्रो° ABILOQRS °देहवरं B, °देहवारं L, °देहभाजं Q, °देहयुक्तं O, देह - I 62b. मर्छाधिका Q, मूटस्मृति C 62c. प्रति° C 63c-d भौमो नरं 63d. शत्रुभिरर्दितं R 64c. °नाढ्यं ABCOR, °नाढ्यं I, °काढ्यं Q, °वाद्यं LTU, °बंध्यं S

राङ्गनासङ्गमसक्तभाव्यं
चौरत्वं वसुदारणं च /
होराबलैर्हीन... श्च भौमः
करोति मर्त्यं व्यसनैः समेतम् ॥६५॥
द्वेष्यं जगत्यद्भुतवेषचेष्टं
विहीनसत्त्वं सुखलं कृतघ्नम् /
भौमो यदा मासबलेन हीन-
स्तदा प्रसूते सरुजं मनुष्यम् ॥६६॥
अनात्मजं कर्मविपन्नदारं
पापोद्यतं धर्मफलव्यपेतम् /
करोति भौमोऽब्दबलेन हीनो
नरं नितान्तं प्रियसाहसं च ॥६७॥
शठं परोपासनसङ्ग्रहेप्सुं
सुहृद्द्रुमं स्त्रीगमनोत्सुकं च /
स्वपक्षवीर्येण विवर्जितस्ते
भौमः प्रसूतेऽतिविकर्मशीलम् ॥६८॥
इति श्रीवृद्धयवने भौमचारः ॥

65a °सक्तमसक्त° S °मस्वक्त° TU °भाषं COR, °भाजं L, °भावं QW 65b °हारिणं SW, °दारणं L, °दारुणं Q 65c °बलो ABCILORTU, °बले CW, °बलै Q हीनतरश्च W, वर्जित एव Q 5sd. व्यसनैरुपेतं C 66a द्वेषं ABCLSTUW, द्वेषां I, द्वैषं Q, वेष्यं R जगत्त्रद्भुत CO, जगत्त्रद्भुत° BLU, जगत्त्रद्भुत° R, जगत्त्रद्भुत° S, जगत्यद्भुत° W, जगत्त्रयेद्भुत° A, सभौमास Q °लेशचेष्टं BL, °विशचेष्टं W, वेशचेष्टं R, सततं न चेष्ट Q 66b °सत्व Q, °मर्त्यं S नकलं BL, च सलं Q 66c हीन om. O 66d सहजं S 67a °विपन्न° W °हारं S 68a शत्र W °संग्रहेत्स Q, संग्रहेत् B, संग्रहेष ITW, संग्रहेश U, संग्रहे A, °संग्रहेच्छ S, संग्रहालं C 68b सुहृद्द्रुमो ABCILQRSUW 68b °नोत्सुलं QR, नोन्मखं T col. इति श्रीवृद्धयवनभाषाटीकायां नगहीजीमोहनदासजीकारितायां भौमचारः Q col. श्री° om. ABIORSTU after col. W adds संपूर्णः

मेषं गतस्त्विन्दुसुता
कुर्यात् कृशं बह्वटनं शठं च /
मिथ्याभिलापं प्रियविग्रहास्त्रं
नारिश्रमोत्पन्नविपन्नचित्तम् //1//
वृषं गतेस्तु पृथुपीनकान्तं
बुधो नरं त्यागिनमिष्टदारम् /
गान्धर्वलीलारतिहास्यशीलं
दक्षं प्रगल्भं प्रियवल्गवाक्यम् //2//
बुधः प्रसूते मिथुने सुवाक्यं
नरं प्रियाभाषणमिष्टवेशम् /
शिल्पश्रुतिज्ञानकलाविदग्धं
विकत्थनं मानिनमूर्जितं च //3//
चतुर्थराशौ तु शशाङ्कसून-
स्तिष्ठन् विदेशाभिरतं प्रसूते /
शास्त्रं कविं स्त्रीरतिगेयवित्तं
बह्विक्रियासक्तमनस्विनं च //4//
बुधो नरं सिंहमुपेत्य
दल्पस्मृतिं ज्ञानकलावियुक्तम् /
उत्साहसत्त्वस्थितिवित्तहीनं
जगत्यतिज्ञातमसत्यवाक्यम् //5//

1-12 om. L 1a. गतो विंद॰ BI, गतो ह्यड॰ W 1b कुर्याच्छठं Q शावं STU, शतं W, कृशां Q 1c ॰प्रतापं C, ॰केलापं T ॰विग्रहं च W 1d ॰श्रमोत्पंत॰ ACOTU ॰वित्तं QR 2a ॰वीन॰ ABCIOQSTU 2c गांधर्वताला॰ W, गांधर्वविद्या॰ Q ॰हास्यशल्यं T 3b. ॰मिष्टवेशां R 3c. ॰यृति॰ B, ॰सृति॰ C, ॰स्मृति॰ Q ॰विधिज्ञं R 3d. विकत्थनं B, विकछनं Q मान्यसपूजितं W 4c. स्त्रीनति॰ ORS, स्त्रीनभि॰ ITU, स्त्रीनवाभि॰ Q, स्त्रीष्वभि॰ W ॰गोयवित्तं O, ॰ज्ञेयवित्तं S, ॰युक्तचित्तं W, गेयचि Q 5b. ॰ल्पास्मृतिं ABCOSU ॰विमुक्तं C 5c. ॰सत्य॰ T 5d. ॰त्यवज्ञात॰ W ॰सत्ववाक्यं AC

कन्यामपत्य प्रभवं प्रसूते
मेधाप्रियं वाग्मिनमिन्दुसूनुः ।
आलेख्यलेख्यश्रुतिकाव्यवित्तं
विज्ञानशिल्पादिविमिश्रितं च ॥६॥
तुलाधरे शिल्पविवादवन्तं
बुधो विधत्ते चपलं † प्रसूते ।
शठप्रचार कृतकोपचार
पण्याक्रियोपायविधानदक्षम् ॥७॥
बुधो नरं वृश्चिकमेत्य कुर्या-
दमर्षदुःखश्रमशोकतप्तम् ।
विद्विष्टकर्माणमसाधुशीलं
पारुष्यदम्भच्छलनिश्चितं च ॥८॥
धनुर्धरस्थस्तु बुधो मनुष्यं
विख्यातशब्दं जनयत्युदारम् ।
शास्त्रार्थशिल्पश्रुतिशौर्ययुक्तं
मेधाविनं वाक्यविशारदं च ॥९॥
बुधो मृगस्थो जनयत्यनर्थं
नीचं परप्रेष्यमसत्यचेष्टम् ।
मूर्खं कलाशिल्पगुणैर्विहीनं
निरुद्यमस्थं पिशुनस्वभावम् ॥१०॥

6c. °शृति° C, °स्मृति° Q °मित्तं CQW 6d. च om. A 7a. °विवादजातो ABCIRSTUW, °विवादजाते O, °विवाददक्षं Q 7b. विधत्ते] प्रसूते Q प्रसूतं Q, विधत्ते C 7d. पण° R °क्रियं पाप° W 8c. °मेव CR 8d. °दम्भछल° BQ, °दम्भढल° W, R, °दर्पंछल° TU, °दर्पच्छल° C, °दकछल° A, °दं वै छल° S 9c. °शृति° B, °सृति° C, °स्मृति° QW 10c. °शिल्प° ABICTU 10d. निरुद्यमत्वं T, निरुद्धसस्थं R, निरुद्धसंस्थं W, विरुद्धसंस्थं Q, निरुद्धासस्थं B, निरूपमस्थं S

कुम्भे तु सौम्यः शुचिशीलहीनं
नरं प्रसूते परिभूतमन्यैः /
वाग्बुद्धिकर्मोपहतं हताशं
प्रहीनलज्जं रतिदुर्भगं च //११//
मीनद्वयस्थस्तु बुधो मनुष्य-
माचारशौचाभिरतं प्रसूते /
देशानुगं वाङ्मिनकर्मसाध्यं
दरिद्रमिष्टप्रजमल्पमिष्टम् //१२//
होरां बुधो वासरपस्य यात-
स्तीव्रं खलं कामपरं विशीलम् /
गतप्रतापं बहुपापरक्तं
देवद्विजानां परिनिन्दकं च //१३//
होरां गतो रात्रिपतेस्तु सौम्यो
नरं प्रसूते सुभगं सुशीलम् /
विशिष्टवाग्बुद्धिगुणं नयज्ञं
प्रियातिथिं नित्यमुदारचेष्टम् //१४//
त्र्यंशे बुधो वासरपस्य तिष्ठन्
नरं प्रसूते परिवादयुक्तम् /
क्रूरं हतारिं स्मरणं कुरूपं
कूटानुरक्तं च सदा सकामम् //१५//

11a. सौम्य - चि° B, सौम्यो हि वि° Q, सौम्यस्यनु° W 11b. °मन्यं ABCQTU, °मन्यं S, °मान्यं W 11c. हृताशं T 11d. मति° W °दुर्यलं A, °दुर्बलं S 12c. वाष्मिनः T° BCIW, जन्मन° Q 12d. °मल्पप्रजमिष्टदारं R L begins again with 13 13b. गलं L, रलं T, बलं W, इलं U, शठं R विशालं CLW 13d. पर° LQ °नंदकं BC 14a. °पतिस्तु T 15a रात्रिपतिस्य L 15b–16a om. U 15b. परवाद° L °मुक्तं I 15c. हताशं R शरणं S, मरणं W, सरिणं R कुरूपं R, षुरूपं T 15d. सकर्म Q

त्र्यंशे बुधो राशि
नरं प्रसूते विगतारिपक्षम् /
शुश्रूषकं देवगुरुद्विजानां
कुलप्रधानं बहुपुत्रयुक्तम् //१६//
बुधो यदा भूमिसुतस्य संस्थो
भागे तृतीये प्रकरोति मर्त्यम् /
माङ्गल्यधर्मं श्रुतिधर्मबाह्यं
स्वबन्धमानं संपदा वियुक्तम् //१७//
स्ववह्निभागेन्दुसुतः सुवाते
सुरूपदेहं सुभगं मनुष्यम् /
यज्ञव्रतादिष्वनुरक्तचेष्टं
दातारमार्यं बहुमित्रपक्षम् //१८//
तृतीयभागे सुरपूजितस्य
बुधो विधत्ते प्रसभं मनुष्यम् /
स्त्रीवल्लभं शास्त्रमलंघ्यवीर्यं
प्रभूतकोशं विविधार्थयुक्तम् //१९//
भागे तृतीये शशिजः सितस्य
तक्षन् प्रसूते सुविदग्धमेव /
मर्त्यं महाधामनिधिं गतारिं
प्रसन्नचित्तं नृपवल्लभं च //२०//

16a. त्रिंशे LO, अंशे ABCTU प्रजातो O 16d om. BLR; Q has भक्तिक्रियाणां सुभगं मनुष्यं, W has भूमिहिरण्याम्बररत्नलाभं 17c. शृति° C, स्मृति° Q 17d. स्वबंधुमान् ABCI, बंधुमान् U, स्वबंधुवा R स्वल्पयदा → वियुक्तं AIO, स्वल्पयदा विमुक्तं C, स्वल्पपदा वियुक्तं STU, शल्पयदा वियुक्तं R, स्वल्पयुक्तं BL, स्वल्पयुक्तं W, सततं करं नृपाणां Q 18a. स्वबंधत्रिभागे° L, स्ववह्निर्विभागे° W प्रसूते Q 18b. स्वरूप° L स्वभगं L 18c. °व्रतादिष्व° CLTU, °व्रतादेष्व° Q, °व्रतादेस्त्व W °नुरूप° BW, L, °रणैक° Q °चित्तं S 18d. °मार्यं BL, °मार्यां C, °माढ्यं I, °माड्यं Q °मित्रयुक्तं Q 19b. प्रसन्नं LW, सुभगं C 19c. शान्त° ABCILRW, शुद्ध° S, साधु° Q, स्यात° TU 20 [illegible] BLW 20d. प्रसौभवित्तं L, प्रकृष्टवित्तं Q

त्र्यंशे शनेः सोमसुतः प्रयातः
 करोति मर्त्यं सघृणं
विषादिनं दुर्बलदेहसत्त्वं
 प्रवासिनं विक्रयविग्रहं च ॥२१॥
चरन् = ंशे दिनपस्य सौ:
 करोति पापं विकृतं मनुष्यम् ।
स्त्रीदुर्भगं बन्धुजनैर्विमुक्तं
 प्रसक्तशीलं हतशक्तिदर्पम् ॥२२॥
चन्द्रांशके स्यात् नवमे यदैन्दव-
 स्तदा विधत्ते सुसुखं नता
ख्यातं वपुष्मन्तमुदारचेष्टं
 नेतारमीड्यं सुहृदां सतां च ॥२३॥
नवांशके भूमिसुतस्य सौम्यो
 नरं विधत्ते रुधिरार्तदेहम् ।
विकर्मशीलं सुहृदामभीष्टं
 द्वेष्यं खलं पार्थिवपीडितं च ॥२४॥
नवांशके स्वे प्रकरोति सौम्यः
 सौम्यं सुरूपं सुभगं मनुष्यम् ।
देवद्विजातिप्रणतं प्रसन्नं
 प्रियातिथिं ब्राह्मणसंमतं च ॥२५॥

21a. त्रिंशे O प्रजातो O 21b. मर्त्यं om. U, नित्यं ORS सारं ABCILOQRTW, ०णं U 21c. विषार्दित C, विष्यादितं A ०रुः BILQTW 21d. विग्रहविक्रयं R 22a. भौम: Q 22c. ०र्वियुक्तं TU 22d. हति° O, हत्न° TU 23a. विधो: नवांशे च यदा बुधस्येत् S 23a. यदैन्दु° IQW, यदेन्दु° ACOTU, यदैदं BL, यदादी° R 23b. सुखिनं LQW, त्यसुखं O 23c. वपुष्यंत° IG 23d. °मीड्यं B सतं LR 24c. °मनिष्टं R 24d. पापनि° L °मीहितं S 25b. स्वरूपं L 25c. °प्रणतं om. A, प्रणवं CL, प्रवणं BIOQRTUW प्रसिद्धं T 25d. सर्वजनानुकूलं R

नवांशकस्थः सुरपूजितस्य
    सौम्यः प्रसूते सुखिनं मनुष्यम् ।
नानार्थलाभं प्रचुरप्रतापं
    सुमित्रकं प्रचुरं सुशीलम् ॥२६॥
शुक्रस्य भागे नवमे बुधस्तु
    करोति मर्त्यं विविधार्थयुक्तम् ।
प्रभूतामत्र द्विजपूजनासु
    सुतान्वितं नित्यमुदारचेष्टम् ॥२७॥
सौरस्य भागे नवमे च तिष्ठन्
    करोति सौम्यो ऽतिरुजं मनुष्यम् ।
कुशिल्पिनं साधुगुणैरयोग्यं
    पराङ्गनासक्तमनर्थयुक्तम् ॥२८॥
सूर्यांशकस्थो विदधाति सौम्यो
    नृणां रवेः पापमतिं न सौख्यम् ।
कुमित्रसङ्गं रिपुपक्षवृद्धिं
    यशो[illegible]ं मतसंशयं च ॥२९॥
सूर्यांशके शीतकरस्य [illegible]
    नरं विधत्ते वि[illegible]तापम् ।
सतार्थयुक्तं रतिसौख्यभाजं
    विशिष्टशीलं विनयैः समेतम् ॥३०॥

26d प्रचुरं —27b om. I   26d प्रचुरं] सुभगं Q, सततं R   27a. बुधश्च L, बुधस्य: W   27c. °पूजनेषु S, °पूजनेषु LW, °पूजनेसु O, °पूजनेसूं Q   28b. निरुजं IS   28c. कुशिल्पनं BQ, कुशीलिनं W °गणैर° O   28d. वरांगना° L   °योग्यं T   29b. °मतिमसौख्यं W 30b विधत्ते om. A   30c. सुतीर्थमुक्तं W   रत° R   °युक्तं Q

सूर्यांशके भूमिसुतस्य सौम्यो
    नरं विधत्ते ऽतिशठं विशीलम् /
गतश्रियं बन्धुजनेन नित्यं
    पापात्मकं रोगसमन्वितं च //३१//
सूर्यांशके स्वे प्रकरोति सौम्यो
    नरं [illegible] शास्त्ररतं सदैव /
कलासु दक्षं प्रणतारिपक्षं
    जितेन्द्रियं श्लाघ्यतमं सदैव //३२//
सूर्यांशके देवगुरोर्हितस्य
    सौम्यः प्रसूते सुतरां सुशीलम् /
मर्त्यं महावृत्तविवृद्धियुक्तं
    प्रियातिथिं धर्मपरं सदैव //३३//
सूर्यांशके भार्गव एव सौम्यः
    करोति मर्त्यं प्रचुरान्नकोशम् /
नृपप्रियं साधुजनानुरक्तं
    सद्धर्मशीलं बहुपुण्यसौख्यम् //३४//
सूर्यांशके सूर्यसुतस्य सौम्यः
    करोति [illegible] /
व्यपेतशीलं बहुरोगयुक्तं
    [illegible] च //३[illegible]//

31a सौम्यो [illegible] 31[illegible] विशाले I 31[illegible]
रक्तं L [illegible] om. B[illegible], बहुधर्मशील Q 3[illegible]
नितरां Q 33 om. W 33c. °वृत्ति° CTU, °वृत्य° Q
°विवृद्ध° ABIORS, °विघट्ट° L °थट्टं R 33d–35c om. L
34c. °प्रियातिधनु° A, °प्रियं सत्य° S, °प्रियं सानु° C 34d. °सौख्यं Q

सूर्यांशके वासरपस्य सौम्यो
नरं प्रसूते कुटिलं कुशीलम् /
कुकर्मरक्तं कुजनप्रसक्तं
कुस्त्रीषु रक्तं नृपमानयुक्तम् //३५A//
सूर्यांशकस्थः शशिनश्च सौम्यो
नरं प्रसूते सुतमानयुक्तम् /
श्रियाधिकं कान्तियुतं सुशीलं
प्रपन्नमित्रं परदाररक्तम् //३५B//
सूर्यांशके भूमिसुतस्य मर्त्यं
सौम्यः प्रसूते निरुजाभितप्तम् /
विनार्थयुक्तं विगतप्रतापं
पाखण्डिनं दुर्जनवल्लभं च //३५C//
भसूर्यभागे विचरन् बुधस्तु
सुरूपमेव प्रकरोति मर्त्यम् /
नृपप्रियं सत्यरतं सुवाक्यं
सदानुकूलं द्विजदेवताभ्यः //३५D//
सूर्यांशके देवपुरोहितस्य
बुधः प्रसूते सुभगं मनुष्यम् /
विद्याविनीतं बहुशास्त्ररक्तं
विवेकिनं विप्रमतिं प्रगल्भम् //३५E//

35A–35G om. Q   35Ab–35Ba om. BIL   35Ab कुशीलं om. A, सुशीलं C   35Ac °प्रयुक्तं W   35Ad नृपयान° ACORS   35Ba शशिजस्य W   35Bb सुतयान° U   35Bc श्रियाधिकं TU   35Bd–35Cc om. T   35Bd प्रसन्न° LW   परनाश° R   °युक्तं W, °दत्तं R   35Ca-b सौम्यो मर्त्यं R   for 35Cc there is substituted 35Bc (with श्रियाधिकं) in CU   35Cc विनार्थसौख्यं R, विहीनवित्तं W   35Cd दुर्भगवल्लभं I   35Db स्वरूप° L   35Dd °देवतानां SW   35Eb–35Fa om. T   35Ec बहुवस्त्र° S

सूर्यांशके दैत्यपुरोहितस्य
    बुधो विधत्ते बहुलाभयुक्तम् /
स्त्रीसौख्ययुक्तं प्रणतारिपक्षं
    सुवर्चसां सादितमल्पशत्रुम् //३५F//
रौद्रं सुकृष्णं सततं कुचै
    मालस्रुच पापरत सदैव /
सूर्यांशके सूर्यसुतस्य सौम्यो
    नरं विधत्ते ऽतिखलं कृतघ्नम् //३५G//]
त्रिंशल्लवस्थो ऽवनिजस्य सौम्यो
    नरं प्रसूते कठिनं कुरूपम् /
सतार्थहीनं व्यसनैरुपेतं
    पराङ्मुखं देवगुरुद्विजानाम् //३६//
त्रिंशल्लवस्थो ऽर्कसुतस्य सौम्यः
    करोति तिष्ठन् परतर्ककं च /
रौद्रक्रियासक्तमतिं प्रचण्डं
    द्यूतप्रियं व्याधिभिरर्दितं च //३७//
चन्द्रात्मजो देवपुरोहितस्य
    त्रिंशांशकस्थः प्रकरोति धीरम् /
सदा विनीतं गुणिनामभीष्टं
    स्वब· पूज्यं कुलसत्तमं च //३८//

35Fd. सादितसर्वशत्रुं W   35Ga. सकृष्णं ILRSU   36c. सुतीर्थ°
37b तिष्ठन्] नूनं Q   °तर्कुकं ACOR   37c °कृयाशक्ति° L
37d. °रोर्दितांगं R, °राधितं च Q, °रेधितं च W   38c. गुणना° BCI
38d. कुलसंपद W, कुलसंमतं Q, गुणसंमत L

त्रिंशांशके स्वे शशिसूनुरेव
    प्रतार्थयुक्तं मनुजं सुवाते /
गुणैर्भुवि ख्यातमलंघ्यवीर्यं
    प्रसन्नमूर्तिं सततं सुशीलम् //३९//
त्रिंशक्कवे दानवपूजितस्य
    सौम्यो विधत्ते प्रचुरप्रतापम् /
प्रभुं परक्षेत्रतथाधनानां
    प्रदानशीलं सुकलत्रयुक्तम् //४०//
स्वमित्रवीर्येण युतस्तु सौम्यः
    करोति मर्त्यं बहुमित्रयुक्तम् /
प्रदानशीलं गुरुदेवभक्तं
    सुश्रूषकं साधुजनं सदैव //४१//
सौम्यो यदा क्षेत्रबलेन युक्तः
    करोति मर्त्यं प्रियमेन लोके /
स्थिरक्रियारम्भजनस्वभावं
    विख्यातशब्दं दृढमित्रपक्षम् //४२//
स्वतुङ्गवीर्येण युतस्तु सौम्यो
    नरं विधत्ते प्रमदास्वभीष्टम् /
[प्रदानशीलं गुरुदेवभक्तं
    सुश्रूषकं साधुजनस्य नित्यम् //४३//]

39b प्रसूते Q   39d. सुनतं S   कुशीलं ABCLOQRSTUW
40c. परंक्षेत्रप्ररूधाधनानां W   40d–41b om. CTU
41d om. C   42a मदा प्रवसेन L   42c °जन° om. O   42d. °युक्तं W   43b–44a om. W   43b. प्रसूते C   43c–d repeated from 41c–d.

नवांशवीर्येण युतस्तु सौः
नरं प्रसूते सततं मनोज्ञम् ।
शुचिं क्षमासत्यरतं कृतज्ञं
मनस्विनं सर्वसुखाधिवासम् ॥४४॥
शुभग्रहालोकनवीर्ययुक्तः
करोति सौम्यः प्रणतं मनुष्यम् ।
शूरं बहुक्लेशसहं रतज्ञं
नृपप्रियं पुण्यमतिं सदैव ॥४५॥
विज्ञानशास्त्रश्रुतकाव्यशिल्प-
गान्धर्वसङ्गीतकलाभिरामम् ।
पुंवीर्ययुक्तः प्रकरोति सौम्यो
कीर्तिम् ॥४६॥
दाक्षिण्यसाहादविलासहास्य-
सौभाग्यचातुर्यगुणैरुपेतम् ।
अशाबलाढ्यः प्रकरोति सौम्यः
प्रसन्नमूर्तिं प्रथितं पृथिव्याम् ॥४७॥
चेष्टाबलाढ्यः प्रकरोति सौम्यः
स्त्रीवल्लभं भूपयुतं मनुष्यम् ।
स्वाचारधर्मप्रचुरं प्रगल्भं
सत्याधिकं नीतिपरं सदैव ॥४८॥

44c °सत्व° BCILQTU °युतं Q 44d सर्वसुसाधिव° Q, सर्वसुधा° A, युधा-- S 45c रतिज्ञं S, रतच्चं L, रसज्ञं Q, रत्नं B, नयाज्ञं W 45d पुण्यरतं L 46a विज्ञानकाव्य° QW °श्रुत° BCLTU, °स्मृति° Q °शास्त्र° Q 46c सूवीर्य° Q 47a दाविण° IO, दाक्ष्यण° L 47d–48a in marg. O 47d °मूर्तिः ABCILSTU प्रथितः ABCILOSU प्रिथिव्यां T, धरित्र्यां R 48c °प्रचुरं om. AC

रात्रिवीर्यप्रबलस्तु सौम्यो
नरं प्रसूते सततं धनाढ्यम् ।
मिष्टान्नपानं प्रियगन्धमाल्यं
सेवाविधिज्ञं सुकृतोपचारम् ॥४९॥
स्वचारवीर्येण युतस्तु सौम्यः
करोति मर्त्यं बहुधर्मशीलम् ।
प्रियप्रदानं प्रियदर्शनं च
प्राज्ञं बहुज्ञानविकीर्णबुद्धिम् ॥५०॥
होराबलाढ्यः प्रकरोति सौम्या
नरं नराणामनिशं हितेप्सुम् ।
बहुश्रमक्लेशसह विनीत
दुर्धर्षमन्यैः प्रणतारिपक्षम् ॥५१॥
बुधो यदा पक्षबलेन युक्त-
स्तदा प्रसूते बहुपक्षयुक्तम् ।
जनप्रियं धर्मपरं सुरूपं
प्रमाथिनं वैरिगणस्य सम्यक् ॥५२॥
सवीर्यप्रबलस्तु सौम्यः
करोति मर्त्यं बहुवित्तभाजम् ।
देवद्विजेभ्यो निरतं विनीतं
स्विनं स्त्रीसुभगं मनुष्यम् ॥५३॥

49c. °गंधताढ्यं W 50d. बपुर्ज्ञान° CT 51b. हितेच्छुं SW, हितेशुं AB, हितेबु Q, हिप्सु L 51c. °क्लेशसहं B 51d. त्रणतारि° U 52c. °प्रियं om. L धर्मरतं L सरूपं Q, स्वरूपं L | 53 om. L | 53a स्वभाव° T 53c. °द्विजेषु W विनीतं] मनुष्यं Q 53d. मनुष्यं] सुवेषं R

सौम्यो ऽर्कवीर्यप्रबलः प्रसूते
नरं कलाकोविदमद्भुतार्थम् ।
सौहार्दमानप्रणयादरञ्च
गान्धर्वशीलं प्रियनृत्यहास्यम् ॥५४॥
स्त्रीहेतु[illegible]तिव्ययवित्तकीर्तिं
जघन्यरक्तं च न सौहृदं च ।
सौम्यः सुहृद्वीर्यविवर्जितस्तु
नरं सुवाते विषयप्रसक्तम् ॥५५॥
स्वक्षेत्रवीर्येण विवर्जितो ज्ञः
करोति मर्त्यं विगताभिमानम् ।
स्त्रीपानदोषप्रभवैरनर्थै-
र्व्याध्याधिविद्वेषयुतं सदैव ॥५६॥
स्वतुङ्गवीर्येण विवर्जितो ज्ञो
नरं प्रसूते ऽतिनिकृष्टचेष्टम् ।
प्रपीडितं वंशसमुद्भवैश्च
दारिद्र्यभाजं सततं कुचैलम् ॥५७॥
नवांशवीर्येण विवर्जितो ज्ञः
कठोरवाक्यं जनयेन्मनुष्यम्
सहज्ञाङ्करक्तं
विगर्हितं शीलपरिक्रियाभिः ॥५८॥

54c °प्रणयादरं W 54d. प्रियमित्र° W 55b न च S
प्रसूते Q 56c स्त्रीपान° AOS 56d. वध्या° L,
व्याध्या° ABCLOQRSU, व्याध्या° T 57b तिविकृष्ट°
ABCLQS 57d. दारिद्र्य° R 58a विवर्जितो ज्ञौ BL,
विनार्जितश्च W, विवर्जितश्चेत् Q 58b–59a om. U 58c
सहज्ञामरक्तं R 58d °क्रियासु Q

गुणग्रहालोकनवर्जितो यः
    करोति मर्त्यं सुहृदामनिष्टम् /
हिंसापरं बहुणमल्पकोशं
    विरक्तमित्रं विकृतिप्रगल्भम् //५९//
पुंक्षेत्रवीर्येण विवर्जितो यः
    करोति नीचं सततं हताशम् /
खलं बहुद्रोहकृतानुबन्धं
    स्वाचारसत्यश्रुतिधर्महीनम् //६०//
दिग्वीर्यहीनः प्रकरोति सौम्यो
    नरं हताशं नयनष्टतमम् /
युद्धोत्सुकं चौरगणाधिपं च
    क्रियाविहीनं परदेशरक्तम् //६१//
चेष्टाबलेन प्रविवर्जितो यो
    नरं प्रसूते ऽतिखलं कुचेष्टम् /
शठं तथा निष्ठुरवाक्यशालं
    विपन्नदारात्मजसंघजन्मम् //६२//
———————————— //६३//
स्ववारवीर्येण विवर्जितो यो
    नरं प्रसूते बहुकष्टभाजम् /
दुःखसहं विफलश्रमार्त-
    मन्योन्यवैरोपहतात्मजन्तुम् //६४//

59a. °वर्जितश्च W 59b. °मनिष्टं ABCILOQSTUW 59c. बहूणं ABCI~QTUW, नापगं L (हू in marg. L³) 59d. °मित्रं ACIOSTU विहृति° AS 60a. विवर्जितश्च W 60b–61a प्र° om. BLQW 60b. नीतं T, नीहं U 60c. खलं] शठं R 60d. °सत्य°] स° ACS 61b. नयनष्टतसं om. L व्यय° R 61c. युद्धोद्यकं T चौरगुणा° O 61d. कृपा° L (interchanges 62a and 64a) ~~62a स्ववारवीर्येण विवर्जितो यो~~ 62a. °वर्जितश्च W 62b. त्रसूते Q निखलं I, निभिलं L प्रचेष्टं ABCILOGRST, प्रविष्टं U 64a. विवर्जितश्च W 64b. बहुरोग° L 64c. °ष्वरुह्यं L, °ष्वसत्यं R विकल° CSTU °यमार्त° W, °श्रनार्त° L 64d. °मनोन्य° IO, °मनान्य° L °चौरोप° L [illegible]त्म° IO °जंतं ABCILOQSTU, °तंतं R, °जं च W

होराबलेन प्रविवर्जितो ज्ञो
नरं प्रसूते बहुशास्त्रपक्षम् /
भोगान्वितं दुःखपरीतवृत्तिं
धूर्तप्रियं प्रश्रयशौचहीनम् //६५//
स्वपक्षवीर्येण विवर्जितो ज्ञो
नरं प्रसूते मलिनं सुदीनम् /
प्रभूतदोषं सततं रुजार्तं
विहीनपक्षं बहुतर्ककं च //६६//
स्वमासवीर्येण विवर्जितो ज्ञः
करोति मर्त्यं कुटिलस्वभावम् /
गुरुद्विजावज्ञकरं हितघ्नं
परान्नरक्तं कृपणस्वभावम् //६७//
बुधो यदा वर्षबलेन हीन-
स्तदा प्रसूते विधनं मनुष्यम् /
नानार्थनाशैः परिपीडिताङ्गं
खलानुरक्तं गुरुभक्तिहीनम् //६८//
इति श्रीवृद्धयवने बुधाचारः //

He. 66 in 65a. प्रविवर्जितश्च W order in C 65a, 66b–66d, 66a, 65b–65d 65d °शौच°] °यशो° BQ, °यसो° L, °यसं° W 66a विवर्जितश्च W 66b सुजाते R 66c. प्रसूत° Q सजातं BLW 66d. °तर्कुकं OR च om. R 67a विवर्जितः W 67c °द्विजायाश्च° C °करो ABCILOQRSTU हितं A…, तिहीन Q col. इति श्रीवृद्धयवनभाषाटीकायां श्रीमोहनदासकारितायां बुधाचारः Q col. श्री° om. ABIORSTU after col. [illegible] W adds संपूर्णः

मेषे गुरुर्देवनरं प्रसूते
 दुर्मर्षणं शौर्यबलस्वभावम् /
विख्यातकर्माणमतिप्रगल्भ-
 मोजस्विनं बुद्धिगुणैरुपेतम् //1//
वृषे गुरुः पाण्डयशःप्रतारं
 नरं प्रसूते सुभगं सुवेषम् /
कान्तं स्वदाराभिरतं विनीतं
 देवद्विजाचार्यकृतोपचारम् //2//
तृतीयराशौ च सुरेज्यमन्त्री
 नैपुण्यदाक्षिण्यपरं प्रसूते /
सुमेधसं वाग्मिनमाहितार्थं
 कृपापरं बुद्धिगुणान्वितं च //3//
तिष्ठन् गुरुः कर्कटके सरूपं
 विद्वांसमोजोबलवीर्ययुक्तम् /
प्राज्ञं प्रसूते प्रियधर्मभाजं
 यशस्विनं लोकपुरस्कृतं च //4//
सिंहं गतो देवगुरुः प्रवीरं
 नरं प्रसूते स्थिरधी सत्त्वम् /
विद्वांसमालह्यमुदारगुण
 शूरं बहुस्निग्धसुहृज्जनं च //5//

L omits 1-12 1b.सौर्यचल° IO, सौर्यचल° BQS, सौन्यचल° W, सत्वबल° R 2a. पीडयसप्रतारं R, पाद्व्यशःप्रतारं T, पांडयस्तप्रतारं BW, पांडुपशमतारं A, उग्रसुधर्मशीलं Q 2c. °दाराभिमतं S 3a. तृतीयराशौ सुरराजमन्त्री Q 3d. क्रियापरं O °गुणान्वितं Q 4a. सरूपं om. S, शरूपं Q 4b. °बलकीर्ति° Q 4d. यजस्विनं Q 5a. सिंहे Q 5b. स्थिरधीवृ° TU °सत्यं Q

षष्ठे क्रियाज्ञानविशुद्धबुद्धिं
    मेधाविनं कर्मकथाभिरामम् /
शास्त्रार्थशिल्पश्रुतिकाव्यचित्तं
    सुदर्शनं देवगुरुः प्रसूते //६//
तुले विचित्रार्थबहुप्रलापं
    गुरुः प्रसंख्यातधियं प्रसूते /
कान्तं शुभाचाररतं विनीतं
    प्राज्ञं वणिक्सार्थमहत्तरं च //७//
गुरुर्नरं वृश्चिकमभ्युपेतः
    क्षुद्रं प्रसूते बहुशत्रुपक्षम् /
सुहृत्कलद्रोहरतं कुशीलं
    प्रपंचकं हिंस्रमनिष्टदारम् //८//
धनुर्धरस्थस्तु गुरुः प्रसूते
    प्रियोपहारं श्रुतधर्मशीलम् /
यज्ञव्रताचार्यमसंस्थितार्थं
    दातारमार्यं बहुमित्रपक्षम् //९//
गुरुर्मृगे मार्दवमल्पवीर्यं
    नीचक्रियाचाररतं दुरन्तम् /
मूर्खं पराज्ञाकरमर्थहीनं
    बहुश्रमं क्लैव्यसहं प्रसूते //१०//

6a °विशाद्धबुद्धिं T 6b मेधाविनी A, मायाविनि Q
6c °कार्य° I °चिन्त्यं ABCIOQSTU 7a °प्रतापं T
7b गुरुप्र° ABCIOQTUW, गुरुः स° S, गुरुर्ग° R 8a
वृश्चिकराशिसंस्थो AS 8d °मभीष्टदारं C 9d °मार्यं Q,
°मायं STU 10b दुरत्तं ORW, दुरन्तं I 10c °करं विहीनं W

कुम्भे तु जीवः मिथुन त्र्यस
विट्शशीलं जनयत्यसत्यम् /
कुशिल्पिनोपाश्रयकर्कशं च
मुख्यं गणानामतिनीचचेष्टम् //११//
मीनद्वयस्थो गुरुगौरवज्ञं
गुरुर्नरं श्लाघ्यधनं प्रसूते /
हृष्टं स्थिरारम्भमनिष्टदर्पं
वेदार्थशास्त्रश्रुतिकाव्यवित्तम् //१२//
होरां रवेर्देवगुरुः प्रयातः
करोति मर्त्यं बहुदोषयुक्तम् /
लुब्धं स्ववाग्दोषयुतं सुतीव्रं
सुगुप्तपापं परतर्ककं च //१३//
चन्द्रस्य होराधिगतः सुरेज्यो
नरं प्रसूते सुभगं मनोज्ञम् /
स्थिरक्रियारम्भधनं शरण्यं
धर्मस्वभावं दृढसौहृदं च //१४//
भागे तृतीये सुरराजमन्त्री
सूर्यस्य सूते कृपणं मनुष्यम् /
क्रूरं क्रियाहीनमनप्रधृष्यं
निन्द्यं कुकर्मार्जितसंपदं च //१५//

~~ABCILOQRSTUW~~
11b. विट्छ° R °त्यवक्त्रं Q 11c. °कर्मिणं R च om. Q
11d. मुख्यांगणाना° ABUW, मुख्यो गणाना° O, मुखं गणाना° Q, मुख्यांगनाना° C, मुखांगनाना° I °नीचवृत्तं W 12b. गुरुं CUW 12c. °महीन° R °धर्मं A 12d. °काव्यश्रुतिशास्त्र° Q °मित्तं O, °दत्तं T L begins again with 13 13c. लुप्तं BLRW, नमं Q स्वयं ोष° S 13d. °तर्कुकं ACORU 14c. शुभक्रिया° T °रंभधर्म A, °रंभपदं S 14d. दृष्ट° C, गत° Q 15b. सूर्यः प्रसूते L कृपणस्वभावं Q 15c. °प्रहृष्यं ACSTU, °प्रहृष्टं IO 15d. वा L

जीवस्त्रि—ागे रजनीकरस्य
तिष्ठन् प्रसूते समनोज्ञरूपम् /
रं प्रसिद्धं बहुमानवित्तं
प्रगल्—भित्तं पि् —टब—कम् //१६//
त्र्यंशे गुरु—मिसतस्य धत्ते
नृणां —यं बन्—ुजनै: प्रसूते /
गाविरोगं
प्रपोषणं
—ा—सुतस्य तिष्ठन्
करोति मर्त्यं प्रवरं प्रसिद्धम् /
विद्याविनीतं बहु—र्मभक्त
सौम्याकृतिं सौम्यगुणै: समेतम् //१८//
त्र्यंशे स्वके देवगुरु: प्रसूते
—ुशाल विजितारिपक्षम् /
क्षमान्वितं पार्थिवमानयुक्तं
चतुष्पदाढ्य प्रणतं गुरूणाम् //१९//
द्रेष्काणसंस्थो भृगुजस्य जीवो
प्रसूते बहुकांचनाढ्यम् /
वररत्नयुक्तं
सुखान्वितं पार्थिववल्ल—ं च //२०//

~~ABCILOQRSTUW~~

16c. प्रसूते Q 16d. °वित्तं BLQR °रक्तं R 17a. °सुत: प्रसूते Q 17b बंधुजने W सदैव Q 17d. प्रपोक्षणं Q, प्रमोषणं R 18a °सुत: प्रसूते Q 18d. सौम्याकृतं ABCLOQRSTU 19a. द्रेकाण° L, दृष्काण°, दृकाण° RTU, दृकाण° AB 20b °ना—ं S 20c. नामाढ्य° T, नानाढ्य° Q, नागान

रौद्रं परस्वापहरं कुबुद्धिं
कनिष्ठकर्माणममित्रवन्तम् ।
द्रेष्काणसस्था रावनस्य जीवो
नरं प्रसूते बहुशोकभाजम् ॥२१॥
प्रेष्यः कुकर्मातिबलस्वभावो
धनैर्विहीनस्त्वथ मन्दसत्त्वः ।
नवांशके वासरपस्य जीवो
यदा तदा स्यान्मनुजः प्रचण्डः ॥२२॥
नवांशके रात्रिपतेः सुरेज्य-
स्तिष्ठन् प्रसूते सुभगं मनुष्यम् ।
प्रियातिथिं प्रीतिकरं नराणां
प्रसन्नचित्तं प्रमदास्वभीष्टम् ॥२३॥
मसादिरोगं व्यसनोपतप्तं
भयान्वितं पापरतं प्रकामम् ।
त्र्यके भूमिसुतस्य जीव-
स्तिष्ठन् प्रसूते ऽतिखलं मनुष्यम् ॥२४॥
बुधस्य भागे नवमे सुरेज्य-
स्तिष्ठन् प्रसूते सदयं मनोज्ञम् ।
वित्तान्वितं धर्मपरं सुवेषं
शास्त्रार्थरक्तं सुतसौख्ययुक्तम् ॥२५॥

21a. °स्वार्थहरं W, °स्वाहरणे O 21b. अनिष्ट° R °वं तु T, °रंतं BL, °रक्तं QW 21c. दृष्काण° CI, दृक्काण° ABQTU, दृकाण° O, दृक्का° R 21d. बहुकोप° L 22a. कुकर्माणबलः CL, कुकर्माणभलः BIQ, कुकर्मा विभल° W 22b. °सत्यः BL 22d. यदा] सदा W तदा om. A 22d. मनुजः – 23b सुभगं om. O 23b. स्वभगं L 23d. प्रसन्नचित्तं om. B 24a. प्रसितो° W, व्यसने° L ...मेर ..., °नतमं U, °पेतं B, °न पेतं L 24b. नयान्वितं C 24c. ...नये सुरेज्यो C

जीवो नवांशे विचरन् स्वकीये
करोति मर्त्यं नृपतुल्यवेषम् /
सुतान्वितं शत्रुकलत्रयुक्तं
शास्त्रार्थयुक्तं सुजनार्थवन्तम् //२६//
शुक्रस्य भागे नवमे सुरेज्य-
स्तिष्ठन् प्रसूते सुखिनं मनुष्यम् /
तेजस्विनं कीर्तिकरं कृतज्ञं
पुण्यात्मकं धर्मरतं सदैव //२७//
भाराविरोगव्यसनैः समेतं
प्रियाविहीनं विगतप्रतापम् /
नवांशकस्थो रविजस्य जीवो
नरं सुवाते नृपपीडितं च //२८//
सूर्यांशके वासरपस्य जीवो
नरं प्रसूते विधनं विरूपम् /
अकीर्तिवन्तं बहुशत्रुपक्षं
मित्रैर्वियुक्तं विसुखं विशीलम् //२९//
सूर्यांशके देवगुरुः प्रसूते
चन्द्रस्य तिष्ठन् धनिनं मनुष्यम् /
प्रियातिथिं पुत्रकलत्रयुक्तं
भूपालपूज्यं दयितं जनानाम् //३०//

26d. शास्त्रार्थरक्तं QR 28a. नारोवि° I, भाराव° L : श्रिया R 28c. नवांशके स्वे L 28d. प्रसूते QW in plac 29a T repeats 30a 29c. अकीर्तिमंतं BCIQW °शत्रुयुक्तं 30d. नराणां C

बृहस्पतिर्द्रेक्काणराशिभागसंस्थो
भौमस्य सूते प्रबलं मनुष्यम् ।
विटं ममैत्रशीलं व्यसनैरुपेतं
रोगार्दितं बन्धनभागिनं च ॥३१॥
अर्कांशसंस्थः शशिजस्य जीवो
नरं प्रसूते प्रथितं नृलोके ।
सत्याधिकं सर्वगुणैरुपेतं
प्रभुप्रियं बन्धुजनस्य नित्यम् ॥३२॥
अर्कांशके स्वे प्रकरोति जीव-
स्तिष्ठन् नरं सर्वसमृद्धिमन्तम् ।
पुष्टं जितारिं भयरोगयुक्तं
रामास्वभीष्टं सततं सुशीलम् ॥३३॥
जीवो भृगोर्द्रेक्काणराशिभागसंस्थो
नरं प्रसूते हयकाञ्चनाढ्यम् ।
प्रियातिथिं भोगिनमार्यशीलं
प्रमाथिनं वैरिजनस्य नित्यम् ॥३४॥
सूर्यांशके भास्करनन्दनस्य
जीवः कुचैलं कुरुते मनुष्यम् ।
दीनं विरूपं बहुदुःखभाजं
प्रपीडितं दस्युभिरेव भूपैः ॥३५॥

31b. प्रबल S   31d. रुगार्दितं R   32 om. L   33b. °वन्तं L, °युक्तं TU   33c. पुष्टिं BLOR   बहुरोग° L   °मुक्तं Q   34a. °भाव° L   34c. भोजिन° Q   °मापशीलं R, °मार्गशीलं I   34d. प्रमादिनं R   वैरजनस्य LQR   नीलं Q   35c. निरूपं Q, विरुद्धं L   35d. अपीडितं T   भूजैः BLQ, नित्यं W

नरं प्रसूते कुटिलं मनुष्यम् /
ईर्ष्यापरं पीडितलोकवर्गं
विहीनशीलं परवादरक्तम् //३६//
त्रिंशल्लवे सूर्यसुतस्य जीव-
स्ति[illegible]न् विधत्ते विधृतं [illegible]म्
मापानुरक्तं परदारशीलं
स्वबन्धुहीनं कुटिलस्वभावम् //३७//
त्रिंशांशके स्वे सुरराजमन्त्री
मनीषिणं वाक्चतुरं करोति /
मर्त्यं सुरक्तं द्विजदेवभक्तं
सन्तुष्टचित्तं सततं सशीलम् //३८//
त्रिंशांशके सोमसुतस्य जीवः
करोति वित्तं सततं मनुष्यम् /
अध्यात्मविद्यागमसक्तचित्तं
क्षमान्वितं ब्रह्मविदां वरिष्ठम् //३९//
त्रिंशांशके भार्गवनन्दनस्य
जीवश्चरन् वित्तयुतं विधत्ते /
नरं विनीतं सुतलाभयुक्तं
स्त्रीणामभीष्टं नृपलोकमान्यम् //४०//

36b मनुष्यं] नितान्तं W 36c. पंडित° Q °वर्ज्यं R, °वर्ग्यं पर्यं L 36d. परदार° LW 37b. त्रसूते R विधानं W विवृतं S, विकृतं Q 38b. मनीषिसां L वाक्चतुरं W, वाक्र[illegible] L 38d. धनेन वित्तं C 39 after 40 in W 39c. °विद्यायम° TU °रक्तचित्तं S . 40c विनीतं] विधत्ते नरं विनीतं AB, नरं सदा सु° W, विधत्ते CILQ

सुहृत्कुली देवगुरुः प्रसूते
नरं विनीतं सततं सुशीलम् /
ख्यातं स्थिरस्फीतधनं सुमित्रं
सद्वृत्तयुक्तं च तथा जितारिम् //४१//
स्वक्षेत्रवीर्येण युतः सुरेज्यो
नरं प्रसूते गुणशीलवन्तम् /
मेधाविनं देवगुरुप्रसक्तं
प्रख्यातकर्माणमनल्पवीर्यम् //४२//
स्वतुङ्गवीर्येण युतः सुरेज्यः
करोति नानार्थयुतं मनुष्यम् /
वैशिल्पव्यवहारकाव्य-
माधुर्यदाक्षिण्यपटुं दयालुम् //४३//
———— //४४//
शुभग्रहालोकनवीर्ययुक्तो
जीवो विधत्ते विरुजं मनुष्यम् /
पापैरनार्यैः प्रसक्तैर्विरुध्ये-
दभ्यर्चितं ज्ञातिभिरेव नृपैः //४५//
पुंक्षेत्रवीर्येण युतस्तु जीवो
गाम्भीर्यधैर्यप्रवरं मनुष्यम् /
चतुष्पदाढ्यं कुलदैवमुख्यं
सुधर्मशीलं नृपवल्लभं च //४६//

41d. सद्वृत्य° L 42a. सुक्षेत्र° W 42b. विधत्ते Q 42d–43b om. C 43c. °शिल्पि° R, °शील° S 43d. om. C 43d. °पटं S 45b. निरुजं RW 45c. °रनार्यैः B °विरुद्धो° B, विरुद्धै° W, °विरुद्धे° L, °विरुद्धं RS, °मनुष्यै° Q 45d. विवर्जितं पूजितमेव लोके Q 46a. स्वक्षेत्र° BCIOQTUW, सुक्षेत्र° L 46b. गोधार्य° BL, भोगार्थ° Q 46c °दैव° RSW

बृहस्पतिर्दिग्बलवान् प्रसूते
सुपण्डितं भूरिगुणैः समेतम् /
वस्त्रान्नपानैः सहितं मनोज्ञं
गतारिपक्षं गतसाध्वसं च //४७//
चेष्टाबलाढ्यः सुरराजमन्त्री
ष्टितं संजनयेन्मनुष्यम् /
मन्त्रान्वितं सौरतलब्धसौं
शूरं महाज्ञानयुतं सहिष्णुम् //४८//
दिवाबलाढ्यः प्रकरोति जीवो
नरं प्रसिद्धं बहुवित्तयुक्तम् /
प्रसन्नमूर्तिं प्रणतारिपक्षं
सुखान्वितं तन्त्रविदां वरिष्ठम् //४९//
स्ववारवीर्येण युतस्तु जीवो
विद्याधिकं संजनयेन्मनुष्यम् /
स्त्रीलाभयुक्तं सुजनानुकूलं
प्रियंवदं सर्वकलासु दक्षम् //५०//
गुरुर्यदा वर्षबलेन युक्त-
स्तदा प्रसूते सुभगं मनुष्यम् /
अत्यार्यशीलं बहुवीर्ययुक्तं
चेष्टं नृपाणां प्रचुरान्नपानम् //५१//

47d. गतारिपक्षं om. A 48c. तन्त्रान्वितं R सौरति° L, सुरत° R, सौख्य° Q °सौख्यं L, सौम्यं Q 48d. महाधनपतिं R 50c–51b om. W 51c. अत्यार्थं° Q, अनार्य° S 51d. चेष्टा W, वंद्यं R (51d–52c om. C)

स्वमासवीर्येण सुतः सुरेज्य
करोति मर्त्यं सुभगं कृतज्ञम् /
कान्तं विनीतं प्रचुराङ्गनाढ्यं
स्वबन्धुपूज्यं सततं धनाढ्यम् //५२//
होराबलाढ्यः प्रकरोति जीवो
नरं महाज्ञानयुतं प्रशान्तम् /
विज्ञानशास्त्रश्रुतसौख्ययुक्तं
प्रियातिथिं मानधनैः समेतम् //५३//
जीवो यदा पक्षबलेन युक्तो
नरं प्रसूते ऽतिबलं कृतज्ञम् /
विद्यान्वितं सर्वसुखाधिवासं
रत्नान्वितं वाजिगजैरुपेतम् //५४//
जीवो यदा मित्रबलेन हीन-
स्तदा प्रसूते कृपणं मनुष्यम् /
शस्त्रप्रहार ज्वरपानदोष
स्त्रीरोगबन्धादिनिपीडिताङ्गम् //५५//
स्वस्थानवीर्येण विवर्जितस्तु
जीवः प्रसूते कठिनस्वभावम् /
मृताङ्गनं कुक्षिरुगार्तदेहं
मित्रैर्विहीनं भयविक्लवं च //५६//

~~ABCILOQRSTUW~~
52b कृतघ्नं Q 52c कृशं W 52d. धनार्थैः S 53b-54. C 53b °सत्तं O 53c. °शास्त्रामृत° L, °शास्त्राश्रित° W, शास्त्रस्मृति° Q °मोक्ष° L 53d यानधनैः S, मानन्यधनैः I
er in B I LW; 54b, 55c-d, 54c-55b; ... TU. 54b-54c, 55c-d, 54d-55b . . . 54a जीवो L 54b
विबलं T कृतज्ञं] प्रधानं R 54d. वाजिगजै° IO, वाजिगुणैः W
समेतं W 55... ज्वर° ... AS 55d. °पीडितं च AIORS -
56b-57a om. B ILQTUW 56b 55c

जीवोच्चवीर्येण विवर्जितस्तु
करोति नीचप्रकृतिं मनुष्यम् ।
सुतार्थहीनं कठिनं कृतघ्नं
प्रपीडितं पार्थिवचौरसंघैः ॥५७॥
नवांशवीर्येण विवर्जितस्तु
सुरेन्द्रमन्त्री कुरुते भयार्तम् ।
पामादिरोगैः सहितं च
बुद्ध्या विहीनं विसत्त्वं सशोकम् ॥५८॥
शुभग्रहालोकनवीर्यहीनो
जीवः प्रसूते ऽतिकुरूपदेहम् ।
स्वबन्धुहीनं जठरस्वभावं
वैरप्रियं क्रोधपरं कुशीलम् ॥५९॥
पुंवीर्यहीनः सुरराजमन्त्री
नरं प्रसूते ललनस्वभावम् ।
भीरुं शठं नैकृतिकप्रकारं
श्लेष्मात्मदेहं वृजिनात्मकं च ॥६०॥
दिग्वीर्यहीनः कुरुते सुरज्या
नरं विहीनं धनधान्यजातैः ।
।।वद्वशरक्त प्रचलस्व
नित्यम् ॥६१॥

57 om. A 57b. °प्रकृतं O 57c बठरं R कृतघ्नं] सत्वं च Q, मनुष्यं IL, नितांतं W 57d. पार्थिवचौरि° S 58b भयार्त: BIU, भयार्ता: O, मयार्त: C 58c. मनुष्यं] सुहीनं R 58d. विहीनबुद्धिं R 59c. °हीनं om. S बठर° BLQRS, चत्वर° T, चवर° IU, विकट° W 59d. वैर° U, चौर° T 60b नलन° I, कठिन° C 60d. श्लेष्मादि° L, श्लेष्मार्त° R व्रजना° Q 61b °जालै: BLW, °जाणै Q 61c प्रबल° LW

चेष्टाबलेनैव विना सुरेज्य:
करोति पापात्मकमुग्ररूपम् /
. . . .
संपीड्यते वा नृपतिर्मनुष्यै: //६२//
करोति जीवो ह्यबलेन हीनो
नरं प्रकृत्या पिशुनस्वभावम् /
कन्याप्रजं वातरुजाभितप्तं
नीचारिविद्वेषविवृद्धदोषम् //६३//
स्ववारवीर्येण विना सुरेज्यो
नरं प्रसूते परिभूतवीर्यम् /
पित्ताग्निदाहज्वरशस्त्रचौरै:
प्रपीडितं धर्मविवर्जितं च //६४//
स्ववर्षवीर्येण विना सुरेज्य:
करोति मर्त्यं धनवृद्धिहीनम् /
कृशं कृतघ्नं चपलस्वभावं
कफानिलाभ्यां सततं च युक्तम् //६५//
विवर्जितो मासबलेन जीव:
करोति मिथ्यात्मकमुग्ररूपम् /
परापवादेषु रतं कृतघ्नं
परान्नरक्तं परयोषिताढ्यम् //६६//

62c. स्त्रीलोक° ABCILOQRSTUW 62d. संषंडिते L, संपीडिते Q चा W नृपते° R, नृपभि° ABCILOSW °र्मनुष्य: ABCILORSW 63d. °विद्वेष° om. A, °विद्वेषि° BL °विवृद्धा° A, °विवृद्धि° Q, °विवर्द्धि° L 64c. °दाघ° ABCILORSTU 64d. धनविवर्जितं L 65 om. L 65b धनवृद्धि° ACI, धनवृद्धिभि° BQ, धनतुष्टि° S, धनधान्य° T, धनवित्त° U 65c प्रबल° TU 66b मित्यात्मक° B, मर्त्यात्मक° CILW, हीननरं Q °मुग्ररूपं om. L, °मुपरूपं B, कुरूपं Q

करोति हीनाबलहानमूर्त:
  सुरेज्य[illegible]ी त्हद्[illegible]ाठ्ययुक्तम् /
गतत्रपं हीनबलं कुरूपं
  वधात्मकं शङ्करकारकं च //६७//
बृहस्पति: पञ्चबलेन हीन:
  करोति मर्त्यं निजपञ्चहीनम् /
रोगाभिभूतं प्रतिहीनसत्यं
  प्रभूतशत्रुं परदाररक्तम् //६८//
इति श्रीवृद्ध[illegible]वने गुरुचार: //

67a. °हीनकीर्ति: BCILTUW, °वर्जितस्तु Q   67b सुरेंद्र° Q
°शाठ° A, °शास्° I, °शाग्र° O, °शत्रु° TU   67c. °बलं कुरूपं ...
A   67d. बंधात्मकं R, वधात्मकं B   दुष्कर° AS
68b. निज°] जं° U, जय° T   68c. प्रतिहीन° LQ, प्रीतिहीन° W
°सत्वं R   रोगाभि° C, नागाभि° L, लोभाभि° R
col. इति वृद्धजवनबृहस्पतिचार संपूर्णं Q   col. श्री° om. ORT
बृहस्पतिचार: R · after col. add. संपूर्णं: W

मेषे तु शुक्रो जनयत्यथान्त
नरं बहूनां निरोधनशीलम् ।
परस्त्रीहरणे प्रसक्तं
सेर्ष्यं वनारण्यविचारणं च ॥१॥
वृषे बहुस्त्रीसुतरत्नमाढ्यं
तं प्रसूते भृगुजः सुमूर्तिम् ।
स्वबन्धुभर्तारमनेकवीर्यं
कृषीवलं गोकुलजीवनं च ॥२॥
निषेवमानो मिथुने प्रसूते
शुक्रो नरं वाग्मिनमूर्जितं च ।
सुरद्विजातिप्रियपरं कृतज्ञं
विज्ञानशास्त्रार्थकथारतं च ॥३॥
भतर्थराशौ यदि षोडशार्चि-
स्तिष्ठन् प्रसूते रतिधर्मशीलम् ।
प्राज्ञं श्रुतिज्ञानविदां वरिष्ठं
मृदुस्वभावं प्रियदर्शनं च ॥४॥
सिंहाश्रितस्तु प्रियबन्धुपत्नं
शुक्रः प्रसूते नरमप्रसह्यम् ।
विचित्रसौख्यव्यसनं सुरूपं
गुरुद्विजाचारपरायणं च ॥५॥

1–12 om. L 1a. ति ABCIQRSU 1d. शेष्यं BCW, प्रेष्यं Q °विचारिणं S 2a. °रत्नकाढ्यं W 2c. स्वबंधुनेतार° W 2d. हृषीवलं TU °जीविनं CQR 3a. °माने ABCIOQW, °मानं STU 3c. कृतघ्नं C 3d. च om. U 4a. यदि –शार्चि I, यदि शौचि W, त्रिदसार्चितस्तु Q 4c. स्मृतिज्ञान° Q 5b. °सत्यं AQSTU, °सत्वं OR 5c. °मसनं I, नरं Q 5d. °द्विजार्चाचपरायणं R

कन्यां गतो मार्दवमल्पवित्तं
शुक्रः परोपासनजीवितं च ।
स्त्रीभूषणार्थं रतिगेयकाव्य-
कलालिपिज्ञं मधुरं च कुर्यात् ॥६॥
तुलाधरस्थो भृगुसूनुराढ्यं
नरं प्रसूते ऽर्थविराजपण्यम् ।
विचित्रमाल्याम्बरमात्मलक्ष्यं
बहुप्रवासं श्रमलब्धवित्तम् ॥७॥
शुक्रो ऽष्टमक्षेत्रगतो नृशंसं
विद्वेषशीलं जनयत्यधन्यम् ।
प्रद्विष्टदुष्ट [illegible]
शठं परस्त्रीष्वनयप्रपंचम् ॥८॥
रस्थो विगतार्थविद्यं
शुक्रः प्रसूते ऽतिविलक्षशब्दम् ।
सद्धर्मकामार्थफलस्वपत
जगत्प्रियं कान्तमनल्पसौख्यम् ॥९॥
कुर्वीत रात्रौ द्युगमे मनुष्यं
शुक्रो बहुक्लेशभयश्रमार्तम् ।
पैशुन्यलोभाश्रितवंचनानां
प्रयोगिणं क्लीबविपक्षद्वेष्टम् ॥१०॥

6b. °जीवनं T 6c. रतिज्ञेय° O °युक्तं R 7b. ऽर्थं°] न R °चिराय° IOSTUW, °चिरार्थ° R, °चिरद्° Q 7c. °मान्यवश्यं W 7d. °प्रकाश Q °चित्तं CTU 8b °त्यवश्यं S 8c प्रदिष्ट° I, प्रसिद्ध° Q 8d. °ष्वनपत्रपं च R 9a. विगतार्थ°—9b शुक्रः om. 3 9a °निंद्यं A 9b तिविपक्ष° T, तिविस्तक्ष° U 9c. सुधर्म° T °लाभार्थ° S, °वाभार्थ° A 9d. गजप्रियं W 10 om. Q 10a. दुर्नीत AS

शुक्रश्चरन् कुम्भधरे मनुष्य-
मुद्योगरोगव्यसनोपतप्तम् /
कर्मस्वसं———पन्नफलेषु सक्तं
कुर्याद्विरुद्धं गुरुभिः सुतैश्च //११//
मीनद्वयस्थो जनयत्युदारं
शुक्रः श्रुतिज्ञानरतं मनुष्यम् /
द्विजबुद्धिकर्मप्रचुरं सुरूपं
नृपप्रियं सज्जनमानलब्धम् //१२//
होरां गतो वासरपस्य शुक्रः
करोति मूर्खं विधनं विशीलम् /
हिंसानृतस्तेयरतं प्रकामं
मैत्र्यायुक्तं च विधर्मशीलम् //१३//
होरां गतो रात्रिपतेस्तु शुक्रः
सतां प्रियं स्फीतधनं करोति /
गान्धर्वलीलाश्रुतिगीतरक्तं
विप्रप्रियं पार्थिववल्लभं च //१४//
द्रेष्काणसंस्थो द्विजपस्य शुक्रो
नरं प्रसूते कठिनं गतस्वम् /
कुयोषितामागतसौख्ययुक्तं
जडं नृशंसं बहुरोषिणं च //१५//

11c. °सम्यग्ग° ABCIQRTU, °समग्र° W, °सम्यग्° O   सक्तं om. Q
12c. स्वरूपं W   12d. सज्जरलब्धमानं Q   L begins again with 13   13c. सहीनृत° L, सहिनृत° B, सह्यनृत° W, सह्यानृत° Q
सकामं T   14c. °लीलाश्रुत° R, °लीलासुत° Q   14d. च om. A
15a. द्रेक्काण° R   15b. परं TU   15c. °तां भागत° R   15d. °रोगिणं S, °रोच्चिणं Q

तृतीयभागे शशलांछनस्य
तिष्ठन् भृगुः सौम्ययुतं प्रसूते /
विद्याविनीतं पितृमातृभक्तं
तपस्विनं धर्मपरं कृतज्ञम् //१६//
तृतीयभागे धरणीसुतस्य
शुक्रश्चरन् पापरतं करोति /
सद्रोगवन्तं व्यसनैरुपेतं
मायाविनं वंचनतत्परं च //१७//
द्रेष्काणसंस्थः शशिजस्य शुक्रो
नरं प्रसूते सुभग मनोज्ञम् /
रतप्रगल्भं प्रियपूर्तदारं
सुवर्णरत्नात्मजभागिनं च //१८//
भागे तृतीये सुरपूजितस्य
शुक्रश्चरन् श्रेष्ठतमं सुरूपम् /
सत्यान्वितं सर्वकलासु दक्षं
क्षमान्वितं प्रीतिकरं जनानाम् //१९//
त्र्यंशे स्वकीये भृगुजः प्रसूते
नरं प्रगल्भं धनिनं सुशीलम् /
अध्यात्मविद्यानिरतं सुरूपं
र्विहीनम् //२०//

16a. शशि° ABCLOQSTU 16b. विद्यात्ते Q 16d. ततस्विनं R, न वग्लिनं AB, न वाग्लिनं IO, न वाग्मिनं W, न वाङ्मिनं L, सुवाग्मिनं Q, मेधाविनं S कृतघ्नं ABQSW 17b बुधा° Q न्यायरतं C, पापयुतं T for 17c-d Q has:
सुविर्जितं मानमनो
करोती नित्यं अधिके प्रतापं/
before 17c C has: सद्धर्मबुद्धि सुविनीतनेहं, W has: मिथ्यापवादं धनधान्यहीनं 17d. om. BCLOR (suppl. R²) W; I has: बहुदुःखभाजं मनुजं मनुजं (s.c!) करोति 18a. द्रेक्काण° R 18b मनुष्यं C 18c. रति° IL °धूर्त° ABCILOQRTUW, °मूर्त° S 19b स्वरूपं W 20c स्वरूपं LW

ग तृतीये रविजस्य शुक्रः
करोति मर्त्यं बधबन्धरकम् /
स्वबन्धुहीनं परदाररक्तं
विद्वेषशीलं सततं कुसेव्यम् //२१//
पवांशकस्थो दिनपस्य शुक्रः
करोति मर्त्यं विकलं सुधीरम् /
बहुद्विषं निःक्रियमल्पवीर्यं
प्रपंचयुक्तं गतसत्त्वसौख्यम् //२२//
नवांशके भार्गवनन्दनस्तु
इन्दुः धत्ते तनयं नराणाम् /
सन्तोषितं वा धनधान्यलाभं
रिपुक्षयं बन्धुसमागमं च //२३//
नवांशके भूमिसुतस्य शुक्रो
नरं प्रसूते रुधिरार्दिताङ्गम् /
प्रपीडितं दस्युनृपैः सदैव
प्रद्वेषशीलं निकृतिप्रियं च //२४//
बुधस्य भागे नवमे तु शुक्रः
करोति मर्त्यं विबुधं सुधर्म्यम् /
तीर्थाश्रयं देवगुरुप्रसक्तं
प्रियातिथिं संनियमैरुपेतम् //२५//

21b. °बंधहीनं I   21c. दयाविहीनं I   22c. निःक्रय° Q, निक्रय° ABILOS, निष्क्रय° W, विक्रय° U, विक्रम° T   22d. °सत्य° T   23b. तनयं] सुसत Q   23c. सन्तोषितां CT, संस्थोषितं L   24b विधत्ते Q   °राद्रुतांगं CIOSTUW, °रार्दितांगं LQ, °रार्द्रजागं AB   24d. विकृतिं Q   °प्रपंचं T   25b. सुधर्मं ILQTU
25c. °प्रयुक्तं

शुक्रो नवांशे सुरपूजितस्य
करोति मर्त्यं प्रणतं द्विजानाम् /
विवेकविद्यागमशास्त्रल
नृपप्रियं मित्रवरैः समेतम् //२६//
नवांशके स्वे भृगुजः प्रसूते
अध्यात्मविद्यानिरतं मनुष्यम् /
स्वधर्मपूज्यं सुधिया समेतं
हतारिपक्षं व्रतशीलिनं च //२७//
स्थितो नवांशे ऽर्कसुतस्य शुक्रो
नरं प्रसूते सरुजं सदुःखम् /
भार्यासुतार्थैः परिवर्जितं च
प्रपीडितं नीचजनैर्विशेषात् //२८//
सूर्यांशके वासरपस्य शुक्रः
करोति हीनं न च दीर्घसूत्रम् /
बुद्ध्या विहीनं सुजनैर्विमुक्तं
द्रोहात्मकं वादरतं नृशंसम् //२९//
शुक्रो ऽर्कभागे शशलांछनस्य
नरं प्रसूते वरयानभाजम् /
नृपप्रियं भोगिनमर्थवन्तं
विहारवापीकरणेषु सक्तम् //३०//

26c. °लब्धं BL 27b. आध्यात्म° ABLSUW, मध्यात्म° Q 27c. सुधर्म° L °शीलं Q स्वधिया L 27d. हितारि° ABS व्रत°] च सु° C °शालिनं TU 28d om. C 29a. तिग्मकरस्य C 29b. नरं प्रसूते कुधिया समेतं CTU, नृपात् भयं कीर्तिविनाशनं च W 29b. हीनं न च] मर्त्यं खलु Q 29c. बुद्ध्या विहीनं सु°] प्रपीडितं नीच° CTU बुधा I स्वजनै° R, सुतै° BL, च सुतै° Q 30a. शशी° Q 30c. नरं प्रियं L 30d. विहारवामी° TU

शुक्रो
विदेशरक्तं मनुजं प्रसूते
द्यूतप्रियं यद्रुपरं कृतघ्नं
विवेकहीनं परदारभाजम् //31//
सूर्यांशके सोमसुतस्य शुक्रो
नरं प्रसूते सुभगं मनोज्ञम् /
ध्यानार्थमानैः सहितं प्रसिद्धं
विद्यार्जने तत्परमल्पदोषम् //32//
सूर्यांशकस्थः सुरपूजितस्य
शुक्रः करोत्यार्यमतिं सुदानम् /
सन्मानसौहार्दसुखाभियुक्तं
विचित्रभोगं द्रविणोपपन्नम् //33//
सूर्यांशके स्वे भृगुजः प्रसूते
विचित्रवाक्यं रतिगेयरक्तम् /
धर्मार्थकामैः सहितं सुचित्रं
नृपप्रधानं निजबन्धुमान्यम् //34//
अर्कांशके सूर्यसुतस्य शुक्र-
स्तिष्ठन् प्रसूते सुखभाग्यहीनम् /
नापात्मकं शत्रुविवर्जितं च
प्रवासिनं व्याधिभिरर्दितं च //35//

32 om. BLW; for 32 Q has:
विवेकहीनं परदारभाजं
चलं क्रियायां रतं विनीतं /
दैवाग्निनिंद्यापरविघ्नयुक्तं
शास्त्राविहीनं रतं दरिद्रं //
33b. °त्यार्यमतिं BTU, °त्यर्थमतिं ACL सुदान्तं ACTU
33c. °सुताभियुक्तं CR 34b. रत° R °वेगरक्तं W 34c. सचित्रं I order in T: 35a, 37b-37d, 36a-37a, 35b-35d.
35a (in marg.) C [illegible] 35a. सूर्यांशके C 35b. °स्तिष्ठन् om. I
सुतं° LT °भाग° O, °भाग्य° T

त्रिंशांशके भूमिसुतस्य शुक्र-
स्तिष्ठन् प्रसूते सरुजं मनुष्यम् ।
पित्तार्दितं सज्वरमल्पवीर्यं
स्वनीचयुक्तं बहुना यथोक्तम् ॥३६॥
त्रिंशांशके सूर्यसुतस्य शुक्र-
स्तिष्ठन् प्रसूते बहुदोषखिन्नम् ।
हतात्मकं बन्धुवियोगयुक्तं
प्रपंचशीलं गतसत्यशौचम् ॥३७॥
त्रिंशांशके देवपुरोहितस्य
शुक्रश्चरन् देवरतं प्रसूते ।
धर्मशीलं सुजनाप्ततोषं
नरेन्द्रपूज्यं व्रतचारिणं च ॥३८॥
त्रिंशांशके सोमसुतस्य शुक्र-
स्तिष्ठन् प्रसूते सवपुं मनुष्यम् ।
सौम्यं धनाढ्यं बहुदारयुक्तं
हस्त्यश्वभाजं नृपवल्लभं च ॥३९॥
त्रिंशांशके स्वे भृगुजः प्रसूते
नरं विनीतं धनधान्यवन्तम् ।
तुलाधिकं कीर्तिकरं सुविज्ञं
हास्ये रतं केलिकरं प्रसह्यम् ॥४०॥

36b सत्रज्ञं Q 36c. सत्वरं AST, सह्वरं B, स्वज्वरं C 36d. नीचान्वितं स्यात् बलवर्ज्ययुक्तं Q 37a. चंद्रसुतस्य L 37b बहुशोक° CRT °युक्तं C 37c. हतात्मिकं C 37d. गतशांत्यशौचं L 38c. स्वधर्म° L, धर्म° B 38d. °वारणं C 39c. सौख्यं CU बहुदार° TU °रकं CR 40a त्रिंशांशके W 40c. कुलाधिकं L सुचित्तं I, सुधीज्ञं R, सुविद्वं AS, विधिज्ञं CTU · 40d. हास्यं RU, दास्यां S केलिरतं CT प्रसत्यं CTU, प्रसाध्यं I

शुक्रो यदा मित्रबलेन युक्त-
स्तदा प्रसूते बहुमित्रयुक्तम् ।
प्रियातिथिं देवगुरुप्रसक्तं
प्रभावनैश्वर्यगुणैः समेतम् ॥४१॥
स्वस्थानवीर्येण युतस्तु शुक्रः
करोति मर्त्यं पुरुषप्रधानम् ।
स्वस्थानपूज्यं प्रमदास्वभीष्टं
प्रसन्नचित्तं धृतिनाधिपं च ॥४२॥
स्वतुङ्गवीर्येण युतस्तु शुक्रः
करोति मर्त्यं बहुकीर्तिभाजम् ।
पुण्यात्मकं सत्यसमृद्धिमन्तं
मानप्रदाढ्यं प्रियदर्शनं च ॥४३॥
नवांशवीर्येण युतस्तु शुक्रः
करोति मर्त्यं विजितारिपक्षम् ।
यज्ञप्रियं दानपतिं प्रसिद्धं
निर्मुक्तदोषं स्वकुलप्रधानम् ॥४४॥
शुभग्रहालोकनवीर्ययुक्तः
शुक्रः प्रसूते शुभकायमग्र्यम् ।
गौर्विमलं प्रणतारिप
प्रियातिथिं सर्वसुखैः समेतम् ॥४५॥

41c om. BLQW 41d. प्रभावमै° AB TOQSTU, प्रभावप्रै° W
42a-b om. BLQW 42b पुरुष° — 43b मर्त्यं in marg. O 42d
om. Q 42d. वृतिना°O, वृजिना° CTU °युतं W 43b-44a
om. U 43c. पुण्यात्मिकं C 43d om. W 44c. दानरतं Q
44d. निषक्त° S सकलं L 45b शुभकाये° CLT, शुभकाम°
BIW °मग्रं IL, °मुग्रं QTU, °मुग्यं C 45c. प्रगतारि°C
45d. सर्वगुणैः W

स्त्रीदोऽत्रवीर्यप्रबलस्तु शुक्रः
    करोति मर्त्यं बहुयोषिताढ्यम् ।
सौभाग्यसौन्दर्ययुतं सुकान्तं
    नानार्थलाभैः सहितं सदैव ॥४६॥
आशाबलाढ्यः प्रकरोति शुक्रो
    नरं प्रसन्नं गतशत्रुपक्षम् ।
दिग्देशविख्यातियुतं सुताढ्यं
    प्रभूतवित्तं च सदा प्रियं च ॥४७॥
चेष्टाबलाढ्यः प्रकरोति शुक्रो
    नरं प्रसन्नद्युतिमल्पगापम् ।
    व्यसन गुरुाव
    पायैर्वियुक्तं सुतल... युक्तम् ॥४८॥
    ॥४९॥
    बारबलेन युक...
    सदा प्रसूते सहजस्य भालम् ।
विज्ञानशीलं बहुशास्त्ररतं
    सुधर्मशीलं हृतशत्रुपक्षम् ॥५०॥
करोति शुक्रो ऽब्दबलेन युक्तः
    प्रियातिथिं सौख्ययुतं मनुष्याम् ।
    व्यसनरूपत
    नृपप्रियं ब्राह्मणसंमतं च ॥५१॥

47b त्रगल्भं W हृत° CTU 47c. विदेश° AIOSTU °विख्यात° CILTU, °विज्ञात° Q °यति Q, °कृतं CTU सुताल्पं S 47d. प्रसूत° C च² om. Q 48a. ज्येष्ठा° U 48b °स्युत° Q, °प्रकृति° C, °कृति° U, °कृत° T 48c. °विप्रयुक्तं CTU 48d. विभवोपयुक्तं W °निर्मुक्तं CLQT °तलाभयुक्तं om. U 51a. शुक्रो] शक्रो Q 51b सौख्य° L, सौम° Q °युतः ...

शुक्रो यदा मासबलेन युक्त-
स्तदा प्रसूते सुभगं जितारिम् /
चतुष्पदाच्छादनभोजनाद्यैः
समन्वितं सर्वसमृद्धिमन्तम् //५२//
होराबलाढ्यः प्रकरोति शुक्रो
नरं सुशीलं प्रियवाक्यदक्षम् /
महाजनैः पूजितमेव नित्यं
प्रसन्नमूर्तिं प्रियदर्शनं च //५३//
शुक्रो यदा पक्षबलेन युक्त-
स्तदा प्रसूते विजितारिपक्षम् /
स्वपक्षमान्यं बहुधर्मयुक्तं
प्रियागमं सङ्गमलब्धसौख्यम् //५४//
शुक्रो यदा मित्रबलेन हीन-
स्तदा प्रसूते विधनं मनुष्यम् /
मित्रैर्विहीनं बहुदुःखशोकै-
रुपद्रुतं पार्थिवपीडितं च //५५//
स्वक्षेत्रवीर्येण विवर्जितस्तु
शुक्रः प्रसूते ऽतिखलं विशीलम् /
दुष्टाङ्गनासख्यरतं कुरूपं
विधर्मिणं पापरतं कृतघ्नम् //५६//

52b. सदा Q   52c. °ऽभोजनच्छादनाद्यैः C, °च्यासभोजनाद्यैः S
53 om. Q   54b. विगतारि° Q   54c. °धर्मपक्षं T   54d.
प्रियागमा° ILRSTUW   संगमनात्मसौख्यं T   55a मैत्रबलेन
B   56b–57a om. L   56b. विशालं W, मनुष्यं Q   56c.
°सौख्यरतं C

गुरुवीर्येण विवर्जितस्तु
　शुक्रः प्रसूते मलिनं सपापम् /
नीचान्तरक्तं परदारलब्धं
　हिंस्रं महाव्याधिभिरर्दितं च //५७//
नवांशवीर्येण विवर्जितस्तु
　शुक्रः प्रसूतेऽतिकठोरचित्तम् /
भयातुरं सत्यधनैर्विहीनं
　विद्विष्टशीलं गतसौहृदं च //५८//
शुभग्रहालोकनवीर्यहीनः
　शुक्रः प्रसूते परिभूतदेहम् /
विकर्मरक्तं सततं
　प्रपीडितं पार्थिवदस्युभिश्च //५९//
स्त्रीक्षेत्रवीर्येण विवर्जितस्तु
　करोति शुक्रः प्रबलं मनुष्यम् /
नरापवादात्मकमल्पसौख्यं
　स्त्रिया वियुक्तं बहुहानियुक्तम् //६०//
आशाबलेनैव विवर्जि
　शुक्रः प्रसूते परदेशरक्तम् /
भाग्यैर्विहीनं जठरं कृतघ्नं
　मायाविनं साधुजनैर्विहीनम् //६१//

57a विवर्जितश्च W　57b. मलिनं] सततं T　सुपापं QR
57c. परवाद° Q, परिवार° W　°लब्धं L　57d. °रर्दिताग R　58a. विवर्जितश्च W　58b–59a om. L　59b. परभूत° O
59c. विकर्मसक्तं W　सदुःखं Q　60a विवर्जितश्च CW
60b करोति om. L　60d. नियुक्तं ILW　बहुदानि° A　61a. विवर्जितश्च W　61c. भाग्यै° C, भागो° O　सठरं L, बठरं
रं W　कृतघ्नं C

चेष्टाबलेनैव विवर्जितस्तु
शुक्रः प्रसूते वधबन्धरक्तम् ।
क्रूरं कुकर्माश्रितमल्पसत्यं
प्रभूतशत्रुं धनदारहीनम् ॥६२॥
शुक्रो यदा वासरवीर्यहीनः
करोति मर्त्यं सतत कुचैलम् ।
चौरप्रदुष्टं बहुदुष्टसङ्गं
वीर्यप्रमुक्तं बहुविह्वलं च ॥६३॥
शुक्रो यदा वारबलेन हीन-
प्रसूते हृतशत्रुदारम् ।
सत्येन हीनं परिभूतमन्यैः
सदा सशोकं स्वजनैर्वियुक्तम् ॥६४॥
करोति शुक्रो ऽब्दबलेन हीनो
नरं निकृष्टं कुटिलस्वभावम् ।
वित्तैर्विहीनं गतबन्धुवर्गं
प्रवासशीलं कलहप्रियं च ॥६५॥
शुक्रो यदा मासबलेन हीन-
स्तदा प्रसूते वृजिनैः समेतम् ।
विवादशीलं व्यसनैः प्रतप्तं बाह्यम्
साधुजनस्य ॥६६॥

निवर्जितस्त W 63c. चौरं च दुष्टं BCILQW 63d. °प्रयुक्तं BCILQTW वियु° I, –भय° LTW, –भव° U 64 om. W
64b. करोति मर्त्यं बृहत्संकटौरं T 64c. परभूत° O
64d. °र्विमुक्तं CLS 66b. विजिनैः U 66c. °रतप्तं U, समेतं S
66d. वाक्यं ABCILOQRSTU, वाच्यं W

राबलनैव विवर्जितस्त
  शुक्रः प्रसूते मतिसत्यहीनम् /
लज्जाविमुक्तं विधनं कुचैलं
  पराङ्मुखं देवगुरुद्विजानाम् //६७//
शुक्रो यदा पञ्चबलेन हीन-
  स्तदा प्रसूते पुरुषं गतस्वम् /
अनार्यशीलं गतमानलज्जं
  भयातुरं कापुरुषं सजिह्मम् //६८//
इति श्रीवृद्धयवने शुक्रचारः //

67a नैव — 67c om. A   67c विवर्जितश्च W   67c °विमुक्तं S
विधुतं L   68c अनार्थ° TU, अनर्थ° L   col. इति
वृद्धयवनभाषाटीकायां श्रीमोहनदासमगहीकारितायां
शुक्रचार संपूर्ण ५, इति श्रीमीनराजकृतौ वृद्धयवने
शुक्रदर्शनचारः C   col. श्री° om. ILORT   after col. W
adds संपूर्णः

मेषे ऽर्कसूनुर्जनयत्यनार्यं
    कुवेषमाधिव्यसनं श्रमार्तम् /
गतश्रियं निष्ठुर
    विगर्हितं नि निमित्तवैरम् //१//
ासङ्गतिमर्थहीनं
    वृषे ऽर्कसूनुर्जनयेन्मनुष्यम् /
असक्तकर्माणमयुक्तवाक्यं
    वृद्धाङ्गनानां हृदयानुरागम् //२//
क्रमाद्धतो ऽर्कि मिथुने प्रसूते
    श्रमातुरं बहृणबन्धनार्तम् /
शठप्रयोगं छलकूटमेव
    दुष्टक्रियं दाम्भिकमन्त्रिणं च //३//
शनैश्चरः कर्कटके प्रसूते
    नरं दरिद्रं सुभगाभिमानम् /
सदा रुगार्तं जननीवियुक्तं
    मृदुं विशिष्टक्रियमाचरं च //४//
रो ऽर्किर्जनयत्यशीलं
    विगर्हिताचारगुणं मनुष्यम् /
अवृद्धदोषं निजलोकबाह्यं
    क्रियासु नीचासु सदाभिसक्तम् //५//

1–12 om. L   1a °त्यवीर्यं Q   1b श्रमार्थं Q   2c क्रमाण AS   2d हृदयानुगं च R   3a क्रमाहृतो ACS, क्रमाहृतो TU, क्रमार्यतो I   3b बहृण° ABCIQTUW   °बंधनार्थं Q   4c रुजार्तं SW   4d मृदं B, मृतं W   °मापरं T   5a °र्कि Q   5b °गणं BCQTUW, °णं I   5c °बह्यं S, °वाक्यं ABT, °चाह्यं C   5d सदाभियक्तं I

शनैश्चरः षष्ठमुपेत्य राशिं
नपुंसकाकारतनुं प्रसूते /
नराङ्गवेश्याभिरतं गतस्वं
शठं शिशुस्त्रीजनदूषणं च //६//
तुलाधरस्थस्त्वसितः प्रधान-
र्थपरं मनुष्यम् /
सुराष्ट्रदेशाटनलब्धमानं
वयःप्रकर्षोपकृतास्पदं च //७//
शनैश्चरो वृश्चिकगो
विद्वेषवैषम्यपरं प्रसूते /
धर्मादपेतं विषशस्त्रदग्धं
प्रचण्डकोपं निरयत्रपंचम् //८//
धनुर्धरस्थो मृदुमल्पवाक्यं
स्वधर्मवृत्ताभिरतं प्रसूते /
श्रुतार्थवाक्यं व्यवहारशिक्षा-
क्रियाभिधायज्ञमनल्पसौख्यम् //९//
स्थितोऽर्कसूनुर्जनयेन्मृगाख्ये
नरं स्ववंशोद्भवपूज्यमग्र्यम् /
क्रियाकथाचार्यमनेकशिल्पं
प्रवासिनं वृन्दपुरस्कृतं च //१०//

6c. °वेश्या° Q   7c. °देशाल्लनलब्धा° B, °देशानटलब्धा° Q
8d. °स्त्रचण्डं T   9c. सुतार्थ° Q   व्यवहारि° IOSTU
9d. क्रियाभिधीय° ARST, क्रियाकथाभिधीय° U   10a. °न्मनुष्यं गावस्थं गास्ते Q   10b °मग्नं I, °मन्यं A

शनैश्चरः कु—धारे प्रपन्नः
    कुर्यान्नरं सत्य—नं सवाक्यम् /
आरोग्यकायं वरयानयुक्तं
    शूरं नृपैः पूजितमल्पपापम् ॥११॥
शनैश्चरो मीनयुगे प्रसूते
    नृसंब—सुहृद्दरिद्रम् /
प्रख्या—सत्यार्जितमिष्टयज्ञं
    विद्यासु शिल्पेष्व—ज्ञातशिल्पम् ॥१२॥
होरां गतो वासरपस्य सौरि-
    र्नरं प्रसूते बहुवैरयुक्तम् /
प्रणष्ट—र्मं विगता—मानं
    दयाविहीनं परदारलु—म् ॥१३॥
होरां गतो रात्रिपतेस्तु सौरि-
    र्नरं प्रसूते बहुकीर्तियुक्तम् /
सौन्दर्यसौख्यार्थसमृद्धियुक्तं
    प्रियं मनोज्ञं प्रणतं सुराणाम् ॥१४॥
द्रेष्काणसंस्थो दिनपस्य सौरिः
    करोति कन्याप्रजनं मनुष्यम् /
व्यायामभाजं विगतप्रतापं
    विपच्चशीलं सततं सजिह्मम् ॥१५॥

11a. कु—गते Q 11d. शूरं नृपैः] नराधि—पैः W °मल्पमायं S
12a. शनीश्चरो ABCI मीनयुते BCIQTUW मनुष्यं Q
12b. सबंधु—°AC 12c. °सत्यान्वित° AB 12d. शिष्ये° Q
L begins again with 13 13a. वासरपस्य — 13d follow 15c
°—भाजं in A 13b. °वैरि° LQ 13°लब्धं Q 14c. °समृद्ध° C [सुराणां] °वैसुशीलं AS 15a. द्रेक्काण° LU, दृष्काण° BO, दृक्काण° AIR सौरः R 15c. व्ययाम° ABTOS °—र्यां LW 15d सततं om. BW, सु—गं L सजिह्मं Q

भागे तृतीये रविजः प्रसूते
  चन्द्रस्य मर्त्यं महदर्थयुक्तम् /
विवेकिनं सर्वकलासु
  विपक्षहीनं सुतलालसं च //१६//
२भागे तृतीये ऽवनिजस्य सौरि-
  श्चौरं परप्रेष्यकरं प्रसूते /
सुनिष्ठुरं पापरतं नृशंसं
  व्यपेतलज्जं गतसौहृदं च //१७//
द्रेष्काणसंस्थः शशिजस्य सौरः
  करोति मर्त्यं बहुशास्त्रयुक्तम् /
विज्ञानिनं धर्मरतं प्रसक्तं
  स्वदाररतं गतसाध्वसं च //१८//
द्रेष्काणसंस्थः सुरपूजितस्य
  सौरः प्रसूते द्विजदेवभक्तम् /
प्रियंवदं सर्वसहं प्रगल्भं
  महाजनैः पूजितसाधुदारम् //१९//
२भागे तृतीये रविजः प्रसूते
  शुक्रस्य तिष्ठन् मधुराभमानम् /
लाभान्वितं धर्मपरं समित्रं
  हतारिपक्षं व्यसनैर्वियुक्तम् //२०//

17a. बांणजस्य W, रविजस्य T सौर° QR 17b. चैरं W °प्रेषकमत्र सूते Q 17d. व्यपेततनुं S, व्ययेतकल्कं L 18 om. L
18a. दृष्काण° BO, द्रिष्काण° C, दृक्काण° AIR, दृकाण° TU
18b. बहुशस्त्र° AC 18c. विज्ञाननं B, विज्ञानं O प्रसूक्तं TU, त्रशास्यं R 18d. स्वपर° C, स्वदम° Q °नष्टं S 19a. द्रेक्काण° L, दृष्काण° BIOS, दृक्काण° ARTU 19c. सर्व° om. BW, साह° L
19d. पूजितसाहभागे L, पूजितमेव नित्यं Q, पूजितसा BW
20b–21a om. U 20c. लोभान्वितं BLQW 20d. °विम्... LW

गृहिभागे
———————ऽस्यम् /
नृपात्मजैः प्रीतिपरं वदान्य-
मनुक्तरागं बहुमित्रयुक्तम् //२१//
सूर्यस्य भागे नवमे ऽर्कसूनुः
करोति मर्त्यं बहुतीव्रकोपम् /
हिंस्रं प्रणष्टं सुजनैर्वियुक्तं
प्रद्वेषशीलं परिभूतमन्यैः //२२//
चन्द्रस्य भागे नवमे ऽर्कसूनु-
र्नरं प्रसूते सुकलत्रयुक्तम् /
शास्त्रानुरक्तं कृतदानशीलं
जितेन्द्रियं मन्त्रविदां वरिष्ठम् //२३//
शनैश्चरो भौमनवांशसंस्थो
नरं प्रसूते वचनस्वभावम् /
पराङ्गनासक्तरतं विधर्मं
मित्रैर्विहीनं सततं कुचैलम् //२४//
शनैश्चरः सौम्यनवांशसंस्थः
करोति मर्त्यं सुखभोगतृप्तम् /
कान्तं शुभार्यात्मपरं विचित्रं
प्रियातिथिं यज्ञरतं प्रधानम् //२५//

21a. स्वाहिभागे B, स्वकीयभागे L 21b. समाभार° L 21c. नदान्यं B, नदा L 21d. °रोषं L बहुपुत्र° AS 22a. ऽर्कसूनुः] चकष्टं L 22c. सुनै° B, सुनयै° QW, °र्विमुक्तं LQ 22d. विद्वेष° W, प्रशाम C परिभात° Q
23b. स्वकलत्र° L 23c. कृमु° L, अदत्त° W 24a. शनीश्चरो ABCIOSTU 24b. सुबाते R वंचन° SW, तिमल° Q
24c. °संगतया W 25c. कांतां C, कीर्तिं L शुभार्यात्म° OU, शुभार्यात्मज° IS, शुभार्यासु W, शुभायारु° Q, शुभालाभ° R विचित्रं ABCILOT, विचित्रं Q 25d. यज्ञतप Q, यज्ञपरं L प्रधान्यं O

शनिर्नवांशे सुरपूः
    नरं प्रसूते सुरविप्रभक्तम् ।
विवेकविद्यागमसत्ययुक्तं
    प्रसन्नवक्त्रं प्रचुरान्नपानम् ॥२६॥
मातण्डजः शुक्रनवांशसंस्थः
    करोति तीर्थाश्रयमिष्टधर्मम् ।
प्राज्ञं कृतज्ञं बुधलोकसेव्यं
    जितेन्द्रियं शुभ्रमतिं मनोज्ञम् ॥२७॥
नवांशके स्वे प्रकरोति सौरो
    नरं सुदारारतरं विरोगम् ।
सुयोषितां सङ्गप्रवृद्धसौख्यं
    हताररिपक्षं स्थिरमुग्रवीर्यम् ॥२८॥
सूर्यांशके वासरपस्य सौरो
    नरं प्रसूते गतधर्मबुद्धिम् ।
सुनिष्ठुरालापपरं सुदुष्टं
    नीचानुरक्तं विगतप्रभावम् ॥२९॥
सूर्यांशके नृपतेः प्रयातः
    सौरः सुवाते समतिं मनुष्यम् ।
लाभान्वितं पार्थिवमानपुष्टं
    गान्धर्वशिल्पादिषु सक्तचित्तम् ॥३०॥

26b नरविप्र° L   26c °विद्यागमरूप° S, °नित्यांग - - - सत्य° W   27a मार्त्यंगजः O   27a °नवांश° – 27d शु° om. I
27b तीर्थाश्रम° L   28a सौरिः W   28b विरोज्ञं L, सुरोगं C
28c सुयोषिद्धा BRW   संगविवृद्ध° S, संगतवृद्ध° W, भंगप्रवृद्ध° R   28d स्थिरबुद्धि° L, स्थिरधीरमुग्र° S
29a नवांशके S   29b °धर्मवृद्धिं C   29c °रालालपरं C, °रालापरतं A, °रं लाभपरं S   29d °प्रभाषं R   30a नृप्त° B, नच° A, भच° CIOQSTUW, रुच° R, रात्रि° L   प्रजातः I
30b प्रसूते G   30c °मानयुक्तं W

शनैश्चरो द्वादशभागसंस्थो
    नरं प्रसूते क्षितिजस्य जिह्मम् /
प्रपीडितं पित्तविकारदोषै-
    र्भीरुं सदा निन्द्यतमं नराणाम् //३१//
मार्तण्डजो द्वादशभागसंस्थो
    बुधस्य सूते ऽप्रतिमं मनुष्यम् /
वित्तान्वितं धर्मपरं सलज्जं
    कीर्त्यान्वितं शास्त्रविशारदं च //३२//
आदित्यजो द्वादशभागसंस्थो
    जीवस्य सूते ऽर्थपरं मनुष्यम् /
पुत्रान्वितं बान्धवनामयुक्तं
    लज्जान्वितं ब्राह्मणसंमतं च //३३//
अर्कांशके भार्गवजस्य संस्थः
    करोति मर्त्यं प्रचुरान्नपानम् /
विशिष्टदाराम्बररत्नभाजं
    भाग्याधिकं प्राणभृतां वरिष्ठम् //३४//
सूर्यांशके स्वे दिनपस्य पुत्रो
    नरं प्रसूते स्थिरबुद्धियुक्तम् /
व्रतोपवासान्वितमिष्टमित्रं
    कुल

31c पित्त° – 32c धर्म° om. T   31c. मित्र° U   31d. निंदतमं C   33c. बांधवलाभ° S, बांधववर्ग° Q, वाच्यमान° L
34c °दारं वर° L, °दासं वर° CU, °दांबर° W   34d. प्राणासृतां A   35d. कुशीलं C

त्रिंशांशके भूमिसुतस्य सौरः
करोति मायात्मकमुग्रचेष्टम् ।
—• रेन्द्रैः परिभूतदेहं
रोगापतप्तं प्रबलस्वभावम् ॥३६॥
त्रिंशांशके स्वे रविजः प्रसूते
नरं विनीतं विगतारिपक्षम् ।
वित्तार्जने तत्परमिष्टमित्रं
महाबलं सत्यरतं नयज्ञम् ॥३७॥
त्रिंशांशके देवगुरोः प्रयातः
शनिः प्रसूते सुभगं मनुष्यम् ।
व्रतोपवासार्जितधर्मवृद्धिं
प्रियंवदं सत्ययुतं प्रगल्भम् ॥३८॥
त्रिंशांशके सोमसुतस्य सौरि-
र्नरं प्रसूते प्रवरं कुलस्य ।
सौम्यान्वितं पण्डितमिष्टधर्मं
नृपप्रियं शास्त्ररतं सदैव ॥३९॥
त्रिंशांशके 2 भार्गवनन्दनस्य
करोति सौरः सुतसौख्ययुक्तम् ।
प्रियातिथिं बुद्धियुतं कृतज्ञं
नारीप्रियं पूज्यतमं नृलोके ॥४०॥

37c. तत्स्वर° B, नमद° T °मिष्टधर्मं W 37d. सत्यतरं Q
38a. प्रतापी L; 39a om. I; 39b प्रवरं om. W 39c. सोमान्वितं W, सौम्याकृतिं R, सौख्यान्वितं S पीडित° CLU, प्रीणित° W
39d. नृपत्रयं R 40b om. TU; C has शनिः स्थितः सौख्यकरो नराणां

शनैश्चरो मित्रबलेन युक्तो
नरं प्रसूते बहुमित्रबन
स्थिरस्वभावं बहुकीर्तियुक्तं
विद्याविनीतं सततं मनोज्ञम् //४१//
शनिर्यदा स्थानबलेन युक्त-
स्तदा प्रसूते शुचिमप्रमत्तम् /
प्रभूतवेश्मार्थयुतं सुदारं
चतुष्पदाढ्यं नृपपूजितं च //४२//
मन्दो यदा स्वोच्चबलेन युक्त-
प्रसूते
प्रभूतरत्नार्थसुतै:
गतारिपक्षं सततं सुशीलम् //४३//
नवांशवीर्यो ऽर्कसुतो बलिष्ठो
नरं प्रसूते बहुयज्ञशीलम् /
मेधाविनं पुण्यपरं जितारिं
सभासदं ब्राह्मणसंमतं च //४४//
शुभग्रहालोकनवीर्ययुक्त:
करोति सौरो दृढकार्यमुग्रम् /
कृषिक्रियालब्धसुभूरि
वराश्रयक सात्त्वन सशीलम् //४५//

41a. शनीश्चरो ABCIOTU 41b. °बंधं IL 41c. बहुमित्र° ABCILOQSTUW 41d. विद्या° om. A °विहीनं BCILW 42a. °बलेन om. Q 42b. °सूते om. T सुविनप्रमत्तं S 42c °वेश्या° BCILORW, °हिता° Q 44 in marg. Q 44a. प्रबलो ऽर्कसूनु° R 45a–46b om. L 45b. टककार्य° I 45c. कृषिकृपालब्ध TU °सु°] °हि° ABCIORSTU °भूरिसंस्थं O

पुंक्षेत्रवीर्येण युतो ऽर्कसूनु-
    र्नरं प्रसूते बहुवीर्ययुक्तम् ।
परैरधृष्यं वनितास्वभीष्टं
    प्रियंवदं सर्वकलासु दक्षम् ॥४६॥
शनैश्चरो दिग्बलभृद्द्वियुक्तो
    नरं प्रसूते प्रभुरान्नपानम् ।
दाक्षिण्यशीलं बहुभोगयुक्तं
    गान्धर्वशीलं द्विजदेवभक्तम् ॥४७॥
चेष्टाबलाढ्यो रविजः प्रसूते
    नरं सुचेष्टं सुतरां सदैव ।
सत्यान्वितं देवगुरुप्रभक्तं
    सुतीर्थयुक्तं पितृभक्तिरक्तम् ॥४८॥
शनैश्चरो रात्रिबलेन युक्तो
    नरं प्रसूते रतसौ-
  भोगाधिकं सौम्यवपुं सुचेष्टं
    दयान्वितं दानरतं सलज्जम् ॥४९॥
शनैश्चरो वर्षबलेन युक्तः
    कीर्त्याधिकं संजनयेन्मनुष्यम् ।
नित्यं सदान्तं व्यसनैर्विहीनं
    जितेन्द्रियं विप्रसुरानुरक्तम् ॥५०॥

For 46a-b B has 44b बहुयज्ञशीलं – 44d. 46c परैरभीष्टं A[B]CI[L]OQSTUW वनितास्वभीष्टं om. Q 47a. °रिद्धियुक्तो ABLORTU, °संयुतश्च Q, °रिसंप्रयुद्धियुक्तो I 47d °देवरक्तं R 48b. सुरतं W 48d. सुतीर्थयुक्तं om. TU 49b. रति° W 49c. °वपुः SW 49d. सुलज्जं S 50c. निसुदांतं B, निसुंदले W, निशादनं तु L, मातुर्यशीलं Q 50d. विप्रसदानुरक्तं Q

शनैश्चरो मासबलेन युक्तो
नरं प्रसूते नयनाभिरामम् /
प्रतापिनं धर्मपरं सहिष्णुं
हितैषिणं सर्वजनस्य नित्यम् //५१//
शनैश्चरो वारबलेन युक्तो
नरं प्रसूते बहुशास्त्रयुक्तम् /
अहिंसकं मानगुणैः स-
प्रभूतकोशं जनवल्लभं च //५२//
होराबलाढ्यो रविजः प्रसूते
सन्मानभाजं जननीप्रभक्तम् /
धर्मे रतं पार्थिवमा...
विशिष्टलोकानुगतं सदैव //५३//
शनिर्यदा मासबलेन युक्त-
स्तदा प्रसूते गतशत्रुपक्षम् /

विमुक्तरोगं गतपापमेव //५४//
शनैश्चरो मित्रबलेन हीनो
नरं प्रसूते ऽतिखलं विमित्रम् /
हतात्मजं श्रीरहितं विरूपं
प्रपीडितं भूपतिना सदैव //५५//

51 follows 52 in T 51a. लग्नबलेन W, त्रिरबलेन Q 51b. ॰नाभिरामं AS 51d. हतैर्षिणं AB, हितौषेणं I 52b ॰शास्त्ररता R 52c–53c om. Q 52d. प्रसूत॰ AC 53c. रतिं LR 54c. स्वकीयपक्षं W, स्वपक्षमुख्यं Q सुकर्म॰ Q 54d. ॰रोमं L च भयादपेतं W 55b. ऽसखलं R तिमित्रं R, रीमित्रं I 55c. हतात्मकं L, हतात्मजं S, तृतात्मजं U

स्वस्थानवीर्येण विवर्जितोऽर्कि-
र्नरं प्रसूते विधनं विशीलम् ।
परार्तिनं पापरतं कृतघ्नं
रोगार्दितं बान्धववर्जितं च ॥५६॥
ॐवीर्येण विवर्जितोऽर्कि-
[र्नरं प्रसूते विधनं विशीलम् ।]
पापैर्जितं हीनधनैश्च युक्तं
भूतादिदोषैः सहितं सदैव ॥५७॥
—त्रिवीर्येण विवर्जितोऽर्किः
करोति नित्यं बहुशस्त्रयुक्तम् ।
मूर्खं सहिंस्रं धनधान्यहीनं
प्रमादिनं पार्थिवपीडितं च ॥५८॥
———————— ॥५९॥
पुंक्षेत्रवीर्येण विवर्जितस्तु
सौरः प्रसूते रिपुरोगयुक्तम् ।
दौर्भाग्ययुक्तं विकृतं सुतीक्ष्णं
सदा विधर्मं निजधर्महीनम् ॥६०॥
—श्चरो दिग्बलवर्जितस्तु
नरं प्रसूते परदाररक्तम् ।
निराश्रयं गुरुद्रोहरक्तं
विपन्नलज्जं सरुजं सदैव ॥६१॥

56-57 om. Q 56a कें O 56c-57b om. W 56c. अनघ्नं I
56d. रुगार्दितं R 57b = 56b 57c पापार्जितं CIOTU,
नोरे जितं B, पौरैर्जितं L, परैर्जितं R °धनानि R
युक्तं om. I 57d om. R, add. in marg. R[2] 57d. मूर्तादि° U
58a कें Q 58b. निंद्यं R बहुशास्त्र° ABCILOQRSTUW
60a-b विवर्जितो कें करोति नित्यं Q 60c. विकृतिं L
61c. निराशयामुगरुच्चोहरकं T 61c °द्रोहयुक्तं R,
°भक्तिहीनं Q

चेष्टाबलोनो रविजः प्रसूते
कुचेष्टितानर्थपरं मनुष्यम् ।
विद्वेषशीलं कुटिलं कुदारं
सन्मानहीनं धनवर्जितं च ॥६२॥
शनैश्चरो रात्रिबलेन हीनो
नरं प्रसूते रतसौख्यहीनम् ।
मायाविनं व्याधिभिरार्तदेहं
दुष्टाशयं सर्वजनैश्च निन्द्यम् ॥६३॥
शनिर्यदा वारबलेन हीन-
स्तदा प्रसूते विधनं मनुष्यम् ।
बहुप्रकारैर्व्यसनैरुपेतं
निन्द्यं कुवेषं बहुसाहसं च ॥६४॥
शनैश्चरो वर्षबलेन हीनो
नरं प्रसूते ज्वरपित्तयुक्तम् ।
नानाशिरोर्तिप्रभवैर्विकारैः
संपीडितं सत्यविहीनमेव ॥६५॥
शनैश्चरो मासबलेन हीनः
करोति मर्त्यं परतर्ककं च ।
गतस्वकं हानियुतं कठोरं
प्रवासशीलं दयिताविहीनम् ॥६६॥

62a. चेष्टाबलेनैव विवर्जितो ऽर्किः T   62b. कुचेष्टता° Q, सुचेष्टिता° AIORSTUW, सुचेष्टता° BCL   63c. °रार्तिदेहं L, °रार्त्यदेहं C   63d. नित्यं S   64 om. Q   64a. शनैश्चरः सारबलेन W   65b. °पित्तभाजं S   65d. प्रपीडितं S   66b. नरं प्रसूते W   °तर्कुकं ACOR   66c. गतस्वयं R कवेरं CTU

हाराबलोन: प्रकरोति सौरि:
  नरं प्रमूर्खं सुतदारहीनम् ।
विधर्मरक्तं सततं कुवेषं
  प्रपीडितं बन्धुजनेन नित्यम् ॥६७॥
शनैश्चर: पद्मबलेन हीन:
  करोति मर्त्यं निजपक्षहीनम् ।
पापात्मकं दुष्टिनिरार्तदेह:
  विदेशशीलं परतर्कक म ॥६८॥
इति श्रीवृद्धयवने शनैश्चरचार: ॥

67a. °बलेन प्र° IQW, °बलेनैव C   67b. मुमूर्षं W, प्रसूतं C
68c. पामात्मकं R   दर्दृष्टि° T, दंडष्टि° ABSU, दहृष्टि° R, दस्युष्टि° Q   68d. वर° TU   °तर्कुकं AOR   col. इति श्रीवृद्धयवनभाटीकायां सगहीजीश्रीमोहनदासजीकारितायां शनैश्चरचार संपूर्ण Q   col. श्री° om. IORT   after col. W adds संपूर्ण:

मेषस्य लग्ने तु भवेत् प्रचण्डो
धनी सर्वकलासु दक्षः /
स्वपक्षहन्ता बहुमन्युयुक्तो
विस्तीर्णकरः सदैव ॥१॥
वृषस्य लग्ने तु नरः प्रसूतो
मित्रः वशी हास्यरतः सुवाक्यः /
विद्यानयुक्तो गुरुलोकभक्तः
शूरः प्रधानः सुतलालसश्च ॥२॥
तृतीयलग्ने तु नरोऽभिजातो
नलभः /
द्विजपूज्यः परपक्षहन्ता
जितेन्द्रियः स्याद्बहुवित्तयुक्तः ॥३॥
लग्ने कुलीरस्य तु संप्रसूतो
प्रियोऽसुहृद्दृग्गिहयोगः /
सौभाग्ययुक्तो रतिलालसश्च
मन्त्रोपसेवी गुरुवत्सलः स्यात् ॥४॥
सिंहस्य लग्ने तु भवेत् प्रसूतो
नरो विभागी रिपुमर्दनश्च /
लग्ने विधत्ते विधनं मनुष्यं
बहाशिनं नित्यविमुक्तलज्जम् /
निन्द्यं सतां नीचरतं कृतघ्नम् ॥५॥

1–12 om. L   1a शुभवेषसूतो BIQW   1b (ABCIOQRTUW) °चंडो] धने Q
1d मंदो मत° Q, महःमति° R   2a लग्ने — 2b हास्यरतः] काले सुरतः W   2a तु — 2b सुवाक्यः] सुभगं मनुष्यं सुशीलसर्गं सर्वैः स्वरूपं Q   2a प्रसूतो — 2d प्रधानः om. I   2b मैत्रः R
3b °नलभाः I   4a संप्रजातो S   4b °प्रियस्त्यक्त° W
°दृग्गिह° om. Q   4c रत° COR   °लाभसश्च Q   4d गुरुवत्सलश्च Q   5b °पुमर्दनश्च — 5e in marg. R   5d शिनं TU   °विमुक्तलज्जां Q   5e om. Q   5e निंद्यं TU

कन्याविलग्ने तु नरः प्रसूतो
[विज्ञानविद्यागमशास्त्रलब्धः/]
लब्धो गुरूणां रतिलालसश्च
मानी च सौभाग्यगुणैश्च युक्तः //६//
तुलाविलग्ने तु नरः प्रसूतः
स्वकर्मणा जीवति बुद्धिमांश्च/
विद्वत्प्रियः सर्वकलास्वभिज्ञ-
श्चलस्वभावो वनिताजितश्च //७//
जातो विलग्ने यदि वृश्चिके स्यात्
चण्डोऽभिमानी पुरुषोऽतिशूरः/
विज्ञानवान् काव्यकरः कृतज्ञः
स्यात् संविभागी बहुरोषचित्तः //८//
र्विलग्ने भवति प्रसूतः
नः सुभगो मनुष्यः/
शूरोऽर्थवान् भीतिपरः कृतज्ञो
बन्धूपभोग्यो द्रविणो वपुष्मान् //९//
मृगस्य लग्ने पुरुषोऽभिजातः
बहुभृत्य
लब्धोऽलसः स्वात्मपरः कृतघ्नः
र्यनित्यो गुरुवत्सलश्च //१०//

6b = 3b 6b–7a om. T 6c. रत° BCIOQR 6d. मानीरसौभाग्य° ABCIOSUW, पानीरसौभाग्य° R 7b. जिवत Q 7c. विद्वत्प्रीयः Q 8a. वृश्चिकस्य Q 8b. चंडाभिमानी ASTU पुरिषो Q 8c. विज्ञानवान् Q with 8 Q ends 9c. शूद्रोर्य° T, सूर्य° U °वाशीति° A, °वाचीति° R 9d. बन्धूप° CSUW वयष्मान् IO 10b. °कृत्यपुत्रः B, °पुत्रलब्धः SW 10c. लब्धो om. SW स्यात्मानरः ABCORTU, स्यात्मपरः I, स्यातमवरः W, स्यात्म S कृतज्ञः C, कृतघ्नः I 10d. °वत्सलस्य BCI

कुम्भस्य लग्ने पुरुषो ऽभिजात—
——— ———. ———गेहदश्च /
प्रभूतधान्यार्थयुतः प्रचण्डो
लुब्धो ऽन्यनारीरतिलालसश्च //११//
मीने विलग्नोपगते ऽभिजातः
नद्रविणो ऽल्पकश्च /
त्यागात्मवान् शास्त्रविशारदश्च
न दीर्घसूत्रो न च मन्दबुद्धिः //१२//
होरा यदा वासरपस्य लग्ने
तदा प्रसूते बहुसौख्ययुक्तम् /
विवेकिनं धर्मपरं कृतज्ञं
त्यागात्मकं सत्यरतं मनुष्यम् //१३//
शीतांशुहोरा यदि जन्मकाले
पराङ्गनाभोगपरो नरश्च /
शुभे शुभं तत्र च क्रूरयुक्ते
सम्भोगकाले न चिरप्रदिष्टम् //१४//
त्र्यंशो यदा वासरपस्य लग्ने
तदा सुतीक्ष्णं जनयेन्मनुष्यम् /
कलिप्रियं दानरतं विशालं
विद्वेषशीलं द्विजदेवतानाम् //१५//

1d. सुनारी° S, यथा नारी° U °रत° R, °ति° U 12b. चकामः R, ल्पकश्च I after 12 W adds इति श्रीवृद्धयवने द्वादशलग्नविचारः संपूर्णः L begins again with 13
order in C: 13a, 14b–14d, 13b–14a 13c–14d om. L
4 om. BR; C has after 14a, TU before 14a:
रा यदा रात्रिपतेर्विलग्ने
तदा प्रसूते सुखिनं गुणाढ्यम् /
चित्तं सुवश्यं कृशांगं
पुत्रैर्विरोधं चलचित्तचौरम् //
4b नरः स्यात् W 15a. अंशो BCUW 15d. °देवदानं R

न्द्रस्य लग्ने तु यदा त्रिभाग-
स्तदा प्रसूते सुखलाभवन्तम् /
श्रियान्वितं भक्तिपरं गुरूणां
प्रख्यातकर्माणमुदारचेष्टम् //१६//
मध्यांशको भूमिसुतस्य लग्ने
करोति मर्त्यं क्षतजार्तदेहम् /
क्रूरस्वभाव हतबन्धुदार
प्रतापहीनं विषयार्दितं च //१७//
तृतीयभागः शशिजस्य लग्ने
करोति सौम्यं सहजं मनुष्यम् /
न दीर्घसूत्रं न च वित्तहीनं
सत्याधिकं भूरिसुतं सदैव //१८//
त्र्यंशो यदा देवपुरोहितस्य
लग्नं प्रयातः प्रकरोति मर्त्यम् /
तेजस्विनं सर्वसुखाधिवासं
सुधर्मिणं प्रीतिकरं स्वपक्षम् //१९//
द्रेष्काणसंस्थो भृगुजस्य लग्ने
वित्तान्वितं संजनयेन्मनुष्यम् /
शास्त्रानुरक्त गतरोगपाप
नृपप्रियं देवगुरुप्रसक्तम् //२०//

18b. सरज्जं I, सहज्जं ATW 18c. नवचित्रहीनं B 18d. सत्वाधि° W 19a. अंशो ABCW 19c. सर्वगुणाधि° W 19d. सुधर्षिणं I स्वपक्षे R 20a. दृष्काण° BO, दृक्काण° ART °संस्थो भृगुज्ञो विलग्ने ABCILORSTUW 20b. चिंतान्वितं L

शनैश्चरस्य त्रिविभागग
    लग्न: प्रसूते कृपणस्वभावम् /
भानेन हीनं बहुदु:खयुक्तं
    चलप्रतिज्ञं शठतासमेतम् //२१//
    भागे नवमे विवस्वान
  नरं प्रसूते विजितं खलं च /
नीचानुरक्तं वृजिनै: समेतं

  T२१ का. रात्रिपतेर्विल
    > मर्त्यं बहुशोभनाढ्यम् /
कृष्यासवित्तं सुतसौख्ययुक्तं
  प्रियातिथिं सर्वजनप्रियं च //२३//
  यका भूत लग्ने
  करोति मर्त्यं बहुदु:खयुक्तम् /
पित्तज्वरासृक्परिपीडितं
  प्रतापहीनं सततं कुचैलम् //२४//
लग्ने नवांश: शशिनन्दनस्य
  करोति मर्त्यं बहुवित्तयुक्तम् /
मेधाविनं सर्वसखर्द्धिभाजं
  विवेकिनं पण्डितमल्पवैरम् //२५//

२१a. शनैश्चरो बहिविभागसंस्थो ABCILORSTUW   21b.–21d om. ABLORSW   21b. लग्नस्य सूते CITU   कृपणगतस्त्वं I
21c–d om. TU; I has
विद्याविहीनं स्वजनैर्विरोधं
  रागातुरं नीचजनैश्च युक्तम् //
22b. खलं च] स्वलंबं S, मरेण W   22c. वृजनै: CO   22d. जित° SW   23b om. L   °शोभनाढ्य I, °शोकनाढ्यं B   23c. कृषार्त° T   24a. भूमिसुतस्य R   25d. विवेकिनं om. W   °वैरिणं ABCIORS

नवांशको देवपुरोहितस्य
लग्ने विधत्ते सुतवित्तसौख्यम् /
नरातिगाढं कनकायभाजं
सदा नराणां नृपतेश्च पूज्यम् //२६//
नवांशको भार्गवजः
लग्ने विधत्ते बहुपुत्रभोगम् /
मौक्रियासिद्धिपरोपघातं
दिव्याङ्गनाभोगसुखं सदैव //२७//
नवांशकः सूर्यसुतस्य लग्ने
नृणां विधत्ते बहुभूमिनाशम् /
अर्थक्षयं न्यायमतान्तमुग्रं
प्रमोषणं चौरकृतं सदैव //२८//
सूर्यांशको वासरपस्य लग्ने
नरं प्रसूते बहुमन्युवश्यम् /
लाभान्वितं धर्मसुखैर्विहीनं
निस्त्रिंशमुग्रं चपलस्वभावम् //२९//
सूर्यांशको रात्रिपतेर्विलग्ने
करोति मर्त्यं बहुरत्नभाजम् /
नानार्थलाभैः सहितं सुशीलं
कुलप्रधानं बहुमित्रयुक्तम् //३०//

26c. नरातिगाव : ABILORSW, नरो तिगीते CTU कनकं ह्याज: ABILORSW, निपुणं करोति CTU 26d. पूजां ABCILORSTUW ABCILORSTUW 27c सुरूपचेष्टं गुणिनं समृद्धं CTU, ह्यान्वितं भृत्यजनानुयातं L, - - - - - - - - - घातं B, - - - - - - - - - - यातं R 27c °परोपध्यातं - - - ज्ञातं O 28c. °क्षमा L, °कृपं I न्यायमनंत° BCLRSU, नायमतंत° I, ———— T, व्याधिमनंत° O °मुग्नं BR 28d. प्रपोषणं ABCILOSTUW 29b बहु° — 30b मर्त्यं om. T 29b °मन्ययुक्तं L 29c. लोभान्वितं W धर्मसुरै° ABCLRSTU, धर्मसुतै° O, धर्मपरै° W 29d. निस्त्रंश° ACOU

सूर्यांशको भूमिसुतस्य लग्ने
नरं प्रसूते रुधिरामयाढ्यम् ।
पामादिरोगैर्व्यसनैः समेतं
प्रपंचयुक्तं रणकातरं च ॥३१॥
सूर्यांशकः सोमसुतस्य लग्ने
नरं सुवाते सुभगं सुशीलम् ।
विद्यासु रक्तं गुरुदेवभक्तं
परैरधृष्यं रतलालसं च ॥३२॥
सूर्यांशको देवगुरोर्विलग्ने
करोति मर्त्यं बहुशास्त्ररक्तम् ।
ानुरागेण युतं विनीतं
प्रभूतमित्रं रणकोविदं च ॥३३॥
सूर्यांशको ार्गवनन्दनस्य
लग्ने प्रसूते सुभगं मनुष्यम् ।
रूपान्वितं पार्थिवमानयुक्तं
प्रियातिथिं पुत्रधनैः समेतम् ॥३४॥
सूर्यांशको भास्करनन्दनस्य
लग्ने प्रसूते रणरोगयुक्तम् ।
नरं कुशीलं निजबन्धुहीनं
शोकार्दितं हानियुतं सदैव ॥३५॥

31b. °रामयाप्यं T, °रामपाठवं U, °राम्यपायं W, °रायपाव्यं S, °राम्रयाव्यं A 31c. °मादिरोगैर्व्य° om. A 31d. प्रचंडयुक्तं रणकारवंतं C 32b. प्रसूते L 32d. रति° O, रस° R 34c ्यान्वितं W 35c. °बंधादीनं BL 35d. शोकान्वितं W

त्रिंशांशको भूमिसुतस्य लग्ने
   करोति मर्त्यं व्यसनाभिभूतम् /
व्ययेन हीनं बहुवैरयुक्तं
   प्रपूजितं भूपतिना सदैव ॥३६॥
त्रिंशल्लवः सूर्यसुतस्य लग्ने
   करोति मर्त्यं परदेशरक्तम् /
क्षुत्तृड्भ्रमार्तं बहुरोगयुक्तं
   स्त्रीणामभीष्टं प्रणतारिपक्षम् ॥३७॥
त्रिंशांशको देवगुरोर्विलग्ने
   नरं सुवाते बहुशास्त्ररक्तम् /
दृढप्रतिज्ञं दृढसाहसं च
   सत्यात्मकं देवगुरुप्रसक्तम् ॥३८॥
त्रिंशांशकः सोमसुतस्य लग्ने
   नरं प्रसूते सुखिनं समृद्धम् /
सद्धर्मयुक्तं गुरुबन्धुभक्तं
   मिताशिनं धर्मपरं कृतज्ञम् ॥३९॥
त्रिंशांशको भार्गवनन्दनस्य
   लग्ने प्रसूते सदयं मनुष्यम् /
   न्वितं सत्यपरं कृतज्ञं
   सदारचेष्टं सुखिनं सुरूपम् ॥४०॥

36c. व्यपेत° OU   °शीलं O, युक्तं L   37c–38d om. I   37c. क्षुत्तृक्षमार्तं BO, क्षुत्तृट्श्रमार्तं L, क्षुक्षुक्षमार्तं A, क्षुदं भ्रमार्तं CSTUW
38a–38c om. ABLORSW   38d: विज्ञानवाद्यत्रकलासु दक्षं CTU
39b. समृद्धिं O   39c. सद्धर्म° R   39d. मितासिनं A, विद्यान्वितं C   कृतज्ञं] सलज्जं R   40d–41d om. W
40d–41c करोति om. S   40d. सुखिनं सुरूपं om. B, बहुलाभयुक्तं I, विविधार्थयुक्तं L   °रूपं in marg. R

लग्नं यदा स्थानबलेन युक्तं
    तदा नृणां स्थानविवृद्धिदं स्यात् ।
करोति पूजां नृपलोकजातां
    सौभाग्ययुक्तं च कलत्रलाभम् ॥४१॥
लग्नं यदाशोत्थबलेन युक्तं
    तदा प्रसूते गुणिनं मनुष्यम् ।
सर्वासु दिक्षु प्रकरोति लाभं
    रोगारिनाशं प्रियतां च लोके ॥४२॥
चेष्टाबलाढ्यं प्रकरोति लग्नं
    नृणां सचेष्टां प्रियमित्रलाभम् ।
मिष्टान्नपानं विविधं च लोके
    चतुष्पदानामधिपत्यतां च ॥४३॥
लग्नं यदा कालबलेन युक्तं
    तदा नराणां प्रियलोभकारि ।
सदा तु पूजां नृपतेः   सलोकं
    रोगक्षयं साधुजनेन सख्यम् ॥४४॥
लग्नं यदा स्थानबलेन हीनं
    तदा प्रसूते परदेशरक्तम् ।
—स्थानविद्वेषपरं सुजिह्मं
    पराचरकं परदारसक्तम् ॥४५॥

For 41b T has 42b 41c. पुज्यां I 41d. कलत्रजातं AOSTU, कलत्रयुक्त L 42a. यदा स्वोच्च° C, यदाशोच्च° U, यदाशोत्र° T, यदाशोत्व° O, यदाशोस्य° L 42b गुणमं I 42c–42d रोगारिनाश om. BLR; CTU have: सद्दानरक्तं विमलप्र सुरूपदेहं 42d: --रम्येष्टं सुखिनं सुरूपं S 42d. लोकैः T 43a. °बलायं I 43b. प्रियतां च लोके AOSTUW 43c. विविधं च लोके om. BLR, शयनासनं च CI विविधां O 43d. °मधिपं च नित्यं CIR, °मधिपं वनितं B, °मधिपं विनीतं L 44–49 om. B 44–49d सर्व° om. R (f. 56 missing) 44–48 om. C 44b. प्रियलाभकारि OW 44c नपूज्या: ASU, नृपूज्या O, नृपूजा W सलाकं ASU, सलाभं O, सलाभां W 45c. सुस्थान° W °परां सुलिप्त T, °परां सुतिस्त U

आशावलोनं प्रकरोति लग्नं
धान्यार्थहानिं सततं नराणाम् /
प्रमोषणं तस्करचारकाद्यैः
पर[illegible]नं शत्रुकृतं सदैव //४६//
[illegible]ावलोनं प्रकरोति लग्नं
नृणां कुचेष्टां परदा[illegible]ता /
कुचलतां शोकमनन्तरोगं
स्वबन्धुवैरं परतर्कक //४७//
लग्नं यदा कालबलेन हीनं
नरं तदा हीनतरं प्रसूते /
विधर्मशीलं विगताभि[illegible]
श्लेष्मार्दितं चौरविवर्जितं च //४८//
षड्वर्गशुद्धे यदि जन्मलग्ने
भवेच्छरीरे मनुजस्य सौख्यम् /
सौभाग्ययुक्तं यदि पाणिपादं
कान्त्यान्वितं सर्वगुणैः समेतम् //४९//
तदेव युक्तं यदि पापवर्गै
हीनं शिरालुं च विरूद्धगन्धम् /
[illegible]
भवेत् सदा स्त्रीषु भयानकं च //५०//

46a. अशा° ASU 46c. प्रमोषणं AOSTU, प्रमोषितं W तत्करवाकराद्यै 46d–47c कुचे om. O 47b. °जातं TU 47c. °मनगरोगं W, °मनन्वरोगं TU, °मनं रोगं A 47d. °तर्ककं च SW 49 om. O 49a. °शुद्धौ ASTUW b लग्ने ASTUW 49d. °गुणैः समेतं] रतं सदैव R (beg of f. 57) 50b शि[illegible]लं AU, सुशीलं BCILOR च] सु° R

षड्वर्गशुद्धं यदि सूर्यपुत्र-
भौमाश्रितं सम्भवते
दुष्कर्मरूपो रविणा न युक्तः
काणो ऽधिकाङ्गस्तु निरीक्षितं च //५१//
भौमांशके सौम्यदृशा विहीने
भौमे व्ययस्थे निधनाश्रिते वा /
भवेत् सकर्णाक्षिरुजो मनुष्यः
कृशो ऽल्पवीर्यः सततं च दीनः //५२//
सूर्यांशके सौम्यदृशा विही
सूर्ये व्ययस्थे निधनस्थिते वा /
[बेचिशान्धस्तु निशा प्रजातो
दिवाथवा तैमिरिको मनुष्यः /
सौम्यो ऽधिकाङ्गस्तु शिराबनद्धः //५३//
पापा व्ययस्थाः प्रभवन्ति यस्य
T रविणा यद्वा स्युः /
खल्वाटकस्तत्र भवेत् प्रजाता
विपर्ययस्थाः शुभिवर्जितश्च //५४//
क्लीबे व्ययस्थे त्वथ पंचमे च
लग्ने ग्रहे चैव भवेन्मनुष्यः /
बृहन्नडाकारधरो ऽतिरौद्रो
ग्रहैस्खलैर्दृष्टिविवर्जितश्च //५५//

51a. °शुद्धे IRUW °पुत्रे ABCILRSUW 51b. °श्रिते RUW 51c. °भूयो BLRUW नु ABILRW यातो L, शुक्रे CTU 52a. सोमदृशा ST, सोमदृशा U, सौमदृशा O 52c–54d विपर्ययस्थाः शु° in marg. C 52c सहर्षाक्षिरुजा ABCILORSTUW 53a °दृशा O 53e om. I 54a यत्र C 54b भौमा° C 54b रविणा — 54d वि र्ययस्थाः om. O 54d. °स्थाश्च विवर्जितश्च, with निपत्ययश्च written above C °वर्जितस्तु W 55a. व्ययस्थे] विलग्ने CR वा S 55b. भवेन् om. W 55c. बृहन्नडा° RW, बृहन्नटा° L 55d ग्रहे R °सतै° ABILO, °सुतै° C, च्युते R सृष्टि° ABCIORSTUW °विवर्जितैश्च ABCILOTUW

–ंहोदये सूर्यसुते कुदृष्टि-
श्चन्द्रे व्ययस्थे प्रभवे ऽर्धदृष्टिः /
कुजस्य लग्ने कुजसंश्रिते च
विरूपनेत्रः प्रभवेन्मनुष्यः //५६//
पापा यदा लग्नगताः समस्ताः
सौम्याश्च सर्वे ऽष्टमगा भवन्ति /
कुब्जो भवेदत्र नरो ऽभिजातो
ह्वाननकः प्रदिष्टः //५७//
पापाश्चतुर्थो यदि नैधनस्थाः
सौम्या ग्रहाः खे जनको ऽत्र योगे /
विमिश्रितैस्तैः प्रभवेन्मनुष्यः
पापांशकस्थैः स भवेच्च कुष्ठी //५८//
दुर्गन्धिभवक्त्रो व्ययगैश्च पापै-
स्तृतीयगैः सौम्यवपुर्धरैश्च /
पापांशकस्थैरथ हृद्गदः स्यात्
सदा दरिद्रो ऽरिगृहं प्रयातैः //५९//
पापांशके पापनिरीक्षिते च
पापे विलग्ने शुभदृष्टिहीने /
भवेन्मनुष्यो वृषणैः प्रलम्बै-
र्जीवस्य दृष्ट्याधिकलिङ्ग एव //६०//

56a. सूर्यसुत CLO 56c. °संस्थिते IT 56d. विरूपतेजाः L
57c. कुब्यो T, कुजो O 58b सौम्यग्रहाः : LW खं ILORSTUW
जनकः प्रयोगः W 59a. दुर्गान्धि° AOSU °वक्रे° BW
59c. हृद्भव C, हृदयात् A, हृब्रहृव T, हृहृच U, गद्गद W, दृहृंद S 59d.
सदा om. W प्रयात: AILORSW
60a. वा C 60b. पापा ABCIOSTUW, पष्या R, रवा L
60c. दूषणैः B, दसणैः W प्रबलं W

नखैर्विहीनो रविजस्य लग्ने
मन्दांशके मन्ददृशा विहीने /
मन्दस्य वर्गे शकटं प्रयान
एवं हि चक्रस्य विदूषक: स्यात् //६१//
तुलाधिक: सूर्यसुते व्ययस्थे
भौमे सुखस्थे † विनितायके ऽर्के /
महादरश्चन्द्रसुते कुनत्र:
कुमित्ररक्तो वनिताविहीन: //६२//
वक्रे व्ययस्थे निधनाश्रिते चो
←———— विवस्वदंति · · स्वगे ऽर्कपुत्रे /
भौमे ऽस्तगेहे गगने दिनेशे
† दिजि · · मूर्तिगते च वक्रे //६३//

61b. मंदांशके om. TU 61c. शकथं ABILORSW, सकसटU
त्रयाते ABCIORSTUW, प्रजायते L 61d. विदत्रक R 62a.
रुजाधिक: L 62b–64a om. S 62b. सुसंस्थे W
विनियायके BL, वनितार्थिके, with निश्चिनायके written above C,
विनयायक° W ↑ 62c. °सुते कुने° om. AB͡OR, °युते सुने° I °त्रेABIOR
62c सुते – 62d om. LW 62d. om. ABIOR 62d. कुमित्रयुक्तो TU
63a-b त्रिवक्रमे च व्ययश्रिते वा निधने विपर्य: W 63a.
निधनाश्रये ABCILOS 63b. विवस्वनाम – स्वर्गे र्कपुत्रे I 63b
विचस्वर्गे AO, विचग: स्वगे R 64c – e after 63b विपर्य: in W
63c. दिनेशो ABCOTUW 63d. दिति ATUW, दित्रि L, विजि
(with शनैश्चर: in marg.) C after 63d W adds: भृगोस्तनौ स्या
न्नने च यस्य रत्नाञ्जलि: स्याद्धृपयोग एव सर्वाभिलाषप्रद ईश्वर://

सूर्ये सुखस्थे रविजे ऽष्टमस्थे
स्ववर्गसंस्थे शशिजे तनुस्थे /
शूरो भवेत् कान्तियुतो मनुष्यः
कलस्वनः सत्यरतः सुचक्षुः /
सपीनवक्षा रतकोविदश्च //६४//
जीवांशके जीवयुते विलग्ने
भवेन्मनुष्यः सुभगः सुरूपः /
स्त्रीणामभीष्टः सुरतेऽतुलस्थः
त्रिवर्गदक्षो गीतविचक्षणश्च //६५//
शुक्रांशके शुक्रयुते विलग्ने
भोगी सुवित्तः प्रणतो मनुष्यः /
भवेत् सुरूपः सततं दयालुः
भारणप्रियश्च //६६//
चन्द्रांशके चन्द्रयुते विलग्ने
शुक्रो महीभोगयुतो मनुष्यः /
भवेत्तथाक्षो मलिनः कृशश्च
कृच्छ्रः सदा †स नयतिर्वृथाटः //६७//
सौम्ये विलग्ने
शुभांसवक्त्राः †शुभाजे नवांशे /
चन्द्रस्य होरा शुभबाहुभात्री
त्रिंशांशकः सौम्यभवः सुशीलः //६८//

54a-b om. W 64c. खरो BLOS, वरो TU, लग्नेश्वरो W 64d सुवक्त्रः L 64e रति° L after 64e W adds: भेत् कंटके भाग्यपतिस्तु स्वोच्चे 65b. स्वरूप L 65c. मुलस्यः B, मूलस्यः L 65d. °विलक्षणश्च S 66c. सरूपः BCL, मनुष्यः I सतं दयालुः A, सततं तयासुः B, सततं भयालुः TU 67d स यनति° BLW, -यनति° R, यस्य नति° CTU °विवादः CTU 68b. शुभाड्ये C, सुभागे W, शुभाने A 68c. °दात्री T 68d. [illegible] W, त्रिंशांशः AS

सूर्यांशके सौम्यसमुद्भवे च
नरो भवेच्छोभनज्ञानपार्श्वः /
लग्नं शुभालोकितमिष्टवीर्य-
मोजो विधत्ते सततं नराणाम् //६९//
पापो यदा नीचगतो विलग्ने
स्वभावसंस्थः शुभवर्जितश्च /
स्याच्छ्यामदन्तः परुषोऽत्र जातः
क्रियाविहीनः पिशुनस्वभावः //७०//
T विहीः
विलग्नसंस्थे पुरुषोऽत्र जातः /
कन्यारतो वाञ्छितपापसक्तः
स्त्रीलंपटः स्यात् सततं विलुब्धः //७१//
शनैश्चरे सप्तमगे विलग्ने
यदा नवांशो धरणीसुतस्य /
वृद्धाङ्गनानां निरतो मनुष्यः
सदा भवेत् कामनिपीडितात्मा //७२//
यदा विलग्ने सभानुः शशाङ्को
नवांशके स्याद्विनन्दनस्य /
वेश्यानुरक्तं कुरुते मनुष्यं
म् //७३//

69b. भवेच्छौतनुज्ञान° BL   69c. नग्नं T   70c. स्याच्छ्याम° R, स्यात्श्याम° SW, स्यात्स्याम° ACIORTU   70d–71b om. BL
71c. °रतं BIORSTUW, °रतिं L   वांछति BLU, वांतति A, वांवति W, वावति S   for 71d W has 70d.   71d विलुब्धाः S
72c. विरतो TU   73a. विलग्ने om. S   सभानुः] भानगे W

सिंहाष्टके सूर्ययुते विलग्ने
भौमेन दृष्टे रविजे ऽस्तसस्थ /
भवेन्नरो वक्त्रभगो ऽत्र योगे
विपर्ययाद्वक्त्ररतानुरक्तः ॥७४॥
शनैश्चरे नीचगते ऽस्तसंस्थे
पापे विलग्ने शुभदृष्टिहीने /
न्मनुष्यः करतो ऽच्युतस्सुः
सदा विरक्तो वरयोषितानाम् ॥७५॥
धनाश्रिते भूतनये सुतस्थे
सौरे व्ययस्थे ऽरिनवांशसंस्थे /
रूपो ऽत्र भवेन्मनुष्यः
सर्वत्र निन्द्यः कृतविस्मृतिश्च ॥७६॥
सूर्यत्रिकोणे यदि भूमिपुत्रः
शनैश्चरे सौम्यगृहाश्रिते च /
तदा मनुष्यस्तु सुदीर्घजानु-
विरूपदेहः प्रियसाहसश्च ॥७७॥
व्रणार्दिताङ्गः सततं विरूपः
प्रज्ञावियुक्तः पिशुनस्वभावः /
शनैश्चरे मृत्युगते व्ययस्थे
भौमे भवेत् पापरतो मनुष्यः ॥७८॥
इति श्रीवृद्धयवने तनुस्थानचिन्ता ॥

74a सूर्यसुते CLR 74c. भये B वक्त्रभगो ORTU
74d. वक्त्ररता° LORU 75b. °दृष्टिसंस्थे W 75c. वभृतो W
च्युतेशुः S, च्युतेशुः A, च्युतस्युः BLIUW, च्युतस्य: T, च्युतस्फः C.
75d. परयोषितानां U 76d. °स्मृतश्च CL 77a सूर्यस्त्रिकोणे
R, सूर्यात्त्रिकोणे ILOSUW 78a. व्रणार्चितांग: ILORSTUW
78b. °विमुक्तः CL after 78b S repeats 77b col. श्री° om.
ABIORSTU तनुस्थानं W after col. W adds संपूर्णं

[तनुस्थितो वासरपः स्वतुङ्गे
तीव्रां तनुं संजनयेन्नराणाम् ।
तुङ्गांशके वा दृढतासमेतां
षड्वर्गशुद्धो बहुधार्यतां च ॥१॥
नीचाश्रितस्तीक्ष्णकः
कायं विधत्ते सरुजं सदैव ।
ऽप्यहीनं भृशनीचभागे
वर्गे नवमे प्रयुक्तम् ॥२॥
मित्राश्रयस्थो यदि वासरेशो
मूर्तिं गतो दीर्घतरं प्रसूते ।
मित्रस्य भागे जटिलं नितान्तं
वर्गोत्तमे वाधिकथाखिनं च ॥३॥
शत्रोर्गृहे वा यदि तीक्ष्णरश्मि-
र्लग्नाश्रितो हीनशरीरकं च ।
नरं प्रसूते त्वथ शत्रुभागे
हीनाक्षकोणं नयवर्जितं च ॥४॥
चन्द्रो विलग्ने परिपूर्णदेह-
स्तुङ्गस्थितः सौम्यतनुं प्रसूते ।
तुङ्गस्य भागे सुमनोहरां च
षड्वर्गशुद्धो ऽपरनेत्रयुक्ताम् ॥५॥
नीचाश्रितः क्षीणतनुः शशाङ्कः
काणां तनुं लग्नगतः प्रसूते ।
निशान्धकां नीचनवांशसंस्थः
पापोत्थवर्गे तिमिरेण युक्ताम् ॥६॥

ङ begins with 24a 1

मित्रगृहे शीतकरो विलग्ने
तनुं सुवाते सुभगां मनोज्ञाम् /
मित्रस्य भागे वरवक्त्रयुक्तां
वर्गोत्तमस्थः सुशरीरकान्तिम् //७//
निशान्धकं शत्रुगृहाश्रितो
लग्नं गतः स्थूलरुहं प्रसूते /
शत्रोर्विभागे पृथुदीर्घकं च
मूलत्रिकोणेषु शुभाधरौष्ठम् //८//
भौमः खलुङ्के यदि मूर्तिसंस्थः
करोति संरक्तनीशमर्त्यम् /
तुङ्गांशके वा चिपिटस्वभावं
षड्वर्गशुद्धस्त्वथ कर्कशास्यम् //९//
नीचाश्रितो भूतनयो विलग्ने
करोति सान्द्रं मदनं सदैव /
नीचांशके तैमिरिकं निशान्धं
पापस्य वर्गे त्वथ वक्रदृष्टिम् //१०//

. . . . /
मित्रांशके रोगसमेतदृष्टिं
वर्गोत्तमे दूरविलोकनं च //११//
शत्रोर्गृहे वा यदि भूमिपुत्रो
मित्रं प्रसूते बहुदृ——— /
समीपदृष्टिं च नवांशके वा
मूलत्रिकोणे च जलार्द्रदृष्टिम् //१२//

7b. मनोज्ञां G 8b स्थूलरहं G 9b. °मनीष° G 9c. चिपिच्चं G 9d. °स्तुय G 10d. वक्त्रदृष्टिः G 11c. रोगसमे च दृष्टिं G

शुभा विलग्ने यदि तुङ्गसंस्था
नरं सुवाते सुमुखोरुनासम् /
तुङ्गांशके वा सुरदाधरौष्ठं
षड्वर्गशुद्धः सशरीरकान्तिम् //१३//
नीचाश्रितो वा यदि सोमपुत्र-
स्तनुस्थितो वक्त्रकुगन्धभाजम् /
नीचांशके दीर्घकरालजिह्वं
[illegible] //१४//
मित्रांशयस्था यदि सोमपुत्रो
लग्नं गतः शुभ्रशिरोरुहं च /
मित्रस्य भागे त्वथ शुभ्रदृष्टे
वर्गोत्तमस्थः सुहृदं सदैव //१५//
शत्रोर्गृहे वा यदि सोमपुत्रः
करोति मर्त्यं तनुगः करालम् /
शत्रोर्विभागे चपलस्वभावं
त्रिकोणगो रोगविवृद्धकायम् //१६//
सुरेज्यमन्त्री यदि तुङ्गसंस्थो
लग्ने मनोज्ञं जनयेन्मनुष्यम् /
उच्चांशके वा शुभबाहुहस्तं
षड्वर्गशुद्धः शुभचर्मभाजम् //१७//
नीचाश्रितो देवगुरुर्विलग्ने
खंजं सुवाते निरुजं नितान्तम् /
नीचांशके खंजननासकं च
वर्गे च सुभूषणाढ्यम् //१८//

14c. शम्यंशके G 16d °विवर्द्ध° G 17b. मनोन्यं G 17d. शुभद्रुर्मभाजं G 18c. नीचाश्रिते G

मित्राश्रयस्थो यदि मूर्तिसंस्थो
गुरुः प्रसूते वरवस्त्रभाजम् ।
मित्रांशके वा सुकटिं सुनाभिं
वर्गोत्तमस्थः शुभगोदरं च ॥१९॥
शत्रोर्गृहे वा यदि देवपूज्यो
मूर्तिस्थितः स्थोदरिकं प्रसूते ।
शत्रोर्विभागे त्वथ कुब्जमेव
मूलत्रिकोणे प्रजनन्यलिङ्गम् ॥२०॥
शुक्रः स्वतुङ्गे यदि लग्नसंस्थः
सुरूपजानुं मनुजं प्रसूते ।
स्वोच्चांशकस्थः शुभपाणिपादं
षड्वर्गशुद्धः सुविभक्तगात्रम् ॥२१॥
नीचस्थितो वा यदि दानवेज्यो
मूर्तिस्थितः स्वल्पकचं प्रसूते ।
खल्वाटकं वा यदि नीचभागे
पापान्यवर्गे बलिरोमभाजम् ॥२२॥
मित्रगृहस्थो यदि दैत्यपूज्यः
सौभाग्ययुक्तं शुभकीर्तिभाजम् ।
नरं प्रसूते सुनखं विभागे
वर्गोत्तमस्थो बहुरूपिणं च ॥२३॥
शुक्रो यदा शत्रुगृहं प्रपन्नो
लग्नं गतः कुब्जतनुं प्रसूते ।
शत्रोर्विभागे ऽतिकृशं विग
मूलत्रिकोणे नयनाभिरामम् ॥२४॥

19d. सभगोदरं G   20d.

शनैश्चरो मूर्तिगतः स्वतुङ्गे
लग्नं गतः श्यामतनुं मनुष्यम् ।
तत्त्वांशके स्वे त्वथ भिन्नवर्णं
षड्वर्गशुद्धस्त्वथ गौरगात्रम् ॥२५॥
नीचस्थितः सूर्यसुतो विलग्ने
कास‹र्तम›र्त्यं जनयेन्मनुष्यम् ।
नीचांशकस्थः कफवातपातं
पापस्य वर्गे त्वथ पित्ततां च ॥२६॥
मित्राश्रयस्थो यदि सूर्यसूनु-
र्लग्नस्थितो गौरवपुं प्रसूते ।
मित्रांशकस्थो ऽस्यवसायसार
वर्गोत्तमस्थस्त्वथ पीवराङ्गम् ॥२७॥
शत्रोर्गृहस्थो रवि‹जो› ऽतिरूक्षं
लग्नाश्रितः स्थूलनखं प्रसूते ।
सुस्थूलदन्तं रिपुभागसंस्थो
मूलत्रिकोणे तु सुदीर्घजानुम् ॥२८॥
स्वोच्चस्थितः स्वभवने क्षितिपालतुल्यो
लग्ने ऽर्कजे भवति देशपुराधिनाथः ।
शेषेषु दुःखमदपीडित एव बाल्ये
दारिद्र्यकामव्यसनो मलिनो ऽलसश्च ॥२९॥
इति ‹श्री›वृद्धयवने तनुस्थानचिन्ता ॥

25c. स्वे om. G, के in marg. 26b. काश – – र्त्यं G 26c. कफवातवातं G 28a शत्र° G 28c. स्वस्थूल° G 29d. दारिद्र° G

सूर्यो द्वितीये यदि तुङ्गसंस्थो
ते नृपमानजातम् /
उच्चांशके वा नृपसेवकं च
षड्वर्गशुद्धः शस्त्रलोकदत्तम् //१//
नीचाश्रितो वासरपो द्वितीये
पापार्जितं धर्मधनं प्रसूते /
नीचांशकस्थः स्थलजं सदैव
पापस्य वर्गे त्वथ चौर्यजं च //२//
मित्राश्रयस्थो दिनपो द्वितीये
करोति जातं धनधान्यसम्भवम् /
मित्रस्य भागे त्वथ लोहजातं
वर्गोत्तमस्थः परदारजातम् //३//
शत्रोर्गृहे वा यदि तीक्ष्णरश्मि-
र्द्वितीयगः स्वल्पधनं प्रसूते /
कष्टान्तदं ऽधमसेवया च
मूलत्रिकोणे त्वथ भिक्षजं च //४//
चन्द्रो द्वितीये यदि तुङ्गसंस्थो
मुक्तामणिप्रायधनं प्रसूते /
तुङ्गांशके वा कनकं च रूप्यं
षड्वर्गशुद्धो विविधं हिरण्यम् //५//
नीचाश्रितः शीतकरः प्रसूते
द्वितीयगो वित्तमसञ्चयं च /
नीचस्य भागे तु व्ययेन हीनं
पापोत्थवर्गे वसवां भयं च //६//]

5c. रूप्यं G   6b °मसद्यं च G

मित्राश्रयस्थो यदि वा शशाङ्को
    वित्तं प्रसूते सुतजं नराणाम् ।
मित्रस्य भागे कृषिकृत्प्रसूतं
    वर्गोत्तमस्थः सुहृदर्जितं च ॥७॥
शत्रोर्गृहे वा यदि रात्रिनाथः
    कोशाश्रितश्चौर्यधनं प्रसूते ।
तदंशके वाथ कुकर्मजातं
    मूलत्रिकोणे त्वथ भार्यजोत्थम् ॥८॥
भौमः स्वतुङ्गे यदि कोशगः स्याद्
    युद्धोद्भवं संजनयेद्धनं च ।
उच्चांशके धातिकृशं च कष्टात्
    षड्वर्गशुद्धः स्वजनोद्भवं च ॥९॥
नीचाश्रितो भूतनयस्तु नीचे
    द्वितीयगो निर्धनमेव सूते ।
नीचांशके   बह्वृणमेव नित्यं
    पापोत्थवर्गे व्रणयुक्तदेहम् ॥१०॥
मित्रगृहे वा यदि भूमि[illegible]
    कोशाश्रितो मित्रबलेन जातम् ।
धनं प्रसूते सुहृदंशके च
    वर्गोत्तमे देवगुरुप्रसादात् ॥११॥

7a. मित्रांशकस्थो ABCILORSTUW 7b सुभजं G, सततं S
7c स्वकृष्यिप्रभूतं G 7d. °दार्जितं ITUW 8c. वाधककर्म° R, त्राधमकर्म° G, वातकुकर्म° L 8d. मार्य° BCILOT, मर्य° R, पुर्व° G °योत्थं BLSW, °योद्धं C 9b. बुद्धोद्भवं SW, कंद्धोद्भवं G 9c. उच्चांशके L घातिकृशं L 10a भूतनयस्तु—11b कोशाश्रितो om. L.
10c. °कस्थो द्रुण° W, °कस्थो नृण° OS, °कस्थो भ्रण° CITU, °कस्थो नृप° ABL 10d. त्र्यण° R, क्रण° B, शण° A, चण° U, रण° G, भ्रण° CIOST °मुक्त° GR °देहं om. W, °देशं G 11a. मैत्रे C ग्नहे I, गते S 11c. धनं] जातं G 11d °प्रमोषात् GR

शत्रोर्गृहे भूतनयो द्वितीये
धनं प्रसूते न कदाचिदेव /
शत्रोर्विभागे ऋणपापसङ्गान्
मूलत्रिकोणे तु जनोपरोधात् //१२//
सौम्यः स्वतुङ्गे यदि कोशसंस्थः
नं भूरिधनस्य धत्ते /
तंशके सस्यचतुष्पदाद्य
षड्वर्गशुद्धो विविधैरुपायैः //१३//
नीचाश्रितः सोमसुतो धनस्थो
निकृष्टवित्तं कुरुते नराणाम् /
नीचांशकस्थो रिपुतोऽतिदैन्यात्
पापोत्थवर्गे बहुलंघनाच्च //१४//
मित्राश्रयस्थे यदि सौम्यपुत्रो
द्वितीयगो वाणिज्यमेव वित्तम् /
धत्ते नराणां च सुहृद्विभागे
वर्गोत्तमे वा सकृतिं प्रसूते //१५//
बुधो यदा शत्रुगृहं प्रयातो
द्वितीयगः शत्रुनिषेवणेन /
धनं भवेच्छत्रुवि
स्वल्पं त्रिकोणे वरलोकजातम् //१६//

12b. सुवाते G 12c. त्तण° S, णय° G, गुण° R, °नृप° LW
12d तु] न R, च G, सु° S जनापराधात् L 14b. °भित्तं IW
14c. नवांश° C रिपुके G 14d. बहुलंघनाद्य BW 15b
वांनित° LSW, जिन° G नित्यं CI 15d. सकृषिं GR
प्रसूतिं C, प्रसूतं ILRU 16a. प्रजातो O

जीवो द्वितीये यदि तुङ्ग-
सदा धनं न्यायजितं प्रसूते /
तङ्गांशके च द्विजसाधुवृत्त-
षड्वर्गशुद्धो नृपसंश्रवं च //१७//
नीचाश्रितो देवगुरुर्द्वितीये
धनं प्रसूते परदारजातम् /
नीचांशके चान्त्यजलोकजातं
पापस्य वर्गे बहुकष्टजातम् //१८//
मित्राश्रयस्थो यदि देवमन्त्री
द्वितीयगो वस्त्रगजाश्वजं च /
धत्ते तदंशे न कृषिप्रसूतं
वर्गोत्तमस्थः सुजनप्रदत्तम् //१९//
यदा द्वितीये ऽरिगृहे सुरेज्यो
विधत्ते ऽरिनिषेवणेन /
शत्र्वंशके शत्रुजनेन दत्तं
मूलत्रिकोणे निधिजं सदैव //२०//
शुक्रो द्वितीये यदि तुङ्गसंस्थः
सदालयं भूरिधनं प्रसूते /
तुङ्गांशके पूर्वजसंश्रितं च
षड्वर्गशुद्धो द्वितयं नितान्तम् //२१//

17a द्वितीयो OR 17c. तुंगांशके R, नीचांशके LW, नीचंसके °साधुदत्तं G 18c. तुंगांशके R वांत्यज° IRS 18d. °कष्टजं च R, °कष्टना च G, °कष्टकं च AOS 19b गजा L, °गजासनं च S, °गजाश्ववंधं B 19c. धत्ते तदंशे न] तदंशग नात्र L कृषि° R 19d. सु° om. G, स्व° L
20c. शत्र्यंशके OU, शत्रुंशके BCL 20d. विधिजं ORTUW, विधित्तं B, विविधं I, धिजं A 21b. वारिधनं G
21c. °संस्थितं S 21d. द्वितियं T, द्वितिये L, द्वितीयं CIOUW

नीचाश्रितो दैत्यगुरुर्द्वितीये
धनं सवाते श्रुतिजं नितान्तम् /
सूतार्जितं नीचनवांशसंस्थः
पापस्य वर्गे परदेशसङ्गात् //22//

मित्राश्रयस्थो यदि दानवेज्यो
द्वितीयसंस्थो नृपजं विधत्ते /
... नवांशे नृपपुत्रजात
राज्ञिगामुत्थं यदि श... वर्गे //23//

शुक्रो द्वितीये यदि शत्रुसंस्थो
धनं प्रसूते वरकर्मजातम् /
...भागे त्वथ दैत्यजातं
मूलत्रिकोणे स्वसुतार्जितं च //24//

शत्रुर्द्वितीये यदि तुङ्गसंस्थो
धनं प्रसूते तु कुकर्मजातम् /
तदंशके कष्टविनिर्जितं च
... व्यसनोद्भवं च //25//

नीचं गतो भास्करजः प्रसूते
निःकिंचनं नित्यमनेकदुःखम् /
नरं तदंशे ऽन्त्यजवित्तभाजं
वर्गे तु समापन्नं च //26//

22 in marg. T 22b. श्रुतितं BW, क्रतिजं S, चंतिजं O, वर्जितं G, व्रतितं R 23d. च दि R शुभ्रवर्गे G, शुभवर्गे R
24a. द्वितीयो BCGIOU तुंगसंस्थो U 24b. चरकर्म° LU
24c. दौत्यजातं RW 25 in marg. U 25a. °द्वितीयो IOR
25b. सुकुकर्म° BL, शुकुकर्म R, वरधर्म° G, च कुकर्म° C, तु कर्म° L
25c. °विवर्जितं ABCILOSTU 26a. नीचांशगतो L 26b. निःकिंचनं om. A, निष्किंचनं G, निःकंचनं L 26d. वर्गेण ABCILOR...UW, वर्गस्य° G °सुपुण्य° G

मित्राश्रयस्थो यदि सूर्यपुत्रो
द्वितीयगः स्वस्थधनं प्रसूते /
मित्रस्य भागे त्वथ मृन्मयं च
वर्गोत्तमस्थो जलजं सदैव //२७//
सौरो यदा शत्रुगृहाश्रयस्थो
द्वितीयगः पापधनं प्रसूते /
शत्रोर्विभागे बहुदासतोत्थं
मूलत्रिकोणे परमोबजं च //२८//
सहस्रनाथो दिनपः प्रदिष्टो
लक्षाधिपो रात्रिकरः सदैव /
शताधिपो भूतनयः सदैव
कोटीश्वरः सोमसुतः सदैव //२९//
सर्वाधिनाथः सुरराजमन्त्री
शुक्रो द्युसंस्थः शनिभौमतुल्यः /
स्वतुङ्गगाः स्युर्यदि सर्व एव
अर्थान्तराले त्वनुपातजातम् //३०//
स्ववर्गजं वित्तमहो ददाति
हित्वा हि शुक्रं बहुसङ्गजं च /
स्वं स्वं धनं   स्वासु दशासु सम्यक्
. . . . //३१//
इति श्रीवृद्धयवने धनस्थानचिन्ता //

27b. स्वस्थि° ILW, स्वास्थि° ABGORS, स्वल्प° CTU 27d. स्थलजं GR 28c. शत्रुर्वि° C °दासदोत्थं G 28d. परमोबज्जं GR 29b. लक्ष्याधिपो CTU, लवाधिपो G 29c. सभाधिपो G 30b स्वसंस्थ: U शनि ABCGORSTUW वारतुल्य: G, राहुतुल्य: R 30c एते S 30d °मातयातं L, °पापजातं R 31a. मित्र° ABCILOSTUW °मथो G ददांति L, घंटेति R, वदंति G 31b हि om. T, गहे W °संगतं च L, °संगमाङ्ग G 31c. स्वामसम्य AOST, स्वमासम्य U, स्वाम्युसमा: L, स्वामसम्यह B, स्वामस्यमह W, स्वाम्यमनदेके च in marg. C, चात्मजदेशकारि I, स्वां सम्यक् R
अत्तुंगगा हि ग्रहजं करोति in marg. C, [illegible] T [illegible]
BGIORSTU [illegible]

तृतीयसंस्थो यदि वासरेशो
मित्रं नृपं तुङ्गगतो विधत्ते ।
तुङ्गांशके वा नृपसंभवं च
षड्वर्गशुद्धस्त्वथ सार्वभौमम् ॥१॥
नीचाश्रितो नीचधनं विधत्ते
मित्रं तृतीये यदि तीक्ष्णरश्मिः ।
नीचांशके भिल्लकपुत्रवैरं
पापस्य वर्गे त्वथ वारणं च ॥२॥
मित्राश्रयस्थो यदि वासरशा
मित्रं द्विजेन्द्रं कुरुते तृतीये ।
मित्रांशकस्थो जनयेत् सुशीलं
वर्गोत्तमस्थो ऽद्भुतशास्त्ररक्तम् ॥३॥
रविस्तृतीये ऽरिगृहं प्रयातो
मित्रं विधत्ते रिपुवर्जिताङ्गम् ।
द्विषाद्धभागे गुणवर्जितं च
मूलत्रिकोणे पतिमेव शान्तम् ॥४॥
तृतीयगः शीतकरः सुवाते
मित्रं स्वतुङ्गे कृपणस्वभावम् ।
तैव भागे परतर्ककं च
षड्वर्गशुद्धः परदाररक्तम् ॥५॥

1a. वासरेण BW 1b तुंगगति U 1c. तुंगांशके om. A 2a. नीचतमं G 2c. चल्लकमुग्नवैरं G, चिल्लुकपुत्रवैरं R 2d. चारणं ABCGT 3b तृतीयः BCIORU, तीयः AS 3c. मित्रस्य भागे जनिनं कुलीनं G, मित्रस्य त्रतं जननिनं कुशीलं R 3d. °शास्त्ररक्ता C 4a °स्तृतीयो OR 4b. रिपवर्द्धित BRW, रविवर्द्धितांगं G 4d पतिमे शांतः LW 5b स्वतुंगे विशुद्धं ABILW, विसमुंगे शुद्धं S 5c. मृतस्य तै भागे W °तर्कुकं ACOR

नीचाश्रितो रात्रिपतिस्तृतीये
    मित्रं सुजातेऽन्त्यजमेव नित्यम् ।
नीचस्य भागे त्वथ नर्तकं च
    भण्डं च वर्गे मलसम्भवं च ॥६॥
मित्राश्रयस्थो यदि शीतरश्मि-
    र्मित्रं सुजाते परवंचकं च ।
मित्रस्य भागे बहुदोषजं च
    वर्गोत्तमस्थो घृणया विहीनम् ॥७॥
तृतीयगः शीतकरो विधत्ते
    नराधमं शत्रुगृहं प्रयातः ।
शत्रोर्विभागे बहुमाययाढ्यं
    मूलत्रिकोणे परदाररक्तम् ॥८॥
भौमस्तृतीये यदि तुङ्गसंस्थो
    मित्रं विधत्ते वरभूमिपालम् ।
तुङ्गांशके वा नृपतेरमात्यं
    षड्वर्गशुद्धो द्वितयं तथैव ॥९॥
नीचाश्रितो भूतनयस्तृतीये
    मित्रं विधत्ते बहुकामसक्तम् ।
नीचांशकस्थो भृतकं च वैद्यं
    पापोत्थवर्गे व्यसनाभिभूतम् ॥१०॥

6a °स्तृतीयो IO   6b सुजाते U   व्यज° G   6c मित्रस्य R   नर्ककं U   6d च भागे L, स्ववर्गे CTU   7b om. G   7c °दोषभाजं R, °दोषलाजं G   8b मित्राधमं G   8c °मापमाद्यं AG, °मायपाढ्यं U, °माययाढ्यं C   9b °भूमिलंतं C   9c वा om. W   9d °र्गशुद्धो द्वि° om. A   द्वितीयं BCLOW   10b °कोशसक्तं C, °शास्त्ररक्तं G   10c नवांशकस्थो BL   च पद्यैः ABLOSW, च पेद्यैः CTU, च वैद्यै R, सदैव I

मित्राश्रयस्थो यदि भूमिपुत्र-
स्तृतीयगो भूरिसुखं प्रसूते /
मित्रांशके बाल्यजं कुमारं
वर्गोत्तमस्थः प्रभुराजपानम् //११//
शत्रोर्गृहस्थो यदि भूमिपुत्रो
मित्रं प्रसूते सहजाश्रितं च /
तस्यैव भागे च समृद्धिभाजं
मूलत्रिकोणे त्वथ दण्डनाथम् //१२//
सौम्यस्तृतीये यदि तुङ्गसंस्था
ा शान्तमतिं प्रसूते /
तुङ्गांशके कंचकिन सम·
षड्वर्गशुद्धः सुतरा कृत म् //१३//
नीचाश्रितः सोमसुतस्तृतीये
मित्रं विधत्ते वृजिनैः समेतम् /
गोपालकं नीचविभागसंस्थः
पापस्य वर्गे गतसौहृदं च //१४//
मित्राश्रयस्थः शशिजस्तृती·
मित्रं सुजाते बहुकर्मभाजम् /
भागे त्वथ नामितं च
सल्ल ारम् //१५//

11b-12a om. ABCILORSTUW 12d. दंतनाथं G 13b. तदा C, तया G, यदा BLRW शांतमतिं BIOS, वांतमतिं W, शांतमतं R, ज्ञातमतिं L, संडमतिं CT, सलमतिं U, षंडतनं G 13c. उच्चांशके SR 14b वृजनैः O 14c. गोपालगं G 15b. °कर्मभावं W
15c. वामितं ABC

शत्रोर्गृहस्थो यदि सोमपुत्रो
मित्रं तृतीये कुरुते सुनिन्द्यम् /
तस्यैव भागे जनितात्तिगं च
मूलत्रिकोणे ऽथ मलिम्लुचं च ॥१६॥

जीवस्तृतीये यदि तुङ्गसंस्थो
मित्रं सुवाते विनयेन हीनम् /
उच्चांशके दम्भपरं नृशंसं
षड्वर्गशुद्धस्तु तथाप्रज्ञं च ॥१७॥

नीचाश्रितो देवगुरुस्तृतीये
मित्रं प्रसूते बहुपाभितारम् /
तदंशके द्यूतरतं सदैव
वर्गे गतबन्धुवर्गम् ॥१८॥

जीवो यदा मित्रगृहे तृतीये
तदा प्रसूते ऽतिकृशं च मित्रम् /
मित्रांशके पण्यपरं प्रधानं
वर्गोत्तमस्थः खलु दन्तकारम् ॥१९॥

तृतीयगो देवगुरुर्य
शत्रोर्गृहे क्लीवसुतं सुवाते /
तदंशके शिल्पिनमप्रधानं
मूलत्रिकोणे पतितं निकृष्टम् ॥२०॥

~~ABCGILORSTUW~~

16a. शत्रु° W 16b. सुनीचं S 16c. जनिताभिगं TU, वनितातिगं AS 17b. हीनं U 17c. दम्भपरं BIOR, दर्पपरं W, दर्नपरं AS शशांक B 17d. °प्रपंच I 18a. नीचं गतो L, नीर्वातितो B 18b. सुवाते G °वावितारं BW, °वादितारं L, °देवितारं R, °देनितारं G 18c. द्यूनतरं G 19a. °गृहस्तृतीयस् R 19b यदा L T कृतं चित्रं I 19c. पुण्य° GS 19d. कितवं सदैव C, किभवं सदैव TU दातकारं R, दूतकारं G 20c. शिल्पिनय° BILT, शिल्पनय CUW, शिनिपनम° AS

शुक्रो यदा तुङ्गगतस्तृतीये
तदा सुवाते पतितं च मित्रम् /
तुङ्गांशके वा नृपसेवकं च
षड्वर्गशुद्धः कलहप्रियं च //21//
नीचाश्रितो दैत्यगुरुस्तृतीये
मित्रं विधत्ते वधकं नृशंसम् /
नीचांशके नीचकुलप्रसूतं
पापस्य वर्गे पतितं नृशंसम् //22//
मित्राश्रयस्थो भृगुजस्तृतीये
करोति मित्रं खलु भण्डमेव /
मित्रांशके चारणमप्रशस्तं
वर्गोत्तमस्थः शबरं कृतघ्नम् //23//
रिपोर्गृहे भार्गवजः प्रसूते
तृतीयगः क्रीडनकं च मित्रम् /
तदंशके शिल्पिनमप्रशस्तं
मूलत्रिकोणे ऽथ जनैर्निरस्तम् //24//
सूर्यात्मजस्तुङ्गगतस्तृतीये
मित्रं सुवाते वरभूमिपालम् /
तुङ्ग..के वित्तपतिं प्रसिद्ध
षड्वर्गशुद्धो बहुशास्त्ररक्तम् //25//

22b–23a om. BCILTUW

21c. वा om. G   22a. देवगुरु° S   22b. . . .] विधकं G   22d. पतितं] नृपतिं G   23b. खलु] सुख G   22c. °कुलप्र— — —   भंडं TU, मंजं AS, टंडं I   23c. चारणप्रशंसं G   23d. सचरं ABILORSW, सबरं CTU   24b त्वमित्रं AS   24c °प्रशतं G   25a. सूर्यात्मक° C   25b. °भूमिपानं T   25c. चित्तमतिं G

त्रिंशांशकः सूर्यसुतस्तृतीये
मित्रं प्रसूते मलिनस्वभावम् ।
त्रिंशांशके बंधनतत्परं च
पापस्य वर्गे घृणया विहीनम् ॥२६॥
मित्राश्रयस्य: खलु सूर्यपुत्रो
मित्रं प्रसूते सचिवं नयज्ञम् ।
मित्रांशके वा गुणकित्तभाजं
वर्गोत्तमस्य क्षितिमानयुक्तम् ॥२७॥
शनिर्यदा शत्रुगृहाश्रयस्य-
स्तृतीयकः पापरतं च मित्रम् ।
धत्ते तदंशे वृजिनं सुदीनं
मूलत्रिकोणे विजितारिपक्षम् ॥२८॥
स्वावता प्रदि
दशाधिपः शीतकरस्तु /
सहस्रमित्रः क्षितिजो ...
शताधिपो देवपुरोहितश्च ॥२९॥
शशीतिनाथो भृगुजः
सौरस्तु भौमेन मितो ऽधिको वा /
स्वतुङ्गराशौ यदि वर्त्तमानाः
सर्वे ...तस्य बधाहृदन्ति ॥३०॥
इति श्रीवृद्धयवने सहजस्थानचिन्ता ॥

26c-d CTU have: 22c-d, but with वनितं (= नेत्रं CT) for मातत 26c. बंधनतत्परं S 27a खलु — 27d गोत्तमस्य: om. BLW 27b. विधत्ते GR नवमार्थयुक्तं G 27c. वा om. A 27d. स्थलमान° BIL, स्वमाल° W 28b. पानरतं G च मित्रं om. LW, त्वमित्रं B 28c. धत्ते om. LW विजितं R, विनितं ABIOST, विनीतं LW, वनितं CU 29b देशाधिप: ABLOSTU °करश्च G 29c. वणिजो G 29d. शीताधिय: U, धाताधिपो L, निशाधिपो G 30b भौमाद्यमितो ABCIORSW, भौमो द्यमितो TU धिकश्च SU 30c. दत्तमाना: G 30d. स्वचे BL, स्ववे W, स्वर्वे C त पीतस्य BI °दूशंति BCILTW, °दुदंति °दृदंति

बहुद्रव्यजातम् /
तुङ्गांशकस्थो ऽनुसुखं कदाचित्
षड्वर्गशुद्धः परदारजं च ॥१॥
नीचाश्रितो वासरपश्चतुर्थे
सुखं विधत्ते न कदाचिदेव /
नीचांशके दुःखविमिश्रितं च
पापस्य वर्गे ऋणदुःखमिश्रम् ॥२॥
मित्राश्रयस्थो दिनकृच्चतुर्थे
सुखं विधत्ते वृजिनैः समेतम् /
चौर्योद्भवं शत्रुविभागसंस्थो
वर्गोत्तमस्थो ऽब्जजमेव नित्यम् ॥३॥
शत्रोर्गृहे वासरपश्चतुर्थे
षड्ध तु सौख्यं कुरुते नराणाम् /
शत्रोर्विभागे परसेवया च
मूलत्रिकोणे बहुधनजातम् ॥४॥
सुखस्थितः शीतकरः स्वतुङ्गे
सुखं विधत्ते गजवाजिजातम् /
तुङ्गांशके हेमसमुद्भवं च
षड्वर्गशुद्धो विविधं सदैव ॥५॥

1b बहुकष्ट° S, बहुकाष्ट° G, बहुवष्ट° R, बहुष्ट° A 2d. रिण° ABCGIORU, मृण° W °दुष्ट° CW °मित्रं W 3 after 4 in S
3a. चित्तकृच्च° R, चिकृतश्च° ACISTU, चिकितश्च° O, चिकृतं च° W. चिकतृश्च° B °तुर्थः BILORTU 3b. वृजनैः O 3d. त्वयमेव CW, त्वनजेन S 4a. °श्चतुर्थौ R 4b. तु]°न G, स° R
5b. गजलेन पुंसां G

नीचाश्रितः शीतकरः
सुखं सदा द्यूतजमेव पुंसाम् ।
नीचांशके भूरिकृषिप्रसूतं
पापस्य वर्गे बहुपापजातम् ॥६॥
मित्राश्रयस्थः खलु शीतरश्मिः
स्वस्थितो भूरिसुखं विधत्ते ।
सुताद्भव मित्रविभागसंस्थो
वर्गोत्तमस्थो वनितोद्भवं च ॥७॥
चतुर्थगो रात्रिपतिः प्रसूते
शत्रोर्गृहे सौख्यमनीतिजातम् ।
शत्रोर्विभागे कपटप्रसूत
मूलत्रिकोणे त्वथ धर्मजातम् ॥८॥
चतुर्थगो भूतनयः स्वतुङ्गे
सुखं विधत्ते परसूदनेन ।
तुङ्गांशकस्थः परबन्धनेन
षड्वर्गशुद्धः परवंचनेन ॥९॥
सुखाश्रितो भूमिसुतस्तु नीचे
सौख्यं कदाचित्र करोति पुंसाम् ।
नीचांशकस्थः परपोषणेन
पापस्य वर्गे वधबन्धनेन ॥१०॥

6c. भूमिकृषि° G 6d. °पापभाजं L 7c. मित्रगृहांश° G °संस्थो] त्वथ W 7d. वर्गोत्तमस्थो om. ASW वनितोर्थधर्मं W 8b. °मतीन° CTU °भाजं GS 8d त्वथ धर्मजातं] च --- G, बहुशोकनाशं W after 8 CT add चंद्रफलं 9c. परवंचनेन G 10a नीचे S 10c परमोषणेन GR 10d परमोषणेन G

मित्राश्रयस्थः क्षितिजश्चतुर्थे
— ै ं — — े परैश्वर्ययोगात् /
मित्रांशकस्थः सुरतप्रसङ्गं
वर्गोत्तमस्थः परवित्तनाशात् //११//
शत्रोर्गृहे स्याद्यदि भूमिपुत्र-
श्चतुर्थगः पुंश्चलजं च सौख्यम् /
धत्ते तदंशे करयोनिजातं
मूलत्रिकोणे सुखमोहनाद्यम् //१२//
सौम्यः सुखस्थः सुखमेव धत्ते
महाजनोत्थं यदि तुङ्गसंस्थः /
तुङ्गांशके पार्थिवजं च पुंसां
षड्वर्गशुद्धो व्ययमेव पुंसाम् //१३//
नीचाश्रयस्थः शशिजो विधत्ते
चतुर्थगः क्लेशजमेव सौख्यम् /
नीचांशकस्थः परसेवया च
ऽतिविगर्हणेन //१४//
मित्राश्रयस्थः शशिजश्चतुर्थे
सुखं विधत्ते वरपुत्रजातम् /
मित्रांशकस्थस्तु कलत्रजातं
वर्गोत्तमस्थो दुहितोद्भवं च //१५//

11a °श्चतुर्थः CIOR 11b सुखं C प्रसूते G 11c मित्राश्रयस्थः W 11c सुरत°—11d °स्थः om. G 11d प्यविनासत: W
12a शत्रु° IORTUW 12b. षट्श्चलजं W 12d °मोहनाद्य GR
13b. महायनोत्थं B, महानयोत्थं L, महावनोत्थं W 13c पुण्यं W
13d. अयमेव TU, कृपसेव G order in TU: 15a, 16b–16d, 15c–16a, 15b 15b–16a om. AS 15c °स्थश्च GL

शत्र्वाश्रयस्थः शशिजश्चतुर्थे
सुखं विधत्ते क्रयविक्रयेण ।
तस्यैव भागे पशुपालनेन
मूलत्रिकोणे निजबान्धवोत्थम् ॥१६॥

जीवश्चतुर्थे यदि तुङ्गं —
सुखं विधत्ते सकलं सदैव ।
तुङ्गस्य भागे च तथा तदर्धं
चतुर्गशुद्धस्य सुधर्मसुखम् ॥१७॥

नीचाश्रितो देवगुरुश्चतुर्थे
सौख्यं विधत्ते बहुनीचसङ्गात् ।
नीचांशकस्थश्च विचित्रभावात्
पापस्य वर्गे परपोषणेन ॥१८॥

मित्राश्रयस्थे सुरराजपूज्ये
चतुर्थगे वंशजमेव सौख्यम् ।
भवेत्तदंशे बहुभृत्यजातं
वर्गोत्तमस्थे भगिनीसमुत्थम् ॥१९॥

—गृहस्थो यदि दैत्यपूज्य°
श्चतुर्थगो नीचनिषेवणेन ।
सौख्यं विधत्तेऽथ तदंशके वा
मूलत्रिकोणे नृपसङ्गमेन ॥२०॥

16a. स्वांशाश्रयस्थः CTU °श्चतुर्थः BCOR 16b-17a om. L, add. in marg. L[2] 16b. व्ययविक्रयेण R 16d. °बंधनोत्थं G 17a. °श्चतुर्थो IOR 17d. °शुद्धस्तु G स्वधर्म° GW 18a. दैत्यगुरु° GR °श्चतुर्थः BCILORU 18c विमित्र° R, विमिश्र° G 18d. परमोषणेन GR 19a. सुरराजमन्त्री W, यदि देवपूज्ये U 19b. वंगज° G 20a. शत्रु° IORTUW यदि] भय G 20c. ऽथ om. L, च C वा] °न G 20d. °संगतेन BILW, °संगमेव न G

शुक्रः स्वतुङ्गे यदि बन्धु
    सुखं विधत्ते बहुवित्तजातम् /
तुङ्गांशकस्थस्तु सरोह्रजातं
    षड्वर्गशुद्धश्च गजोद्भवं च //21//
नीचाश्रयस्थो यदि दैत्यमन्त्री
    सुखं विधत्ते परनारिजातम् /
नीचांशके चैव विलासिनीनां
    पापस्य वर्गे गुरुपत्निसङ्गात् //22//
मित्राश्रयस्थो भृगुजश्चतुर्थे
    सौख्यं विधत्ते बहुगोधनोत्थम् /
मित्रांशके ऽजाविकमेव नित्यं
    वर्गोत्तमस्थो महिषीसमुत्थम् //23//
शत्रोर्गृहस्थो यदि दैत्यपूज्यः
    सुखं विधत्ते कुनिषेवणेन /
तदंशके वा परदेशवासान्
    मूलत्रिकोणे द्विजदेवसङ्गात् //24//
शनिः सुखस्थो यदि तुङ्गसंस्थः
    सुखं विधत्ते मृगपक्षिनाशात् /
    के वा विषभक्षणेन
    षड्वर्गशुद्धः कृषिकर्मजातम् //25//

21a. सौख्यसंस्थः G   21b. °पित्तजातं G, °वित्तजं तु S   21c. °सुखरोह्र° BCILTUW   21d. गतोद्भवं IU   22b. °नारीजातं. [illegible] °नारिजातं G, °दारजातं CL, °जायनीजं B, °जातजं च W   22c. चैव] वै AS   विलासिनीजं G   22d. °पत्निवर्गात् ABILORSW, °पत्निसर्गात् CT, °पत्नियोगात् G   23a. भृगुज° — 23d °स्थो om. BLW   23a. °श्चतुर्थः R   23c. जीविक° ORTU, जीबक° C, भाविक° S   25a. सुसंस्थो R   25c. मिष° ABCGILORSTUW

नीचाश्रितो भास्करजः प्रसूते
चतुर्थगः सौख्यविना मनुष्यम् /
नीचांशके लोकनिबन्धनेन
पापस्य वर्गे पररन्ध्रसङ्गात् //२६//
मित्राश्रयस्थो यदि
विधत्ते स्वकलत्रभक्तम् /
मित्रांशके वा स्वकुटुम्बहीनं
वर्गोत्तमस्थः परपीडनेन //२७//
राजजः प्रसूते
सुखं चतुर्थे परवंचनेन /
तदंशके मानुषविक्रयेण
मूलत्रिकोणे क्रयविक्रयेण //२८//
सौम्यः सुरराजमन्त्री
सुताधिपः सोमसुतः सितश्च /
तनी
:याधिपाः सूर्यशनैश्चराराः //२९//
स्वतुङ्गसंस्थास्त्वनुपालनाय
सौख्यानि यच्छन्ति सदा ग्रहेन्द्राः /
नीचाश्रिता हीनसुखा भवन्ति
षड्वर्गशुद्धाश्च यथा स्वतुङ्गे //३०//
इति श्रीवृद्धयवने सुखस्थानचिन्ता //

26b स्वनीचगः G सौम्य° ABCORSTW 26c लोक°— 27c मित्रांशके om. L °विबंधनेन G, °विबधनेन W 26d °रंध्रभागात् G 27b °कलत्रसक्तं U, °कलत्रसुतैः G 27c °हीनं CIOU, °हाने R 28a शत्रुश्रयस्थो TU, शस्त्राश्रयस्थो O, सर्वाश्रयस्थो B 28c °विषयेण R 28d °विक्रयैश्च W 29b सुताधिकः L 29c सहस्रजः ABCILORSTUW 29d षष्ठाधिपाः U, षड्व्याधिपाः R °शनीश्वराराः ABCOT, °शनिश्वराराः IU 30b यदा G col. श्री° om. GORU सुखभावचिंता W after col. W adds संपूर्णा

तुङ्गाश्रितो वासरपः सुतस्थः
    सुतान् विधत्ते ऽल्पतरान् नृशंसान् /
तुङ्गांशकस्थः सकलार्थसिद्धिं
    षड्वर्गशुद्धः सुभगं मनोज्ञम् //1//
नीचाश्रयस्थो दिनपः सुतस्थः
    सुतान् प्रसूते च हि जातनष्टान् /
नीचांशकस्थो विकलाङ्गभागान्
    पापस्य वर्गे त्वथ गर्भनष्टान् //2//
मित्राश्रयस्थो यदि उष्णरश्मिः
    सुतान् प्रसूते पुरतः सुताढ्यान् /
मित्रांशकस्थस्तु सुशीलवृत्तान्
    वर्गोत्तमस्थो व्यसनाधिकांश्च //3//
सुताश्रितः शत्रुगृहे दिनेशः
    सुतान् विधत्ते परदेशजातान् /
शत्रोर्विभागे त्वथ जारजातान्
    मूलत्रिकोणे गुणवर्जितांश्च //4//
सुताश्रितः शीतकरः
    कन्याः प्रसूते विपुलायताक्ष्याः /
तुङ्गांशकस्थस्तु सुरूपयुक्ताः
    षड्वर्गशुद्धः सुभगा मनोज्ञाः //5//

~~ABCGILORSTUW~~

1a. तुंगांशको U सुतस्थ W 1b. सुतां OU, सुतं G ल्पतरां OU, ल्पवरान् G (1c-d in marg. R) 1c. तुंगासकल B, तुंगांशकासे W चलज्जीवितांश्च G 1d. निस्सज्जान् दरिद्रान् G 2a. नाथाश्रितस्थो W for 2b G repeats 1b च हि] बहु STUW च om. S जातदृष्टान् L 2c °भाजान् G 2d. जातनष्टान् W 3a यदि] च हि AS 3b सुवाते G सुरतः R, सुभगः G 3c °स्थश्च G कुशील° R, कुलीन° G T ends with 3 4a सुताश्रितः W 4b परदार° GR 4c जार° om. GLW 4d. °वर्जितांगं U, °वर्जितं A 5b. कन्यां GLW °ताक्षाः G, °ताक्षीं LW 5c. °स्थश्च G स्वरूप° ABCILOW °युक्तां LW 5d. सुभगी मनोज्ञां LW

नीचाश्रितो रात्रिपतिः
कन्याः प्रसूते च सुरूपयुक्ताः /
नीचांशकस्थश्च कबद्धियुक्ता
गतासुषाश्चैव हि पीतलाश्च //६//
मित्राश्रयस्थः सुतगश्च चन्द्रः
कन्याः प्रसूते शुभशीलयुक्ताः /
मित्रांशके शौचपराः सदान्ना
वर्गोत्तमे भर्तृपराः सदैव //७//
शत्र्वाश्रयस्थः सुतगस्तु चन्द्रः
कन्याः प्रसूते ऽतिमलस्वभावाः /
शत्रोर्विभागे तु सुकुत्सिताङ्गा
मूलत्रिकोणे नितरां प्रगल्भाः //८//
भौमः सुतस्थस्तनयान् विधत्ते
स्वतुङ्गसंस्थो ऽल्पसुजीवितांश्च /
तुङ्गस्य भागे बहुरोगभाजान्
षड्वर्गशुद्धः क्षतजार्द्रदेहान् //९//
नीचाश्रितो भूतनयः सुतस्थः
सुतान् विधत्ते परदाररक्तान् /
अदीर्घजीवांश्च तदंशकस्थः
पापस्य वर्गे बहुपापरक्तान् //१०//

6b. पापां सुतां रात्रिसुता प्रसूते G 6b. कन्यां LW वसुमित्र° W °युक्तां LW 6c नीचांशके पापरता नृशंसा G 6c °स्थस्तु S, °स्थ A कुरूप° R °युक्तां L 6d. पापस्य वर्गे पररक्तभावा G 6d शीतलांश्च W 7a सुतगस्तु R 7b. कन्यां L बहुशील° G °युक्तां L 7c सुदन्ता G 7d. भर्तृपराः I CRSU, °भर्तृपरां L 8a सुताश्रितः शीतकरो ऽरिभस्थः G 8a शत्रुश्रयस्थः RU सुतगश्च L, सुतगस्तु BW 8b कन्यां W °स्वभावां W 8c तु] ति GR °तांगीं W 8d. प्रगल्भां W 9b शूरां स्वतांगत्य° G, स्वतुंगगो त्प° R 9c °भागान् U 9d. क्षतजान° G, क्षत आर्द्र° ABCIORSU 10a नीचस्थितो S

मित्राश्रयस्थः क्षितिजः सुतस्थः
सुतान् विधत्ते कृपणस्वभावान् ।
मित्रांशकस्थः कुविधिप्रसक्तान्
वर्गोत्तमस्थो विजितारिपक्षान् ॥११॥
शत्र्वाश्रयस्थः सतगो महौजः
करोति पुत्रान् व्रणरु
तदंशकस्थः सततं कुचैलान्
मूलत्रिकोणे परतर्ककांश्च ॥१२॥
बुधः स्वतुङ्गे यदि पंचमस्थः
सुतान् विधत्ते सुभगान् मनोज्ञान् ।
उच्चांशके वा विनयेन युक्तान्
बहुर्गुणाढ्यो विनयेन हीनान् ॥१३॥
नीचाश्रितः सोमसुतः सुतस्थः
सुतान् विधत्ते बहुदुःखयुक्तान् ।
नीचांशकस्थस्त्वथ कन्यकां च
पापस्य वर्गे विकृतान् नृशंसान् ॥१४॥
मित्राश्रयस्थो यदि पंचमस्थः
करोति सौम्यो निरुजान् सुपुत्रान् ।
मित्रांशकस्थो बहुशास्त्ररक्तान्
वर्गोत्तमस्थो नयसारदक्षान् ॥१५॥

11a सतगो महौजः G 11c. कुशाद्रु° L 12a यत्राश्रयस्थः U, नीचाश्रयस्थः S 12b वृण° I, गुण° S 12d. °तर्ककं W, °तर्कुकां AGLORU 13b. सभाग्यान् U 13c. उच्चांशकस्थे W 13d. बहुवीर्ययुक्तान् G दीनां U 14b. भाग्यदुःख° G 14c. कन्यकांश्च W 14d. विकृतां ABCGI नृशंसां BCI 15c. तत्रांशकस्थो BIW, तदंशकस्थो L

शत्र्वाश्रयस्था यदि सौम्यपुत्रः
सुतान् विधत्ते बहुदम्भरूपवान् ।
तदंशकस्थः पिशुनस्वभावान्
मूलत्रिकोणे गुरुदेवभक्तान् ॥१६॥
जीवः स्वतुङ्गे यदि पञ्चमस्थः
पुत्रान् विधत्ते बहुजीवभाजान् ।
तदंशकस्थः सुभगान् मनोज्ञान्
षड्वर्गशुद्धः प्रियदर्शनांश्च ॥१७॥
नीचाश्रयस्थः खलु पञ्चमस्थो
जीवो विधत्ते तनयान् सुदुःखान् ।
तस्यैव भागे वृजिनैः समेतान्
पापस्य वर्गे गतसौहृदांश्च ॥१८॥
मित्राश्रयस्थः सुभगः सुरम्यः
सुतान् विधत्ते पालितान् सुरक्तान् ।
धूर्तप्रियान् तस्य विभागसंस्थो
मूलत्रिकोणे ऽद्भुतविक्रमांश्च ॥१९॥
———————————— ॥२०॥
शुक्रः सुतस्थो निजतुङ्गसंस्थः
कन्याः प्रसूते सुभगा मनोज्ञाः ।
तुङ्गांशकस्थो बहुपुत्रयुक्ताः
षड्वर्गशुद्धः शुभरूपयुक्ताः ॥२१॥

16a. शत्र्वाश्रयस्थो U 16b. दम्भरू° G 16d. °देवरक्तान् G
18b नयनान् R, नयान् C सुदुःस्थान् AS 18c वृजनैः ACIOSU
19a. सुगतः W 19b. पलितान्सुरक्तान् G पाठितान् C

नीचाश्रितो दैत्यगुरुः सुतस्थः
कन्याः प्रसूते विविधाः सुरूपाः ।
नीचांशकस्थः नरककाभिन्नाः
पापस्य वर्गे कृपणस्वभावाः ॥२२॥
मित्राश्रयस्थो भृगुजः सुतस्थः
सुताः प्रसूते पतिभक्तियुक्ताः ।
मित्रांशके वा धनसत्त्वयुक्ता
वर्गोत्तमस्थः त्रपया समेताः ॥२३॥
शत्र्वाश्रयस्थो भृगुजः सुतस्थः
स्तुताः सुताते बहुपापयुक्ताः ।
तदंशके नष्टसुखाः कुध्वा
मूलत्रिकोणे हतशत्रुपक्षाः ॥२४॥
शनैश्चरः पंचमगः स्वतुङ्गे
पुमान् प्रसूते बहुशत्रुपक्षान् ।
तदंशके वा बहुरोगयुक्तान्
षड्वर्गशुद्धः सुतरां कृतघ्नान् ॥२५॥
नीचाश्रितः सूर्यसुतः सुतस्थः
सुतान् विधत्ते धनभाग्यनष्टान् ।
तदंशके वा [illegible]
पापस्य वर्गे बहुरोगभाजान् ॥२६॥

22b. विधवाः GU स्वरूपा L, सरूपाः I, कुरूपाः GR 22c. नररकाभिन्नाः em. A, नरकादिरक्तं G 23 after 24 in W 23b–24a om. G 23d. त्रपया वा U 24a. शत्रुश्रयस्थो 24b बहुपानरक्ता G order in W: 25a, 26a–26d, 26a, 25b–25d 25c. °रोगयुक्तान् W 26a. सुतस्थः] स्वतुंगे G 26b. न शुभभाग° BL, वसुभाग° W, धियभाग° GR °दुष्टान् L

मित्राश्रयस्थो रविजः सुतस्थः
पुत्रान् विधत्ते कृषिकर्मसक्तान् /
तदंशके वा पशुपालनोत्थान्
वर्गोत्तमस्थो बहुलोकपांश्च //२७//
शत्र्वाश्रयस्थो रविजः प्रसूते
सुतस्थितः कापुरुषांश्च पुत्रान् /
तदंशके भूततमानतीव
मूलत्रिकोणे बहुपानभाजान् //२८//
यदि भवति सुतर्क्षं युग्ममेवाबलानां
विषममथ नराणां प्रायशो जन्मदं स्यात् /
युवतिपुरुषषण्ढा दृष्टितुल्या ग्रहेन्द्रा
बलमितपरिपाकं सन्ततेर्धारयन्ति //२९//
क्लीबोपमे पंचमगे तथा भे
†षण्ढग्रहाः षण्ढनरं प्रसूते /
षण्ढाश्रिते स्यात् पुरुषः प्रशस्तः
न हीनो यदि वाबलाश्च //३०//
इति श्रीवृद्धयवने सुतस्थानचिन्ता //

27b. सुतान् G °कर्मसुक्तान् G 27c °पालनोत्याद् R, °पालने स्याद् G 28a शत्रुश्रयस्थो U 28c षण्डसमाननीम G भून° IOWU भुंन° R 29a सुतर्क्षं BCIOU 29b जस्तद: B, नस्तदा LW 29c °तुल्यं G 29d बलमति° ABGS 30a क्लीबोपमे CL, क्लीबोयपे BIOW, क्लीबोवपे R, क्लीबोदये G 30b षद्ग्रहा LW बंधनरं W, बंधनर: ABCILOS, यै: द्विनर: G, ब्येर्द्विनर: R 30c. षंढस्नुते AU, षंढच्युतैः R (G), षंढसुते O, षंढश्वते BCILW, पटस्नुते S पुरुषान् G 30d. °हीना ABCGIORSUW र्वबला य G
col. श्री° om. GORU after col. W adds संपूर्णा

नासरथो ऽरिसंस्थः
यत्रं विधत्ते व्रतिनं सदैव /
तुङ्गांशकस्थः स्व विक्रमेण
षड्वर्गशुद्धो नृपतिं सदैव ॥१॥
नीचाश्रयस्थः सवितारिसंस्थः
यत्रं विधत्ते कुमतिं कृतघ्नम् /
नीचांशकस्थः प्रमदानुरक्तं
पापस्य वर्गे परतर्ककं च ॥२॥
सुहृद्गृहस्थः सवितारिसंस्थः
यत्रं विधत्ते वणिजानुरक्तम् /
मित्रांशकस्थस्त्वथ राजपाल
वर्गोत्तमस्थो बहुशिष्यभाजनम् ॥३॥
शत्र्वाश्रयस्थो यदि तीक्ष्णरश्मिः
षष्ठे विधत्ते प्रमदासमुत्थम् /
वैरं तदंशे त्वथ पुंश्चलीभि-
र्मूलत्रिकोणे च विलासिनीभिः ॥४॥
चन्द्रो ऽरिसंस्थो यदि तुङ्गसंस्थः
यत्रं विधत्ते बहुशास्त्ररक्तम् /
उच्चांशके वा परदाररक्तं
षड्वर्गशुद्धो ऽप्यथ पार्थिवं च ॥५॥

1b–2a om. B 1b. वृत्तिनं C 2d. °तर्कुकं AGOR 3d. बहुशिल्प GR 4a यत्त्राश्रयस्थो U शत्त्वा° with उच्चा written above C 4b षष्ठो IORU order in BILW: 5a–5c, 6d–7a (7b in I), 6a–6c, 5d, 7c–7d 5d. त्वथ CG

छायाश्रितः शान्तकरोऽरिसंस्थो
मित्रं न किंचित् कुरुते नराणाम् ।
छायांशकस्थश्च बहुप्रकारं
वैरं स्ववर्णेन खलोत्थवर्गे ॥ ६ ॥
ज्ञाश्रयस्थो यदि शीतरश्मिः
षष्ठास्थितोऽरिं नृपतिं प्रसूते ।
मित्रांशकस्थस्तु नरेन्द्रपुत्रं
वर्गोत्तमस्थः सततं नृशंसम् ॥ ७ ॥
शुक्राश्रयस्थो यदि शीतरश्मिः
शत्रुं विधत्ते विकृतस्वभावम् ।
तस्यैव भागे ह्यथ सैन्यनाथं
मूलत्रिकोणे गुरुवत्सलं च ॥ ८ ॥
तुङ्गाश्रितो भूतनयस्तु षष्ठे
शत्रुं न पुंसां कुरुते कदाचित् ।
तुङ्गांशके चाथ सुदानचेष्टं
बहुगेहाढ्यः परदेशभाजम् ॥ ९ ॥
भौमोऽरिसंस्थो यदि नीचसंस्थः
शत्रुं विधत्ते ऽन्त्यजमेव पुंसाम् ।
नीचांशके वा कृषिकर्मरक्तं
पापस्य वर्गे धनधान्यहीनम् ॥ १० ॥

after 6b W adds: राज्यार्थदानानविवर्धनं च 6d वैरं om. A स्ववर्गेण G, स्ववर्णेन न S बलोत्थ° G °मार्गे L 7b षष्ठाश्रितो R 7c-8a om. G 7d. नृसिंहं C 8a शत्रुश्रयस्थो U 8b जनितोद्भवं च G 8c. त्वथ GRU सैन्यनाशं O 9a षष्ठः R 9c चाद्य LI, चाप्य C, चाय W, चाल° G सुदान° BLW, °सुदार° CI °चेष्टो CI, °चेष्टः W 10b. शत्रुं] शत्रू U

मित्राश्रयस्थो यदि भूमिपुत्रः
षष्ठे प्रसूते तनयेन वैरम् ।
मित्रांशके वा त्वथ बान्धवेन
वर्गोत्तमस्थो निजमातुलेन ॥११॥
भौमो ऽरिसंस्थो यदि शत्रुराशौ
रिपुं विधत्ते गुरुदेवतारम् ।
तस्यैव भागे घृणया विहीनं
मूलत्रिकोणे प्रियसाहसं च ॥१२॥
सौम्यो ऽरिसंस्थो यदि तुङ्गसंस्थः
शत्रुं विधत्ते विकृतस्वभावम् ।
तुङ्गांशके वा धनिनं विरूपं
षड्वर्गशुद्धः सुरतानुकूलम् ॥१३॥
बुधो ऽरिसंस्थो यदि नीचराशौ
शत्रुं सजाते विकलं विनेत्रम् ।
काणं तदंशे विकृतांघ्रिदंष्ट्रं
पापस्य वर्गे द्विजधामरकम् ॥१४॥
मित्राश्रयस्थो यदि सोमपुत्रः
षष्ठे विधत्ते सचिवं हि मित्रम् ।
मित्रांशकस्थः सचिवस्य पुत्रं
षड्वर्गशुद्धः परदाररकम् ॥१५॥

11c वा om. W 12b. कुरुदेवितारं R, चुसुदेवितारं G 13b. विनाल° G 13c. वारिधनं G 13d. सुतरानुकूलं G 14b त्रिनेत्रं BL 14c. विकृतो ABCILSUW, विक्रितो O, विगतां GR हृदस्तं ABCILORSUW, गृगेस्तं G 14d. °धात्मरकं U, °घातरकं R घातकं च G, °धामरकं W, °धानरकं L 15c. मित्रांशके वा GR

यात्रोर्गृहस्थो यदि सोमपुत्रः
    पुत्रं विधत्ते परवित्तरक्तम् /
चौरं नटं वा सततं नृशंसं
    मूलत्रिकोणे स्वसनाभिभूतम् //१६//
जीवः स्वतुंगे यदि वहसंस्थः
    पुत्रं प्रसूते बहुदानभाजम् /
तुङ्गांशके वैरिविवर्जितं च
    चतुर्बुद्धिः प्रमदानुकूलम् //१७//
नीचांशके वा यदि देवपूज्यः
    पुत्रं प्रसूते ऽलसं च सक्तम् /
नटं खके वा बहुपानरक्तं
    पापं करौ गुणवर्जितं च //१८//
मित्रांशके यदि देवमन्त्री
    पुत्रं सुवाते ऽवनिपतिं प्रसिद्धम् /
तदंशके वा स्वगर्दभाढ्यं
    कर्मोत्तमः कुलवर्जितं च //१९//
यत्नाश्रयस्थः कुरुते सुरेज्यः
    पुत्रं विहीनं निजबन्धुवर्गैः /
यात्रोर्विभागे विनयेन हीनं
    मूलत्रिकोणे बहुपुत्रपौत्रम् //२०//

16a सोमसुतः R 16b परिचित्त° G 16c सततं R नराणां U
17a यदि — 20a यत्नाश्रयस्थः : om. G 17a वह्निसंस्थः : C
17b बहुदेव° W for 18c C repeats 17c 18c बहुपाप° LW
19b स्वपतिं ACIOSU 19c वर° ACIOSU, रथारं BLW
°भांशाढ्यं BW, °भांश L, °भाव्यं R 19d श्रुति° OW, सुत° C
20a यत्नाश्रयस्थः : U 20b नितबन्धु° G 20d °पुत्रमित्रं L after 20 G adds:

वाग्नि ३०संख्यामिते वर्षे यावत्र साक्षा ६०मिते सदा /
        राज्यात् फलं ज्ञेयं लग्नकर्मत्र्यपंचमे //१८//
धा नार्गे यदि सर्वेश्वरा
    जायते भवति जन्मविलग्ने /
कर्मनंदति २० तथा च त्र्यंशमे ३०
    अवनीतगजवेष्टितो नरः //१९//
लग्नेककर्मैव यदारिसंस्थो
    तदा नरेन्द्रो धनधान्ययुक्तः /
ह्रताशिपस्थं कुलमुख्यमाहुः
    बुधो ऽपि नूनं गुरुमेवमेतत् //२१//

शुक्रः स्वतुङ्गे यदि शत्रुसंस्थः
    शत्रुं विधत्ते जितशत्रुपक्षम् ।
तुङ्गांशके वा जितशत्रुदारं
    षड्वर्गशुद्धः प्रणतारिपक्षम् ॥२१॥
नीचाश्रयस्थो रिपुगोऽसुरेज्यः
    शत्रुं प्रसूते बहुकन्यकाढ्यम् ।
नीचांशकस्थस्तु गजाधिनाथं
    पापस्य वर्गे कृतपापसङ्घम् ॥२२॥
मित्राश्रयस्थो रिपुगो विधत्ते
    शुक्रो रिपुं बान्धववर्गमेव ।
तदंशके वा स्वकलत्रवर्गे
    गोत्तमस्यः श्वशुरं सदैव ॥२३॥
शत्र्वाश्रयस्थोऽरिगतस्तु शुक्रो
    रिपुं प्रसूते सुतरां नृशंसम् ।
तस्यांशके व्याधिविवर्जिताङ्गं
    मूलत्रिकोणे धनवर्जितं च ॥२४॥
शनैश्चरः षष्ठगतः स्वतुङ्गे
    परैर्विहीनं जनयेन्मनुष्यम् ।
तुङ्गांशके स्वल्परिपुं जितारिं
    षड्वर्गशुद्धः सुनतं परैश्च ॥२५॥

21b. शत्रुं जितः शत्रुजनेन पक्षं G   21b. निजशत्रु° L   21c नित° यदि G   21d °ताधिपक्षं BW   22a. यदि दैत्यपूज्यः U   ऽसुरेज्यः om. S   22d. पापस्य वर्गे कृत° om. C   °पापसंघं GU, °पापसंस्थं C   23b वा धनवर्ग° W   23d. स्वसुतं U, स्वसुतं G   तदैव ABCILOSUW   24b. विधत्ते L   25b पापै° G   25c शल्प° ABCIOSU, शिल्प° W, तुल्प° L   25d सुतनं C, मततं G

नीचाश्रयस्थो यदि सूर्यपुत्रः
शत्रुं प्रसूते तरलं मनुष्यम् ।
नीचस्य भागे कनकाढ्यमेव
पापस्य वर्गे कृषिकर्मदक्षम् ॥२६॥
मित्राश्रयस्थो रविजो ऽरिसंस्थः
शठं रिपुं स्वल्पतनुं प्रसूते ।
मित्रस्य भागे धनिनं प्रधानं
वर्गोत्तमस्थो बहुकर्मयुक्तम् ॥२७॥
शत्र्वाश्रयस्थो रविजो रिपुस्थः
शत्रुं सुवाते सततं गतार्थम् ।
शत्रोर्विभागे सुतदारहीनं
मूलत्रिकोणे परसङ्गतं च ॥२८॥
दशाधिपस्तीक्ष्णकरः प्रदि—
सहस्रनाथो रजनीपतिश्च ।
वक्रार्कजौ हीनपरौ सदैव
शेषास्तु चन्द्रेण समाः स्वतुङ्गे ॥२९॥
इति श्रीवृद्धयवने रिपुस्थानचिन्ता ॥

26b शत्रुं विधत्ते निखलं नृशंसं G 26b तिरलं नृशंसं R
नृशंसं added after मनुष्यं in BL 26d. बहुकर्म° G 27a
मित्राश्रये BW 27b शठो U शल्पतनुं O 27c. वणिजं BLRW,
विनज G प्रसूते C 27d. मूलत्रिकोणे ABCGILORSU 28a
रिसंस्थो G 28b सततं] सुतरां GR 28d. नटनर्तकं G 29a
दिशाधिप° BIOU, देशाधिप° S 29c वक्रार्कजौ BW
29d. स्वतुंगाः R col. श्री° om. GOR रिपुभाव L after col.
W adds संपूर्णो

दिनाधिपः सप्तमगः स्वतुङ्गे
करोति भार्यां कलहप्रियां च /
तुङ्गांशकस्थः परकर्मरक्तां
षड्वर्गशुद्धस्तु दरिद्रयुक्ताम् ॥१॥
नीचाश्रितः सप्तमगस्तु सूर्यो
भार्यां विधत्ते व्यभिचारिणीं च /
नीचांशकस्थश्च ऽनरोगयुक्तां
पापस्य वर्गे सततं कुशीलाम् ॥२॥
मित्राश्रयस्थो दिनपः कलत्रे
करोति भार्यां सततं नृशंसाम् /
मित्रस्य भागे सुविहीनभिन्नां
वर्गोत्तमस्थः सुरतप्रियां च ॥३॥
शत्र्वाश्रयस्थो यदि वासरेशः
करोति भार्यां व्यसनाभिभूताम् /
शत्रोर्विभागे परहीनकृत्यां
मूलत्रिकोणे प्रियसाधुवसां च ॥४॥
चन्द्रस्तु कामे यदि तुङ्गसंस्थो
भार्यां विधत्ते सुभगां मनोज्ञाम् /
तुङ्गांशके वा सुरदेवभक्तां
षड्वर्गशुद्धो ऽतिमनोज्ञरूपाम् ॥५॥

1a. धनाधिपः I 1c. तुंगांशके वा G 1d षड्वर्गयुक्तस्तु L
2c °स्थस्तु G सुरोग° CR 3c. °चिन्तां RS 3d. सरता° A,
सुतरां U, कलह° G 4b. व्यसना°—5a विधत्ते om. G
4d. प्रियसाधुसेवां W 5b. मनोज्ञां G 5c. सुरदेवभक्तां
ABCILOSUW, प्रियवाक्यरक्तां G, वाक्यरक्तां R

शाकरः कामगतः स्वनीचे
भार्यां विधत्ते बहुरोगभाजाम् ।
ीचांशके कुष्ठरुजा समेतां
पापस्य वर्गे पतिना विरुद्धाम् ॥६॥
मित्राश्रयस्थो यदि रात्रिनाथो
भार्यां प्रसूते प्रियवादिनीं च ।
मित्रांशके वा विनयेन युक्तां
वर्गोत्तमस्थो बहुकर्मयुक्ताम् ॥७॥
त्र्वाश्रयस्थो यदि रात्रिनाथो
विरुद्धचेष्टां जनयेच्च भार्याम् ।
त्रोर्विभागे विगतप्रभावां
मूलत्रिकोणे बहुभृत्यदक्षाम् ॥८॥
रासुतः कामगतः स्वतुङ्गे
भार्यां विधत्ते गतरूपवित्ताम् ।
ुङ्गांशके वालिजराभिभूतां
षड्वर्गशुद्धः प्रथितप्रभावाम् ॥९॥
नीचाश्रयस्थः क्षितिजस्तु कामे
दारं विधत्ते प्रचुरप्रगल्भम् ।
ीचांशके वा बहुशत्रुपक्षां
पापस्य वर्गे निजवर्गहीनाम् ॥१०॥

6a निशाचरः CIRW ºगतस्तु नीचे L, ºगतः सुनीच° G for 6b G repeats 5b 6c. ुष्ठरुजा B, गुह्यरुगा G 6d. पतितां W 7a यदि om. W 7c. हीनां G 7d. बहुभर्मै° G 8d. बहुकृत्य° R 9a कामगतः om. A 9b गतवित्तरूपां GU 9c. यांति CILOSU 10b. दारां ABCORSUW, परां GI
चुर°] तिनर° G, स्वभान° C °प्रगल्भां ABISUW, °प्रभावं L 10d. °हीनं R

मित्राश्रयस्थः क्षितिजः कलत्रे
भार्यां सुबाले लघुचोलनां च।
मित्रस्य भागेऽन्यसरोरुहाक्षीं
वर्गोत्तमस्थः प्रभुताविहीनाम्॥११॥
शत्र्वाश्रयस्थो यदि भूमिपुत्रो
भार्यां विधत्ते कठिनस्वभावाम्।
तदंशके वा हतबन्धुवर्गां
मूलत्रिकोणे परसङ्गतां च॥१२॥
कामाश्रयस्थः शशिजः स्वतुङ्गे
भार्यां विधत्ते ऽतुलरूपयुक्ताम्।
तुङ्गांशके वा बहुभोगभक्तां
षड्वर्गशुद्धः कुलमण्डनां च॥१३॥
नीचे च सौम्यः खल सप्तमस्थः
करोति भार्यां कुनरानुरक्ताम्।
नीचांशके वा व्यसनानुरक्तां
पापस्य वर्गे गुणवर्जितां च॥१४॥
मित्राश्रयस्थो यदि सोमपुत्रो
दारं प्रसूते बहुपुत्रपौत्रम्।
मित्रांशके वा प्रचुरान्नपानां
वर्गोत्तमस्थः प्रभया समेताम्॥१५॥

11b. लघु° ASU °लोचनां GL 11c °रोरुहां च GR
11d. प्रसुता° G 12b. सुवाते GR 12d. परभंगता G
13b. तुल° BIW, तनु° L, बहु° C, भु° U °रूप° L, °प° BW, °पस्य° AIORSU 13c °भोगभाजां G 13d. °मंडलभाः W
14a. च]त L, स U 14b °युक्तां G 15b. दारां ABCILOSU, द्वारान् R, दाराः W °पौत्रां ABCILOSUW, °पौत्रान् R
15d. प्रलया G, प्रियया L.

शत्र्वाश्रयस्थो यदि कामगो ज्ञो
भार्यां सभाते सर्वविवर्जितां च /
तदंशके वा धनधान्यहीनां
मूलत्रिकोणे जनवल्लभां च //१६//
जीवः कलत्रे यदि तद्भसंस्थः
करोति दारं प्रियदर्शनं च /
तदंशकस्थो बहुसौख्ययुक्तां
षड्वर्गशुद्धः सुकुलोद्भवां च //१७//
नीचाश्रितो दैत्यगुरुः कलत्रे
दारं विधत्ते न कुलोद्भवं च /
नीचांशकस्थो बहुमानयुक्तां
पापस्य वर्गे मिथुनस्वभावाम् //१८//
मित्राश्रयस्थो मदने सुरेज्यो
दारं विधत्ते बहुसाधुमित्रम् /
मित्रांशकस्थो मणिमौक्तिकाढ्यं
वर्गोत्तमस्थो ऽतिविशुद्धकामाम् //१९//
शत्र्वाश्रयस्थो मदने सुरेज्यो
दारं विधत्ते चपलस्वभावम् /
परांशकस्थो ऽतिकठोरवाक्यां
मूलत्रिकोणे गुणवर्जितां च //२०//

16c. °दीनां G 16d. नवजल्लभां S 17b. दारां ABCGILORSUW °दर्शनां ABCGILORSUW 17d–18c om. G 17d. स्वकुलो° S, सकलो° A, कुशलो° L 18a. दैत्यगुरुः U 18b. दारां ABCILORSUW न] त ORSU °द्भवां ABCILORSUW 19b. दारां ABCGILORSUW °मित्रां ABCGILORSUW 19c. त्रिंशांश° S मणिमौक्तिकाढ्यां CI, याद् सममस्थो G 19d. °स्थस्तु R, °स्थो स° G °कामं G 20b. दारां ABCGILORSUW °स्वभावां ABCGOSUW, °स्वभावान् R 20c. निकटस्वभावां U

शुक्रोच्चसंस्थो यदि सप्तमस्थो
भार्यां सवाते बहुमित्रपक्षाम् /
तुङ्गांशकस्थो द्विजदेवभक्तां
षड्वर्गशुद्धस्तु पतिव्रतां च //21//
नीचाश्रितो दैत्यगुरुः कलत्रे
कलत्रमुग्रैः कुरुते प्रसन्नम् /
नीचांशकस्थस्तु सरूपनेत्रां
पापस्य वर्गे घृणया विहीनाम् //22//
मित्राश्रयस्थः कुरुते च शुक्रः
कामे सुकामां सुभगां च भार्याम् /
मित्रांशकस्थश्च सुशुद्धचित्तां
वर्गोत्तमस्थो जनवल्लभां च //23//
शत्र्वाश्रयस्थो भृगुजस्तु कामे
भार्यां सुवाते सुतरां प्रहीनाम् /
त्र्वंशकस्थोऽप्रकृतस्वभावां
मूलत्रिकोणे सुसमन्वितां च //24//
शनैश्चरस्तुङ्गगतः कलत्रे
स्थूलं कलत्रं कुरुते नराणाम् /
तुङ्गांशकस्थश्च सुकृष्णगात्रां
षड्वर्गशुद्धो बहुदुःखभाजाम् //25//

21b विभाते G 22b प्रसन्नां ABCGILOU, प्रमत्तां S 22c °स्थश्च G कुरूप° G 23a तु G, ऽत्र S 23b काये BI सका B, सकामां L, सकामं W 23c °स्थस्तु L, °स्थः सु° W विशुद्ध° LW °वित्तां BCIRU 24a भृगुजश्च G 24b सुतरांग° CGI, सुतनांग° BLW, सुतन्वंग° AORSU °हीनं G 24c °स्थां ग° ABCILORSUW, °स्थो श° G 24d विनयान्वितं G 25c सुकृष्ट° R, सुकृष्ण° S, तु कृष्ण° U °गात्रं UW 25d बहुदुःख° G °भाजं GW

नीचाश्रितः कामगतस्तु कोणो
दारं प्रसूते विकरालगात्रम् ।
नीचांशकस्थश्च विहीनधर्मां
पापस्य वर्गे पररक्तचित्ताम् ॥२६॥
मित्राश्रयस्थः प्रकरोति सौरः
कामाश्रितः कोपपरं कलत्रम् ।
मित्रस्य भागे गुणवर्जिताङ्गीं
पापस्य वर्गेऽतिखलस्वभावाम् ॥२७॥
स्वाश्रयस्थो रविजः कलत्रे
दारं प्रसूते बहुपापरक्तम् ।
तस्यैव भागे पतिनिन्दितां च
मूलत्रिकोणे विधनां सदैव ॥२८॥
सप्ताधिपो दैत्यगुरुः सितश्च
सौम्यो विसंस्थः शशिजो गणानाम् ।
एकाधिपाः सूर्यशनैश्चराराः
स्वतुङ्गगाः स्पर्धि सद्ग्रहेन्द्राः ॥२९॥
इति श्रीवृद्धयवने कलत्रस्थानचिन्ता ।

26a नीचाश्रयः C कोको L, कामे G 26b. दारां ABCGILORSUW °गात्रां ABCGILORSUW 26c °स्थश् C, स्थ BW 26d. चिंतां R 27a सौरिः G 27c °तांगं L 27d. °स्वभावं CILR 28b दारां ABCILOSUW, दारा R °रक्तां ABCILRSUW 28c. बहुनिंदितां G 28d. विहीनां ACILOSU, निधनां G 29 om. ABCILORSUW 29b गुणानां G 29c. °शनैश्चराश्च G col. श्रीवृद्धयवने om. U श्री° om. GIOR कलत्रचिंता U, स्त्रीभावचिंत W after col. W adds संपूर्णा

सूर्यो यदा मृत्युगतश्च तुङ्गे
    मृत्युं विधत्ते ऽग्निनिवेशनेन /
धन्या तदंशे ननलज्जीव
    षड्वर्गशुद्धस्त्वथवा प्रमादात् //१//
नीचाश्रितो वासरपो ऽष्टमस्थो
    मृत्युं विधत्ते वनपावकेन /
नीचांशके दन्धनकर्मतश्च
    पापस्य वर्गे न प्रदीपनेन //२//
• मित्राश्रयस्थो दिनपो ऽष्टमस्थो
    मृत्युं विधत्ते विषभक्षणेन /
मित्रांशकस्थश्च निबन्धनेन
    वर्गोत्तमस्थो निशि तापसेन //३//
शत्र्वाश्रयस्थो दिनपो ऽष्टमस्थः
    करोति मृत्युं रुधिरप्रकोपात् /
तदंशके वा बहुकासशोषात्
    मूलत्रिकोणे वनितापराधात् //४//
चन्द्रो ऽष्टमस्थो यदि तुङ्गसंस्थः
    करोति मृत्युं सलिलप्रवेशात् /
तुङ्गांशकस्थः करकाभिघातात्
    षड्वर्गशुद्धस्त्वशनिप्रपातात् //५//

1a °गतस्त L, °गत: स्व° G 1b °वेशने म B 1c धन्का CI, corr. C
1d प्रसादात् G 2b विधत्ते om. S 2c नवांशके LOSUW
दन्धन: BILW 3b विषभक्षणेन B विबंधनेन CILO
3d निश° U, निषि R 4b मर्त्यं C 4c तदंशकस्थो G
बहुकाम° ABC, बहुकोश° I °शोकात् BCILW, कोशा m
. . . . 4d वनिपातराधात् R 5b करोति मृत्युं om. . .
5c तुंगांशसंस्थ: AS °कस्थो प्रकरोति° GU, °कस्थश्च
करकाभि° L प्रकरोति घातात् S, करकानिपातात् W
5d °प्रतापात् GR, °प्रपात् BIU

नीचाश्रितो रात्रिपतिः करोति
छिद्रे विनाशं वनिताकरेण।
नीचांशकस्थः कफपित्तदोषात्
पापस्य वर्गे त्वथ सन्निपातात्॥६॥
मित्राश्रयस्थो रजनीपतिश्च
करोति मृत्युं जठरप्रकोपात्।
तस्यैव भागे गुदरोगतश्च
वर्गोत्तमस्थः पशुपादघातात्॥७॥
शत्र्वाश्रयस्थो विधुरेव धत्ते
मृत्युं नराणां बहुमूत्ररोगात्।
तदंशकस्थः पशुशृङ्गसङ्गात्
मूलत्रिकोणे क्षयरोगतश्च॥८॥
सौम्यो ऽष्टमस्थो यदि तुङ्गसंस्थः
सङ्ग्राममृत्युं कुरुते नराणाम्।
तुङ्गांशकस्थस्त्वथ शस्त्रकर्म
बहुरोगयुक्तस्त्वथ रोगग्रहेण॥९॥
नीचाश्रयस्थो धरणीज छिद्रे
स्वहस्तमृत्युं कुरुते नराणाम्।
नीचांशकस्थश्च निजायुधेन
पापस्य वर्गे द्विजपार्थिवश्च॥१०॥

°छद्रे R 6c. नीचांशके तु C, नवांशकस्थः LSUW
त्वथ निप्रतापात् C 7a मित्राश्रयस्थो L 8a
°रे विधत्ते G, रजनीपतिश्च U 8b नराणां om. B
IOR SU, तत्र W बहुमूत्र° S, बहुगुह्य° G °संगात्
8d. क्षयरेणतश्च A, क्षयेण गतश्च S 9c °णांशकस्थ°
J, उच्चांशकस्थ° L शास्त्र° C °कर्मा ACSU, कर्मौ B,
°र्मै IW, कर्मतः G 9d. गोग्रहे च CG, गोपग्रे च R
नीचाश्रितो भूतनयो ऽष्टमस्थः GR 10a नीचांशकस्थो
10c निजांकधेन BI, निजांशकेन LW

[illegible]ः क्षितिजो ऽष्टमस्थः
[illegible]रोति मृत्युं दृषदाश्रयेण /
मित्रस्य भागे त्वथ गोष्ठसङ्गात्
कोलभस्थस्त्वथ कूपपातात् //११//
शुक्राश्रयस्थः क्षितिजो ऽष्टमस्थो
भूकूपपाताच्च करोति मृत्युम् /
तस्यांशकस्थस्त्वथ गुल्मरोधान्
मूलत्रिकोणे विषभक्षणेन //१२//
सौम्यो ऽष्टमस्थो यदि तद्गृसंस्थः
करेण मृत्युं प्रकरोति पुंसाम् /
तद्भांशकस्थः कफजैर्विकारैः
षड्वर्गशुद्धो ऽनिलसम्भवैश्च //१३//
नीचाश्रयस्थो ऽष्टमगस्तु सौम्यः
करोति मृत्युं व्रणवैकृतेन /
नीचांशकस्थश्च महाभयेन
पापस्य वर्गे प्रियविप्रयेण //१४//
मित्राश्रयस्थो यदि सोमपुत्रो
मृत्युं विधत्ते हृदयप्रकोपात् /
मित्रस्य भागे ऽचिरुजा नराणां
वर्गोत्तमस्थस्त्वथ गुह्यरोगात् //१५//

11b करोति मृत्युं om. G दृषटा° CU, वृषटा° R, [illegible]टा° S
°श्रयोग: G 11c. गाष्ठ° R, कष्ठ° G, गोत्म° BIL, गोष्ठ° OU,
गोत्स° A, गोत्व° S, गोस° W, गोत्र° C 11d. शाप° L, अरूप° W
12b भूगुप्रपाता° A, भूगप्रतापा° corr. to भूगप्रपाता° U,
भृगुप्रपाता° CGIOS, भृगुपपाता° BL, भृगूपपाता° W,
भृगुप्रतापा° R 12c °रोधान् G, °रोगान् LU 13b. ज्वरेण
G 14b. नित्यं G प्रण° BGLR, पण° W, घ्राण° C, स्रण° I, मृण° U
14d. प्रियविप्रयोगात् GI, प्रियेण भावात् W,
प्रियेण AL 15c. क्विसजो B, क्षितिजो C (sic), क्षितिजो LW,
क्षिरुजो I

यात्वाष्टमस्थ: शशिज: प्रसूत
मृत्युं नराणां दृढबन्धनेन /
तस्यैव भागे जठरोत्थरोगान्
मूलत्रिकोणेंऽधिकव्रणेन पुंसाम् //१६//
…ो ऽष्टमस्थो यदि तद्गुसंस्थो
मृत्युं विधत्ते विविधैश्च रोगै: /
…ं शकस्यस्त्वथ मूलरोगात्
…गोद्भुः अन्नप्रकोपात् //१७//
गुरु: स्वनीचे यदि याष्टमस्थो
…ं विधत्ते जनस्य हस्तात् /.
तस्यैव भागे ऽथ विषाग्निसङ्गात्
…ापस्य वर्गे त्वतिसारतश्च //१८//
…त्रयस्थो यदि दैत्यमन्त्री
…न्ध्रे विनाशं कुरुते स्वभूत्यात् /
तस्यैव भागे हृ…ज्वरप्रकोपाद्
वर्गोत्तमस्थ: सुरतानुसङ्गात् //१९//
…त्रयस्थो यदि दैत्यमन्त्री
…न्ध्रे विनाशं कुरुते सकोपात्
…व भागे शिरस: प्रकोपात्
मूलत्रिकोणे बहुभव्रणेन //२०//

…बन्धनेन L, दृढबंधनेन B, तृणबंधनेन W 16c. …G … हि° G, धि° L, पि U, य W °व्रणेन BI, °भवेन 17b. विधत्ते om. W 17c. °स्य काकाय B, °स्य - काय मूलरोगात् R, मूलदुष्यात् G 17d. प्रणव° W 18a. …नीचे A, पुसंमनाय U वाष्टमस्थो U, वाटमस्थो W, …ष्टमस्थो G 18c. तथैव G विषाग्नि° U, विषूचि° G …गाम B, योगात् S, °कास्या G 19-21 om. G 19d …TT° ABIORUW, …रग° L, तुरग° S °भूसंगात् BIW, …संगा… K, प्रसंगा… L 20b. सुकोपात् R, स्वभृत्यात् SU …शिर° LW

शुक्रो ऽष्टमस्थो यदि तुङ्गसंस्थः
 पिपासयार्त्तं कुरुते नराणाम् /
तुङ्गांशकस्थश्च मुखस्य शोषात्
 षड्वर्गशुद्धो नरदुःखदश्च //21//
नीचाश्रितो दैत्यगुरुश्च रन्ध्रे
 मृत्युं विधत्ते गुरुसन्निपातात् /
नीचांशकस्थस्त्वथ वक्त्ररोगात्
 पापस्य वर्गे व्रणसत्त्वतश्च //22//
मित्राश्रयस्थो भृगुजः प्रसूते
 स्थाने ऽष्टमे नाशमहिप्रसङ्गात् /
मित्रांशकस्थो विषकण्टकेन
 वर्गोत्तमस्थस्त्वथ लूतया च //23//
शत्र्वाश्रयस्थो भृगुजो ऽष्टमस्थः
 करोति मृत्युं विषकण्टकेन /
तदंशकस्थः सुरतप्रकोपात्
 मूलत्रिकोणे प्रचुरप्रकोपात् //24//
शनैश्चरस्तुङ्गगतो ऽष्टमस्थो
 मृत्युं विधत्ते ऽतिबुभुक्षया च /
तुङ्गस्य भागे गुरुलङ्घनेन
 प्रायोपवेशाद्सवर्गशुद्धः //25//

21b. पिपासयार्तं W, पिपासयार्तं I 21c. °स्थस्य C शोषात् CI 22a °श्च] °स्त्व° W, स° BCI, सु° L 22c °स्त्वथ वक्त्ररोगात् om. G वक्र° ISUW °योगात् S 22d. व्रन° G °सकृतश्च L, °वत्वतश्च O 23b. नासमहे: GR, नासहमे CI, नासहसे BLW, नासहम° AS, नाभिहस° O 23c तत्रांशकस्थो ABCLOSUW 23d. भूतया IW 24a-b om. G 24c तट्टरस्थः G सुतर° G 24d. °प्रदुःसात् GR 25b. तिबुभूक्षया AU 25d °द्सवर्ण° BLW, °त् षड्वर्ग° CI

नीचाश्रितः सूर्यसुतोऽष्टमस्थो
 मृत्युं विधत्ते निजबन्धुवर्गात्
तस्यैव भागे रिपुहस्ततश्च
 चापस्य वर्गेऽत्र परीक्षयेण ॥२६॥
मित्राश्रयस्थो रविजः प्रसूते
 मृत्युं महाद्द्रुकृतैर्विकारैः ।
तस्यैव भागे पिटकैश्च मृत्युं
 वर्गोत्तमस्थो व्रणवैकृतेन ॥२७॥
शत्र्वाश्रयस्थो रविजोऽष्टमस्थो
 मृत्युं विधत्ते हयपादघातात्
तस्यैव भागे करिणः प्रसङ्गात्
 मूलत्रिकोणे खरतः सकाशात् ॥२८॥
इति श्रीवृद्धयवने मृत्युस्थानचिन्ता ॥

26a. नीचोदितः BCILW 27b. मूर्तिं ABCISW, मतिं O
27c. पितृवैश्च मृत्युं IL, पटिकैरनेकै° G 28a कृत्वाश्रयस्थो C
28c तस्यैव भागे om. W 28d. परतः O col. श्री°
GIORU अष्टमभावकल्माणचिंता W U ends here
after col. W adds. संपूर्णा

धर्माश्रितो वासरपः स्वतुङ्गे
धर्मं नृणां तापसमेव धत्ते ।
तुङ्गांशसंस्थस्त्वथ दम्भदं च
षड्वर्गशुद्धस्त्वथ लज्जया च ॥१॥
नीचाश्रयस्थो दिनपस्तु धर्मे
धर्मेण हीनं जनयेन्मनुष्यम् ।
नीचांशकस्थश्च कुकर्मरक्तं
पापस्य वर्गे परधर्मरक्तम् ॥२॥
मित्राश्रयस्थो दिनपस्तु धर्मे
कौलोत्थधर्मं कुरुते नराणाम् ।
मित्रांशके नैकृतिकं तथैव
वर्गोत्तमस्थोऽतिलघुप्रमाणम् ॥३॥
शत्र्वाश्रयस्थो दिनपस्तु धर्मे
कृतघ्नधर्मं कुरुते नराणाम् ।
तदंशकस्थस्त्वथ चौरजं च
मूलत्रिकोणेऽतिसखोत्थमेव ॥४॥
चन्द्रः स्वतुङ्गे यदि धर्मसंस्थः
प्रसादधर्मं कुरुते नराणाम् ।
तदंशसंस्थश्च तडागजं च
षड्वर्गशुद्धो द्विज दानजं च ॥५॥

1b पापसमेव वि CIO, (तापसमेव वि R) पापजमेव S, पापमेव वि A, धानसमं वि° W, धागसमे वि° L, धायसमं वि° B
1c तुंगांशकस्थ° GLW   दम्भजं G, दम्भनं R, द A   2c. कुधर्मरक्तं GR   3b कौलोस्थ° AS, कौलोद्य° C, कोल्मोत्थ° I, कुलोत्थ° L, कीलोत्थ° G, 3c मित्रांशकेन BW, मित्रांशस्थ R
(3c स्वांशकस्थश्च प्रकरोति पुण्यं G)
नैकृतिकं BILORSW   4b. धर्मे कृतघ्नं S   4d वन्धोत्त° G
5b. प्रमाद° S, प्रासाद° LORW   दधाते G   5c °स्थस्तु G R
तडागं च S, तदंशसंस्थ G   5d. °दानानं C

॥६॥

मित्राश्रयस्थो हिमगुश्च धर्मे
धर्मं विधत्ते स्वकुटुंबदत्तं
तदंशके मित्रजनोत्थमेव
वर्गोत्तमस्थो ऽत्र समृद्धदं ॥७॥
शत्र्वाश्रयस्थो हिमगुश्च धर्मे
धर्मं प्रसूते विटपात्रदानात् ।
तदंशकस्थः प्रमदानुसङ्गात्
मूलत्रिकोणे बहुवित्तदानात् ॥८॥
भौमः स्वतुङ्गे यदि धर्मसंस्थो
धर्मं प्रसूते रणजं नराणाम् ।
तुङ्गांशकस्थः परसेवया च
षड्वर्गशुद्धो गुरुपोषणेन ॥९॥
नीचाश्रयस्थः क्षितिजस्तु धर्मे
धर्मं विधत्ते
तदंशकस्थः परदारलाभात्
पापस्य वर्गे जनतापरोधात् ॥१०॥
मित्राश्रयस्थः क्षितिजस्तु धर्मे
धर्मं विधत्ते सुहृदप्रकोपात् ।
तस्यैव भागे बहुकोपतश्च
वर्गोत्तमस्थः परसेवया च ॥११॥

7b °धीनात् BW, °धीमान् L 7d. समृद्धवं G, सकुटुंबं R 8a. शोच्याश्रयस्थो C 8c. प्रमदानुषंगान् GLORW 8c प्रमदा° — 10a नीचाश्रयस्थः om. I 9b रिणजं L 9c. परपोषणेन L 10b. वि°] न AS धनबंधनेन G 10d. जनतोप° SW °राधात् GLW 11b प्रसूते GR 11d परवेषया ABGIORS

शत्रु[illegible]: क्षितिजस्तु धर्मे
धर्मं विधत्ते न कदाचिदेव /
[illegible]ग्रकस्थः कवचौरपानां
मूलत्रिकोणे वणिताज्जितेन //१२//
धर्माश्रितः सोमसुतः स्वतुङ्गे
धर्मं विधत्ते वरशास्त्रज्ञानम् /
तदंशकस्थो द्विजदेवतानां
षड्गशुद्धा व्रतपालनेन //१३//
नीचाश्रयस्थः शशिजस्तु धर्मे
धर्मं प्रसूते कपटेन पुंसाम् /
तदंशकस्थः कुहकप्रयोगैः
पापस्य वर्गेऽथ छलेन नित्यम् //१४//
मित्राश्रयस्थः शशिजस्तु धर्मे
धर्मं प्रसूते गृहदानतश्च /
मित्रांशके तापसमेव नित्यं
करोतिमस्यो बहुवस्त्रदानात् //१५//
शत्र्वाश्रयस्थः शशिजस्तु धर्मे
धर्मं विधत्ते ऽत्रविवर्जितं च /
तस्यैव भागे गुरुलोकलाभात्
मूलत्रिकोणे बहुशान्त्यमेन //१६//

12a. शोभाश्रयस्थः C 12c. मनवोवचोपात् W, सततं च चौ॰ G, च बहुप्रकोपात् C, वचोपात् ABLORS 12d. वणिजा° I, वनिजा° OW at the end of f. 131v G adds:
अथ श्रीवृद्धयवने योगाध्यायमाह —
ज्ञानस्वैश्वर्यभाग् भोगी प्राज्ञो शान्तिसमान्वितः /
पंचमे वृषभे राशौ दत्ता भौमत्रसूर्यजैः //१//
तथा च //
विख्यातकीर्तिमान् भोगी पितृमातृसुहृद्युतः /
पंचमे वृषभस्थायी शनिभौमत्रसंयुते: //२//
अथान्ययोगमाह //
शाग्नि ३० संख्यामिते वर्षे यावत् साख्य ६० मिते सदा /
तावत् ९ राज्यात् फलं ज्ञेयं लग्नकर्मेशपंचमे इति //२//
32,13 – 33,2a om. G 13b. °शत्रुगीतं ABCILOSW
13d. ननपालनेन S 14a °स्तु om. L, च in marg. L[b], स्व° BCIW
14b. पुंजं AOS 14d नयतं बलेन C च]प्र° AB ILORSW 15b. गृह° I 15c तापज° R, नायस° S 16a शोभाश्रयस्थः [illegible]
16b त्रविनिर्जितं R 16c पुरलोक° S 16d बहुसान्त्व° R

धर्माश्रितो देवगुरुः स्वतुङ्गे
स धर्मं विधत्ते प्रचुरं सदैव ।
तदंशकस्थो गुरु...
बहुर्गशाद्‌दो द्रुतमेव पुंसाम् ॥१७॥

नीचस्थितो देवगुरुश्च धर्मे
जाते कृतकं नराणाम् ।
नीचांशकस्थो गुरुणानुरोधात्
पापस्य वर्गे बहुतीर्थसङ्गात् ॥१८॥

मित्राश्रयस्थः सुरराजमन्त्री
धर्मं विधत्ते बहुधर्ममार्गात् ।
मित्रांशकस्थो वनितामतेन
वर्गोत्तमस्थस्तनयानुसङ्गात् ॥१९॥

...त्राश्रयस्थः कुरुते सुरेज्यो
धर्मं नराणां सुनयेन धर्मम् ।
तदंशकस्थो गुरुपोषणेन
मूलत्रिकोणे घृणयानुरोधात् ॥२०॥

...कोच्चसंस्थो यदि धर्मसंस्थो
धर्मं प्रसूते वरदानजातम् ।
...त्रावजं तस्य विभागसंस्थः
बहुर्गशद्दः पितृतर्पणेन ॥२१॥

...से...योत्थं S 17d. द्रुतं CS, हृतं L, हृतं W 18a °श्च]
A...I LORSW 18c °नुरोधात् C, °नुरोधात् L, °नुसंगात्
18d °तीर्थयाके W 19b °दत्ते ब° om. W 19c.
...नितामितेन C 20b. सत्येन AS 20 मोषणेन R
...a धर्मसंस्थो om. A 21c वस्त्रास्त्रजं W त्रिभाग° L

नीचांशकस्थो भृगुजस्य धर्मे
    धर्मं प्रसूते परदेशसङ्गात् /
तद्द्रेकस्थो ऽध्वगलोकसङ्गाद्
    वर्गोत्तमस्थः सुसुखैरनेकैः ॥२२॥
मित्राश्रयस्थो भृगुजस्तु धर्मे
    धर्मं सुवाते ऽल्पफलं नराणाम् /
तस्यैव भागे च विनिश्रयेन
    पापस्य वर्गे परवञ्चनेन ॥२३॥
[illegible]त्वाश्रयस्थो भृगुजस्य धर्मे
    धर्मं प्रसूते परलोकसङ्गात् /
तद्द्रेकस्थो ऽरिनिषेवणेन
    मूलत्रिकोणे कृषिकर्मलाभात् ॥२४॥
शनैश्चरस्तुङ्गगतस्तु धर्मे
    धर्मं विधत्ते वयसि तृतीये /
तद्द्रेकस्थो ऽल्पतरं परं च
    षड्वर्गशुद्धस्त्वथ भक्तिबाह्यम् ॥२५॥
नीचाश्रितः सूर्यसुतस्तु धर्मे
    धर्मेण हीनं जनयेन्मनुष्यम् /
तद्द्रेकस्थः परधर्मरक्तं
    पापस्य वर्गे कवलोद्भवं च ॥२६॥

22 follows 23 in ABCILORSW   22a मित्राश्रयस्थो R   22c वंग° AS, ध्वंग° RW, ष्वंग° B, ग° L   22d सुसुखैंग्रकैः W, पुसुखै L   23a °स्तु] सु° BCILR, स्व° W

23c भावे विश्रये BLW, निविश्रमेण R   24b सुवाते C   24c रतिसेवनेन L   25b व्ययसि R   25c ल्पतरं O   परस्य ABCILORSW   26a °सुतस्य L   26b–27a om. S   26d कल्पोद्भवं C



मित्राश्रयस्थो ऽर्कसुतस्तु धर्मे
धर्मं विधत्ते सततं सुगर्हम् ।
तदंशकस्थस्त्वयज . . .
जगोत्तमस्थो नृपसेवया च ॥२७॥
शत्र्वाश्रयस्थो ऽर्कसुतस्तु धर्मे
कृच्छ्रेण धर्मं जनयेत् सुसूक्ष्मम् ।
तदंशकस्थः परदर्शनोत्थं
मूलत्रिकोणे गुरुलब्धमानात् ॥२८॥
इति श्रीवृद्धयवने धर्मस्थानचिन्ता ॥

27b. विधत्ते सततं] नराणां कुरुते R   सगर्हं R, सुलर्हं L
27c °स्थस्त्व जयं L, °स्थो ऽत्र जयं W   28a श्रयस्थो — 28d °णे om. AS   col. श्री° om. IOR   धर्मभावकल्पना W
after col. W adds संपूर्णं

कर्मांशगस्तीक्ष्णकरः स्वतुङ्गे
करोति कर्म व्रतकृत्यमेव ।
तदंशकस्थो बधबन्धजं च
षड्वर्गशुद्धः सकलं कलाजम् ॥१॥
नीचाश्रितस्तीक्ष्णकरोऽम्बरस्थो
नृणां विधत्ते बहुदासकर्म ।
तस्यैव भागे वणिजोद्भवं च
वर्गोत्तमस्थो वणिजप्रसूतम् ॥२॥
मित्राश्रयस्थो दिनकृत् ससंस्थः
करोति पुंसां कृषिजं च कर्म ।
मित्रस्य भागे कुनृपस्य सेवजं
पापस्य वर्गे बधबन्धजं सदा ॥३॥
शत्र्वाश्रयस्थो दिनपो नराणां
ददाति कर्माशुभमेव नित्यम् ।
तस्यैव भागे जनगर्हितं च
मूलत्रिकोणे खरसेवजं च ॥४॥
स्वांशाश्रितः शीतकरः स्वतुङ्गे
करोति कर्म प्रथितं नृलोके ।
तस्यैव भागे द्विजदेवजं च
षड्वर्गशुद्धो वरदानभाजम् ॥५॥

1b. करोति om. S कर्म] मर्त्यं L व्रतकृत्यमेव C, व्रतमेव मौर्ख्यं O, व्रतमेव तस्य W, व्रतसेवया च L, व्रतमेव ABIRS 1c. तदंशसंस्थो L बन्धजं व्रतस्य W order in R: 2a-b, 3c-d, 3a-b, 2c-d, 3a-d 2b बहुदारकर्म ABILOSW 2d. °प्रसूतं ABILORS, °प्रसूतं CW 4 before 3 in ABCILOSW 3 om. G (which has the same order as R) 3a सुसंस्थः BCILRW 3c मित्रांश° W, नीचस्य R 3d °बन्धनं ABCLW 4a विनये G 4b. ददाति G 4c भावे G 4d षर° R, पर° CG °सेवनं BCLW, °सेवया G 5a °करस्तु गे W 5b त्रिलोके G, च लोके RW 5c परदैवतं G, द्विजदैवतं IW 5d °दानमानं S

नीचाश्रितः शीतकरोऽम्बरस्थो
    ददाति कर्मातिसलज्जमेव ।
तस्यैव भागे क्रयविक्रयोत्थं
    पापस्य वर्गे व्यसनोद्भवं च ॥६॥
मित्राश्रयस्थो यदि शीतरश्मिः
    कर्माश्रितः कर्म ददाति सौम्यम् ।
तस्यैव भागे बहुशास्त्रभाजं
    कीर्तिमस्थो मखजं सदैव ॥७॥
शत्र्वाश्रयस्थोऽम्बरगो निशेशः
    कर्म प्रसूते सुतरां नृशंसम् ।
तस्यैव भागे वनितोद्भवं च
    मूलत्रिकोणे नृपदैत्यजातम् ॥८॥
भौमोऽम्बरस्थो यदि तुङ्गसंस्थो
    युद्धोद्भवं कर्म ददाति पुंसाम् ।
तस्यांशके द्यूतसमुद्भवं च
    षड्वर्गशुद्धः स्मरजं नितान्तम् ॥९॥
नीचाश्रितो भूतनयोऽम्बरस्थः
    कर्म प्रसूते परदारजातम् ।
तदंशकस्थो गणिकोद्भवं च
    पापस्य वर्गे द्युभवं सदैव ॥१०॥

6b ददाति CIW, om. C, दद्याति G °सलज्जवैव C, °सज्जवैव BIL, °संजंत्रैव W 6d. भागे G 7b. कर्म om. L दद्याति ABILORW, दद्याति G सौम्यं ABCILORSW 7c °शास्त्रजं च G 7d. मखजं om. L G ends with 8a शत्र्वाश्रयस्थो (end of f. 82) 8d °जालं LW 9b युक्तोद्भवं W 10a. स्नूत° B, स्तत° W, सुत° L 10c गणितोद्भवं L

मित्राश्रयस्थः क्षितिजो ऽम्बरस्थः
    कर्म प्रसूते ऽश्मसमुद्भवं च /
तस्यांशकस्थो बहुभारजातं
    वर्गोत्तमस्थः प्रणयेन हीनम् //११//
यात्राश्रयस्थः क्षितिजो नभोगः
    कर्म प्रसूते बहुदैन्यजातम् /
तस्यैव भागे त्वथ भिवजं च
    मूलत्रिकोणे ऽम्बरकाष्ठजातम् //१२//
सौम्यः स्वतुङ्गे यदि कर्मसंस्थः
    कर्म प्रसूते धनधान्यजातम् /
तस्यैव भागे च चतुष्पदोत्थं
    षड्वर्गशुद्धो गजवाजिजातम् //१३//
नीचाश्रितः सोमसुतो ऽम्बरस्थः
    कर्म प्रसूते निजमेव पुंसाम् /
तस्यैव भागे परदेशजातं
    पापस्य वर्गे खलजं सदैव //१४//
मित्राश्रयस्थः शशिजो ऽम्बरस्थः
    कर्म प्रसूते ह्यविक्रयोत्थम् /
तस्यैव भागे रजतं नराणां
    वर्गोत्तमस्थो ऽद्भुतामित्रजातम् //१५//

12a चरस्थः L   12b. °दैन्यभाज W   12d. °कष्ठजातं CIW
13d. °वाजिजं च R   for 14b R has 15b   14c–15b om
14d. स्वतजं S   for 15b R has 14b   15d. °मंत्रजं च R

शत्र्वाश्रयस्थः शशिजो ऽम्बरस्थः
    कर्म प्रसूते बहुकष्टजातम् ।
तस्यैव भागे गुणवर्जितं च
    मूलत्रिकोणे सयशोद्भवं च ॥१६॥
जीवो ऽम्बरस्थो यदि तुङ्गसंस्थो
    ददाति कर्म प्रचुरं प्रधानम् ।
तद्द्व्यंशकस्थो द्विजपूजनोत्थं
    षड्वर्गशुद्धः सुजनार्चनोत्थम् ॥१७॥
नीचाश्रितो देवगुरुः खसंस्थः
    करोति कर्माधमलोकसेव्यम् ।
तद्द्व्यंशकस्थो ऽद्भुतचौर्यजातं
    पापस्य वर्गे ऽर्थविवर्जितं च ॥१८॥
मित्राश्रयस्थो दशमे सुरेज्यः
    करोति कर्माणि शुभानि नित्यम् ।
तद्द्व्यंशसंस्थो नृपतेः समुत्थं
    वर्गोत्तमस्थो महिषीगणोत्थम् ॥१९॥
शत्र्वाश्रयस्थो दशमे सुरेज्यः
    कर्म प्रसूते सततं कृतघ्नम् ।
तस्यैव भागे परवंचनेन
    मूलत्रिकोणे नृपतेरभीष्टम् ॥२०॥

16d. °त्रिकोणेषु यशो° AOR, °त्रिकोणेषु यथो° BCIW, °त्रिकोणे सुयशो° L   17c. द्विजनोत्थं I, द्विजदेवपूज्यो W   18-19 om. O
18b कर्म S   °धनलोक° ABCILRSW   18c. तद्द्व्यंशसंस्थो R
9a दशमः IR

तुङ्गाश्रयस्थो ऽम्बरगो भृगुज्ञ
कर्म प्रसूते जनवल्लभं च /
तस्यैव भागे मणिमौक्तिकाढ्यं
षड्वर्गशुद्धः कनकोद्भवं च //२१//
नीचाश्रयस्थः भृगुजः ससंस्थः
कर्म प्रसूते वनिताश्रितं च /
तस्यैव भागे ऽल्पसुखं नितान्तं
पापस्य वर्गे शुद्धः खजं च //२२//
मित्राश्रयस्थो भृगुजो ऽम्बरस्थः
करोति कर्म प्रभुतासमेतम् /
तस्यैव भागे निजबन्धुजातं
वर्गोत्तमस्थो बहुगौरवाढ्यम् //२३//
शत्र्वाश्रयस्थो भृगुजो ऽम्बरस्थः
कर्म प्रसूते विरजं नृशंसम् /
तस्यैव भागे बहुभिन्नयाढ्यं
मूलत्रिकोणे ऽनृतसंयुतं च //२४//
तुङ्गाश्रितः सूर्यसुतो ऽम्बरस्थः
कर्म प्रसूते ऽतिमृदुस्थिरं च /
तस्यैव भागे बहुशिल्पजं च
षड्वर्गशुद्धः प्रियसाध्वसं च //२५//

21a भृगुजो बरस्थः R 21d. कतयो॰ BR, कुनयो॰ LW, सुतयो॰ AIOS
22a भृगुजः ससंस्थः om. A, सित एव संस्थः BCIORSW, भृगुजो ऽजरस्थः L 22b–23a om. L 22c. व्यसनं ABIOW, च सुखं S नितापं W 23b मृत्यं B, भर्त्यं CLW 23b–24a in marg. C
23c भागे om. W 24b. निरजं C, चिरजं W, निरतं R 24c. ॰चित्तवाढ्यं W 24d. भृत॰ R 25c. ॰शिल्पिजं ABILS,

नीचाश्रितः सूर्यसुतो ऽम्बरस्थः
   कर्म प्रसूते द्विजद्रोहजातम् ।
तस्यैव भागे नृपसेवजं च
   पापस्य वर्गे सनृशंसरूपम् ॥२६॥
मित्राश्रितो भास्करजश्च सस्थः
   करोति कर्म प्रभुताविहीनम् ।
[तस्यैव भागे नृपसेवजं च]
   वर्गोत्तमस्थो मृगया समेतम् ॥२७॥
शत्र्वाश्रयस्थो ऽर्कसुतो ऽम्बरस्थः
   कर्म प्रसूते बहुकष्टजातम् ।
तस्यैव भागे परपैशुनोत्थं
   मूलत्रिकोणे भिषजोद्भवं च ॥२८॥
इति श्रीवृद्धयवने कर्मस्थानचिन्ता ॥

26b. द्विजद्रोह° W   26d सकृशांस° A, सवृशांस° S, नृशंस° C
27a °जः स्व° CRW   सस्थः] तुंगे ABCIORSW, तुंगसस्थः L
27b कर्म प्रभुतावि° om. AS   27c = 26c   27c भानसेवजं R
27d. समुत्थं R   28b °कष्टभाजं S, °काष्ठभाजं L   28c. रमे श्रुतोत्थं W   28d. भिषजोत्सवं R   col. श्री° om. IOR
कर्मभाव W   after col. W adds संपूर्णः

ला… शीतकरः स्वतुङ्गे
लाभं विधत्ते गजवाजिजं च ।
तस्यैव भागे महिषीसमुत्थं
षड्वर्गशुद्धः कनकोद्भवं च ॥१॥
नीचाश्रितो वासरपस्तु लाभे
लाभं विधत्ते जलपादपानाम् ।
तस्यैव भागे च कुधान्यकानां
पापस्य वर्गे परयोषितां च ॥२॥
मित्राश्रयस्थो दिनपस्तु लाभे
लाभं प्रसूते सुहृदां सदैव ।
मित्रांशकस्थः कलयोषितानां
…गोत्तमस्य … प्रवरार्यकाणाम् ॥३॥
शत्र्वाश्रयस्थो दि… कृच्च लाभे
लाभं प्रसूते रथकम्बलानाम् ।
तदंशकस्थः खलमानवानां
मूलत्रिकोणे गुणिनां नितान्तम् ॥४॥
लाभाश्रितः शीतकरः स्वतुङ्गे
लाभं विधत्ते मणिमौक्तिकानाम् ।
तस्यैव भागे द्रविणान्नकानां
षड्वर्गशुद्धः प्रियमानुषाणाम् ॥५॥

1b. गत° ABS °वाजिनं ABCOR, °वाजिनां LW 1c. महिषीगजोत्थं R
2a °पः प्रसूते R 2b. जलपादपानं ABCO, जलपादपानात् W, जलपादजानां L, जलपानयानं S, ज–पदकानां R 3b. सुदयां B 3c. मित्राश्रयस्थः O 4a. दिनकृत्तु R 4b. °कांचनानां S, °केम्बलानां W 4c. खलु CO 5d. °मानुषाणां S

नीचाश्रयस्थो हिमगुश्च लाभे
लाभं प्रसूते कुकलत्रकाणाम् ।
तदंशकस्थस्तु सुसेवकानां
पापस्य वर्गे परपैशुनानाम् ॥६॥
मित्राश्रयस्थो हिमगुश्च लाभे
लाभं विधत्ते बहुबान्धवानाम् ।
तस्यैव भागे नटनर्तकानां
वर्गोत्तमस्थः प्रवरार्थकानाम् ॥७॥
शत्र्वाश्रयस्थो हिमगुश्च लाभे
लाभं प्रसूते बहुकन्दजानाम् ।
तदंशकस्थो हि महीरुहाणां
मूलत्रिकोणे क्षितिभृद्गृहाणाम् ॥८॥
भौमः स्वतुङ्गे यदि लाभसंस्थो
लाभं विधत्ते च चतुष्पदानाम् ।
तस्यैव भागेऽत्र सुभद्रकाणां
षड्वर्गशुद्धो नृपमण्डलानाम् ॥९॥
लाभाश्रितो भूतनयस्तु नीचे
लाभं विधत्ते बहुचौर्यजातम् ।
तस्यैव भागे बहुवंचनोत्थं
पापस्य वर्गे वधबन्धजातम् ॥१०॥

6b. कुलत्रकाणां AS 6c. कुसेवकानां R 7b. सुवाते BR °बांधवानां ABR 7c. नट° AC, नय° BW 7d. प्रवरार्थपानां R 8b. विधत्ते L, सुवाते R 9c. त्र° LOW, च S सुभक्ष्यकाणां R 9d. °मंडनानां A, °पंडितानां S, °सज्जनानां I 10b. प्रसूते R

[illegible]ाश्रयस्य: क्षितिजस्तु लाभे
लाभं विधत्ते नृपलोकजातम् /
तद्द्रेकस्थस्तु महाधनोत्थं
वर्गोत्तमस्थो ह्युभयं सदैव //११//

स्वोच्चाश्रयस्य: क्षितिजस्तु लाभे
लाभं सुधत्ते बहुवैनकानाम् /
तस्यैव भागे पतर्ककानां
मूलत्रिकोणे ऽद्भुतभूषणानाम् //१२//

सौम्य: स्वतुङ्गे यदि लाभसंस्थो
लाभं सुधत्ते बहुशास्त्रजातम् /
तस्यैव भागे विविधैरुपायै:
षड्वर्गशुद्धस्त्वथ † सर्वविद्याम् //१३//

लाभाश्रित: सोमसुतस्तु नीचे
लाभं विधत्ते बहुनीचसङ्गात् /
तस्यैव भागे कृतकानुसङ्गात्
पापस्य वर्गे ऽन्त्यजलोकपार्श्वात् //१४//

मित्राश्रयस्य: शशिजस्तु लाभे
लाभं विधत्ते वरलोकजातम् /
तस्यैव भागे निजविद्ययातो
वर्गोत्तमस्थो व्यवहारतश्च //१५//

11d. त्युभयं BLW, तूभयं S, उभयं R 12b. °कांमनानां L
12c. °तर्कजानां BCL, °तर्कजातं I, तर्कुजानां OR, °कुजानां AS
13b. °शस्त्रजातं L 13d. सार्वविद्यां OW, सार्वविद्यं IL
14c. कृतवानु° ILORW, कृतयानु° S for 15b C has 16b
15c. °विद्यमानो BW

शत्र्वाश्रयस्थः शशिजस्तु लाभे
    करोति लाभं वितथोपचारात् ।
तस्यैव भागे कपटैरनेकै-
    र्मूलत्रिकोणे क्रयविक्रयाभ्याम् ॥१६॥
जीवः स्वतुङ्गे यदि लाभसंस्थो
    नरेन्द्रलाभं कुरुते नराणाम् ।
तस्यैव भागे नृपसेवकानां
    चतुर्गृहद्धः प्रसरप्रभावात् ॥१७॥
नीचाश्रितो देवगुरुश्च लाभे
    लाभं नराणां कुरुते धनं च ।
नीचांशकस्थो भृतकाह्वयानां
    पापस्य वर्गे बहुकष्टतश्च ॥१८॥
मित्राश्रयस्थः कुरुते सुरेज्यो
    लाभं च लाभे स्वजनोद्भवं च ।
स्वस्यांशकस्थो बहुधातुजातं
    वर्गोत्तमस्थः सुजनोद्भवं च ॥१९॥
शत्र्वाश्रयस्थः कुरुते सुरेज्यो
    लाभं च लाभे पुरुषाधमानाम् ।
तस्यैव भागे गुणवर्जितानां
    मूलत्रिकोणे विविध[illegible]जानाम् [illegible]॥

17d प्रभुरस्वभावात् O   18b. धर्मं R   18c. भृतकाह्वनानां K, भृतकाह्वमानां BLW   19b. लाभे च लाभं W   19c. बहुधातुजातं S   20b लाभे च लाभं R   20d. [illegible] विविधात्मजानां C, विविधाजनानां L, विविधानां ABIORS, धनलाभमग्रं W

शुक्रः स्वतुङ्गे यदि लाभसंस्थो
लाभं सुवाते सुतबान्धवोत्थम् /
तस्याथकस्थो नृपकन्यकोत्थं
षड्वर्गशुद्धो द्वितयस्य चास्य //२१//
नीचाश्रयस्थो भृगुजस्तु लाभे
लाभं विधत्ते च कुपत्रकानाम् /
तद्व्यत्रकस्थस्तु कुबद्धिकानां
पापस्य वर्गे द्विजनिन्दितानाम् //२२//
मित्राश्रयस्थो भृगुजस्तु लाभे
करोति लाभं नरवाहनानाम् /
तस्यैव भागे वरसुन्दरीणां
वर्गो : प्रियदर्शनानाम् //२३//
श्रयस्थो भृगुजश्च लाभे
करोति लाभं हृतबान्धवानाम् /
तस्यैव भागे गतसौहृदानां
मूलत्रिकोणे सुखिनां सदैव //२४//
सौरोच्चसंस्थो यदि लाभसंस्थो
लाभं विधत्ते पुरुषोत्तमानाम् /
तस्यैव भागे धनधान्यकानां
वर्गोत्तमस्थः प्रवराचितानाम् //२५//

21d द्वितीयस्य CLOW चास्य CL 22b कुपुत्रकानां BCL, कुपत्रयकानां W 22c. कुट्टिबकानां AS, कुबिद्धिकानां BLW, कुट्टिकानां R 22d. द्विजनंदितानां BLW 23b-24. BLW 24a °जस्तु S 24b. हृतवाहनानां S 24d सुहृदां L 25a सौरोच्चसंस्थो BW for 25b L has 26b for 25d C has 26d 25d प्रवरोपितानां S, प्रभुराचितानां

[illegible]: [illegible]स्तु लाभे
लाभं विधत्ते बहु[illegible]कानाम् ।
[illegible] भागे [illegible]हितानां
[illegible] मतिव[illegible]नानाम् ॥२६॥
मित्रात्मजस्थो ऽर्कसुतस्तु लाभे
लाभं विधत्ते बहुमित्रजातम् ।
तस्यैव भागे वनितासमुत्थं
वर्गोत्तमस्थः शुभवर्गलाभम् ॥२७॥
शत्र्वात्मयस्थो ऽर्कसुतस्तु लाभे
लाभं विधत्ते बहुवित्तजं च ।
तस्यैव भागे कृमिजं सदैव
त्रिकोणे स्थिरभूमिजातम् ॥२८॥
इति श्री लाभस्थानचिन्ता ॥

after 26b L repeats 25d 27a [illegible] L लाभे om. W 27b–28a om. AS 27d °[illegible]नानां R 28a कैसुतस्तु I 28d च om. R for 28c–d LW have 27c–d 28c कृतैः R col. श्री° om. IORS लाभस्थान W after col. W has संपूर्णः

व्ययस्थितो वा स्वगृहः स्वतुङ्गे
 व्ययं विधत्ते गुरुलोकसङ्गात् /
तस्यैव भागे गुरुसेवकानां
 षड्वर्गशुद्धो द्विजदेवकार्यात् //1//
नीचाश्रयस्थो व्ययगो दिनेशो
 व्ययं प्रसूते कुजनात् कुसङ्गात् /
तस्यैव भागे वनितानिरोधाद्
 वर्गोत्तमस्थो नृपसङ्गमाच्च //2//
मित्राश्रयस्थो व्ययगो दिनेशो
 व्ययं विधत्ते बहुमित्रकार्यैः /
तस्यैव भागे कुकलत्रतश्च
 पापस्य वर्गेऽन्त्यजकारणेन //3//
शत्र्वाश्रयस्थो व्ययगो दिनेशो
 व्ययं विधत्ते गणिकानुसङ्गात्
तस्यैव भागे कुजनानुरागान्
 मूलत्रिकोणे जनतः सदैव //4//
चन्द्रो व्ययस्थो यदि तुङ्गसंस्थो
 व्ययं प्रसूते ऽश्वविदेवनेन /
तस्यैव भागे क्रयविक्रयाभ्यां
 षड्वर्गशुद्धो द्विजसेवनाच्च //5//

1a °परस्तुङ्गे W   1c–2b om. I   5) order in R: 2a–b, 3c–d, 3a–b, 2c–d; order in BL: 2a, 3c–d, 2b (कुजनात् कुसंगात्), 3c–d, 3a–b   for 2b W has 3b (प्रसूते)   2b विधत्ते R
2c °विरोधात् S, नुरोधात् LW   3a दिनगो व्ययस्थो R
3b प्रसूते R   4c कुलजा BLRW   4d जनयः ABILW, जनये: C, तनयः ORS   5d °सेवनेन C, °सेवया च L

नीचाश्रयस्य: शशभृद्व्ययस्थो
 व्ययं प्रसूते परमारिसङ्गात् ।
तस्यैव भागे परलोकसङ्गात्
 पापस्य वर्गे बहुपापतश्च ॥६॥
मित्राश्रयस्थो व्ययगः शशाङ्को
 व्ययं विधत्ते सुहृदां प्रसङ्गात् ।
तस्यैव भागे निजबन्धुमानाद्
 वर्गोत्तमस्थः प्रियसङ्गमाच्च ॥७॥
शत्र्वाश्रयस्थो व्ययगः शशाङ्को
 व्ययं विधत्ते रिपुलोकतश्च ।
तस्यैव भागे बहुधा च सर्वं
 मूलत्रिकोणे निजबन्धुतश्च ॥८॥
भौमो व्ययस्थो यदि तुङ्गसंस्थो
 व्ययं विधत्ते रणजैर्विकारैः ।
तस्यैव भागे परवंचनेन
 षड्वर्गशुद्धो रणजाद्विकारात् ॥९॥
नीचाश्रयस्थः क्षितिजो व्ययस्थो
 व्ययं विधत्ते ऽन्त्यजलोकसङ्गात् ।
तस्यैव भागे व्यसनैरनेकैः
 पापस्य वर्गे मलसङ्गमेन ॥१०॥

6a शशभृद्व्ययस्थो om. BW, हिमगुर्नृपाणां L 6b. नरमादि° W, परनारि° O 6c. परमारि° ABILORW, परनारी° S 6d. पापस्य — बहु° om. A बहु] मल S 7b–8a om. B 9a यदि] निज° S for 9b L has 10b 9d. रिपुजा° R 10a. नीचाश्रितस्य: R

मित्राश्रयस्थः क्षितिजो व्ययस्थो
व्ययं सुबाते वितथं नराणाम् ।
तस्यैव भागे पितृकर्मजातं
वर्गोत्तमस्थः सुहृदानुरागात् ॥११॥
शत्र्वाश्रयस्थः क्षितिजो व्ययस्थो
सुबाते च चतुष्पदोत्थम् ।
तस्यैव भागे बहुरागत
मूलत्रिकोणे वरबन्दिजस्य ॥१२॥
सौम्यो व्ययस्थो यदि तुङ्गसंस्थो
व्ययं विधत्ते बहुगीतवाद्यैः ।
तस्यैव भागे गुणिनां प्रसङ्गात्
षड्वर्गशुद्धो ऽग्निपरिग्रहेण ॥१३॥
नीचाश्रयस्थो व्ययगश्च सौम्यो
व्ययं प्रसूते धनसङ्क्रमेण ।
तस्यैव भागे ऽधमलोकजातं
पापस्य वर्गे नृपलोकदानात् ॥१४॥
मित्राश्रयस्थः शशिजो व्ययस्थो
व्ययं सुबाते बहुमित्रसङ्गात् ।
तस्यैव भागे निजबान्धवानां
वर्गोत्तमस्थो व्रतिनां सदैव ॥१५॥

11b विनतं I 11d. °नुरोधात् R 12a क्षितिजो व्ययस्थो ° S 12b च om. W चतुष्पदोष्मलाभं W 13c प्रसंगे: R 14c धर्मलोक° L, धनलोक° CS, धरमभोग° W 14d. नृपभोगदानात् W for 15a-b W has 7a-b 15d. व्रतिनं L

ग्रन्थाश्रयस्य: शशिजो व्ययस्थो
    व्ययं सवाते सुतजं सदैव /
तस्यैव भागे सुतदारजं च
    मूलत्रिकोणे वरभोगतश्च //१६//
जातो व्ययस्थो यदि तुङ्गसंस्थो
    व्ययं प्रसूते गुरुलोकदानात् /
तस्यैव भागे गुरुसेवकानां
    बहुगेयुक्तो निजबान्धवानाम् //१७//
नीचाश्रितो देवगुरुर्व्ययस्थो
    व्ययं सवाते व्यवहारजातम् /
तस्यैव भागे तु कुसीदजातं
    पापस्य वर्गे वणिजोत्थमेव //१८//
मित्राश्रयस्थो व्ययगः सुरे
    व्ययं निधत्ते परवादतश्च /
तस्यैव भागे परदेशसङ्गाद्
    वर्गोत्तमस्थः प्रणयानुरोधात् //१९//
शत्रुगाश्रयस्थो व्ययगः सुरेज्यो
    व्ययं सवाते व्यसनैर्विचित्रैः /
तस्यैव भागे मातिविभ्रमेण
    मूलत्रिकोणे सुरतोपरोधात् //२०//

16b. प्रसूते R 18b-c °जातं तस्यैव om. BLW 18b.°जं च I
18c तु om. W कुसील° C 19c वरदेश° BL 20b.
व्यसनैः समेतं C 20d. सुतनो° R °पराधात् CL

शुक्रो व्ययस्थो यदि तुङ्गसंस्थो
व्ययं प्रसूते व्रतजैर्विकारैः ।
तस्यैव भागे बहुशास्त्ररागात्
षड्वर्गशुद्धः प्रियसङ्गमेन ॥२१॥
नीचाश्रयस्थो भृगुजो व्ययस्थो
व्ययं विधत्ते नृपलोकसङ्गात् ।
तस्यैव भागे पररोषतश्च
पापस्य वर्गे द्युतश्च नित्यम् ॥२२॥
मित्राश्रयस्थो भृगुजो व्ययस्थो
व्ययं विधत्ते बहुभक्षणेन ।
तस्यैव भागे बहुपानयोगाद्
वर्गोत्तमस्थः क्षितिजैर्विकारैः ॥२३॥
शत्र्वाश्रयस्थो भृगुजो व्ययस्थो
व्ययं प्रसूते रणकर्मयोगात् ।
तस्यैव भागे जनविप्लवेन
मूलत्रिकोणे वितथोपचारैः ॥२४॥
मन्दो व्ययस्थो यदि तुङ्गसंस्थो
व्ययं सुवाते ऽधर्मकर्मजातम् ।
तस्यैव भागे ऽधर्ममित्रसङ्गात्
षड्वर्गशुद्धो निजबन्धुदोषात् ॥२५॥

21c. °रोगात् B 22a नीचाश्रितो भास्करजो R
22c—24b om. L, in marg. L^v 22c परदोषत L^v
23b प्रसूते S 23c बहुपाप° L^v 23d. भृगुजोक्षिते बा W
24b व्ययं] रणं R 24c. °विष्णवेन CO, °विप्लवेन W, °निंदनेन S, °बिदन A 25b धर्मकर्म° CIS 25c धर्ममित्र° LO, मित्र° CSW, मधामित्र° ABIR

नीचाश्रितः सूर्यसुतो व्ययस्थो
    व्ययं प्रसूते ऽन्त्यजमानतश्च /
तस्यैव भागे ऽद्भुतवादसङ्गात्
    पापस्य वर्गे निजबन्धनेन //२६//
मित्राश्रयस्थो रविजः प्रसूते
    व्ययं विधत्ते बहुमित्ररोधात् /
तस्यैव भागे सुहृदासदोषाद्
    वर्गोत्तमस्थः प्रणयप्रकोपात् //२७//
शत्र्वाश्रयस्थो ऽर्कसुतो व्ययस्थो
    व्ययं सुवाते करणानुरोधात् /
तस्यैव भागे बहुलौल्यदोषान्
    मूलत्रिकोणे प्रियसङ्गमाच्च //२८//
इति श्रीवृद्धयवने व्ययस्थानचिन्ता //

26a सूर्य° om. L, add. L², सोम° BRW   26c द्भुतपाप W
27b. व्ययं व्ययं मित्रविरोधतश्च R   27c ' L
28b करुणा° L   28c °लौल्यमोषान् R   col. श्री° om. IOR
व्ययस्थान W   after col. W adds ? र्णि:

लग्ने ऽर्कदृष्टे सुनृशंसचेष्टो
    भवेन्मनुष्यः परुषस्वभावः ।
सदाभिमानी नतिधर्मसंस्थो
    रुजान्वितो द्वेषरतः सुभीतः ॥१॥
चन्द्रेक्षिते धर्मपरो मनुष्यो
    भवेद्विलग्ने वरयानभोगी ।
स्त्रीभोगभोगी प्रभया समेतः
    प्रियंवदः शास्त्रकलानुरक्तः ॥२॥
कुजेक्षिते श्लेष्मविकारदोषैः
    संपीड्यते रक्तसमुद्भवैश्च ।
लग्ने मनुष्यः परिभूतदेहः
    सदातुरस्त्राससमन्वितश्च ॥३॥
बुधेन दृष्टे सुरसत्यभागी
    भवेन्नरः सत्यपरः सुशीलः ।
नरेन्द्रपूज्यः प्रथितः पृथिव्यां
    प्रियंवदो दानपरो ऽल्पकायः ॥४॥
लग्ने सुरेज्येन विलोकिते च
    भवेन्नरो रत्नगजाश्वभाजः ।
नानार्थलाभैः सहितः प्रगल्भः
    प्रधानसेव्यो द्विजदेवभक्तः ॥५॥

1a लग्ने यदिदृष्टे सुदृशंससचेष्टो I   1b. पुरुष° ACW   -- .... S ABCIOSW   1c नैनधर्मवृत्तो R   1d कुजान्वितो I   द्वेषयुतः सुनीकः R   2b. वरयान° I   °भागी CR   2c च भया I   3c परिलून° W   3d °स्त्रीकृतरोगदेहः C   4a °भोगी W   4b सुशीलः — 4c प्रसन्नः in marg. R   4c. प्रथितः] सुभगो C   पृथिव्यां] प्रसन्नः R   4d. ल्पकोपः AS, ल्पकायः LW   5a च] न ABCILOSW   5b. °भाजी R, °भाजनं ABCIOSW

शुक्रेक्षिते सत्यपरो मनुष्यो
 भवेन्नरः पुण्यपरः कृतज्ञः ।
मज्वा विवेकी सुदृढप्रतापी
 हन्ता विपक्षः प्रणतः प्रसन्नः ॥६॥
सौरेण दृष्टे ऽल्पसुखो विलग्ने
 भवेन्मनुष्यो भयसङ्कुलात्मा ।
रोगान्वितः स्वल्पसु
 नीचानुरक्तः सततं कृतघ्नः ॥७॥
इति श्रीवृद्धयवने लग्नदर्शनचारः ॥

6b. कृतघ्नः L, कृतज्ञः I 6c. यज्वा R, यद्वा W 6d हन्तारिपक्षः IS प्रसन्नः] प्रगल्भः C 7a. ल्पसुखं I, त्यसुखो AC
7b भय°] तप° BCILORW 7c. रोगान्वितः C सत्यसुतो I
col. श्रीवृद्धयवने om. R श्री° om. I लग्न° om. S

सूर्यं विना राशि[illegible]र्व्ययस्थो
    यदा ग्रहः स्याद्बहवोऽथवा स्युः ।
स्यानामथ द्वौ त्वनफाख्ययोग
    उत्पद्यते स्वगुणप्रमाणः ॥१॥
भौमे व्ययस्थे शशिनः प्रमत्तो
    भवेन्मनुष्यः परवित्तहारी ।
[illegible]ा परेषामतिपुष्टकायः
    शौर्यान्वितः प्राणधरो गुरुश्च ॥२॥
चन्द्रस्य सौम्ये व्ययगे प्रसन्नो
    विद्याधिकः शास्त्रपरः सदैव ।
विभुः प्रतापी प्रम[illegible]नुकूलः
    प्रभूतमित्रः प्रणतारिपक्षः ॥३॥
चन्द्रस्य जीवे व्ययगे विनीतो
    नरो भवेद्धर्मपरः कृतज्ञः ।
प्रभावयुक्तो ललनास्वभीष्टः
    सुरूपकायो नृपवल्लभश्च ॥४॥
शुक्रे व्ययस्थे शशिनो निरीहो
    गुणप्रधानः प्रणयेन हृष्टः ।
भवेन्मनुष्यः सुरतानुकूलः
    प्रियंवदः कामविशारदश्च ॥५॥

1d. भूरिगुण° C, स्वगुण° R °प्रमाणे: W 2c °पुष्टि° O °कायो L 3a सौम्यो व्ययगः IO 3c °नुरक्तः L 5b हृष्टः ABCLW

करोति चन्द्राद्व्ययगो ऽर्कपुत्रो
नरं नितान्तं प्रकटस्वभावम् ।
स्थूलं प्रभूताभरणैः समेतं
जितारिपक्षं क्षमयान्वितं च ॥६॥

व्ययस्थितौ रात्रिपतेर्व — भौमौ
नरं प्रसूते प्रणतं सुरूपम् ।
पितृप्रहीनं सुतमित्रयुक्तं
नयानुरक्तं प्रियसङ्गमं च ॥७॥

जीवावनेयौ कुरुतो मनुष्यं
व्ययस्थितौ रात्रिपतेः प्रगल्भम् ।
सुवाग्मिसारं जितशत्रुसंघं
नतं गुरूणां सततं विधिज्ञम् ॥८॥

सौरावनेयौ दधतो मनुष्यं
व्ययाश्रितौ वै नृपतेः खलारिम् ।
प्रभूतकोशं सुतसत्ययुक्तं
विनीतवेषाभरणं सदैव ॥९॥

चन्द्राद्व्ययस्थौ यदि जीवसौम्यौ
नरं दधाते प्रथितं नृलोके ।
दयाधिकं शास्त्रकथानुरक्तं
सुसंमतं साधुजनस्य नित्यम् ॥१०॥

7a °र्वेयुक्तौ ABCILORSW
6a °येयाभ्ययगो S 7b स्वरूपं LW 7c सुतवित्त° S
9a. शूरं ऽनेयं ABCORS, वरं ऽनेयं W, शूनं ऽनेयं I
9b. व्ययास्थितौ L वै] येन् LR 9c प्रभूतकायं W 10a °शुक्रसौम्यौ O
After 9d W adds: पीडाकरं नेत्रविकारतां च
10b दधाते W, दधाति ABCIOR पूजितं L, ख्यापितं ABCIORW, स्थापितं S 10d सुपूजितं S

चन्द्राश्रयस्थौ यदि शुक्रसौम्यौ
नरं दधाते प्रियविप्रकृत्यम् /
स्वदाररक्तं नृपमानभाजं
जितेन्द्रियं शौचपरं सुचित्रम् //११//

चन्द्राश्रयस्थौ यदि सौरसौम्यौ
नरं प्रसूते प्रभुतासमेतम् /
प्रभूतमित्रं प्रथिताभिमानं
गुणाधिकं देवगुरुप्रभक्तम् //१२//

चन्द्राश्रयस्थौ यदि जीवशुक्रौ
नरं प्रसूते ऽद्भुतरूपगात्रम् /
कुलानुरक्तं पितृमातृभक्तं
शास्त्रप्रियं प्राणभृतां वरिष्ठम् //१३//

चन्द्राश्रयस्थौ यदि जीवसौरौ
नरं दधाते सुतवित्ततुष्टम् /
गुणानुरक्तं नृपकार्यदक्षं
विनीतवाक्यं रणकोविदं च //१४//

चन्द्राश्रयस्थौ यदि शुक्रसौरौ
नरं प्रसूते स्थिरतासमेतम् /
प्रभूतदारं गतरोगवित्तं
महाव्ययं शास्त्रपरं सदैव //१५//

11b दधान: ABIORS, विधत्ते C   प्रियवि॰ प्रथितं C   °प्रकल्पं: 11c सदार° W   11d. शुचित्वं S, सुचित्वं IC, सुभक्तं W   13 after 14 in L   14 after 15 in O   14a यदि om. W   14b जयं ABCILORSW   दधान: ABCIORS, विधत्ते L   14c नृपकार्य° BI   14d नयकोविदं L   15b. स्थिरभा° IRW, धारभा° C   15c °दानं LW   गतगौरवं तं L   after 15 L adds इति द्विनिकल्पः

जीवारसौम्या व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युः प्रणतं मनुष्यम् /
नृपप्रियं सर्वकुलप्रधानं
प्रजाधिकं कीर्तिसमन्वितं च //१६//
शुक्रारसौम्या व्ययगा यदा स्युः
कुर्युर्नरं सत्यपरं दयालुम् /
हस्त्यश्वयानासनभोजनाढ्यं
विहीनशत्रुं गुणसङ्ग्रहं च //१७//
सौरारसौम्या व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युर्दृढतासमेतम् /
नरं प्रशस्तं नितरां प्रगल्भं
ख्यातं प्रियं बान्धववल्लभं च //१८//
शुक्रारजीवा व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युर्धृतिनं मनुष्यम् /
मातापितृभ्यां प्रणतं च शूरं
नीरोगदेहं नृपतेरभीष्टम् //१९//
सौरारजीवा व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युः कृपया समेतम् /
नरं सतां प्रीतिकरं विचित्रं
प्रभूतसस्यं द्रविणं सुसत्यम् //२०//

17c. °वाशन° R °योजनाढ्यं W 18c. प्रसस्यं IRW, प्रसूते C, नृशंसं L 18d. प्रियं] प्रभुं R 19b–20a om. BCILW 19b कुर्यु om. AOS वृतिनं ARS, वृत्तिं सुखिनं O मनुष्यं] समेतं S 20b सुरभ्यं C, सुरत्यं ILW, सुरम्यं B

सौरारशुक्रा व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युः सुभगं मनुष्यम् /
सच्चानुरक्तं हयवाहनेत्रं
प्रभूतकीर्तिं सुतरां सुरूपम् //21//
शुक्रज्ञजीवा व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युः सुतल्पालसं च /
नरं सदा दानपरं हयाढ्यं
प्रियातिथिं सर्वसमं सुसत्यम् //22//
सौरज्ञजीवा व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युः प्रवरं मनुष्यम् /
रोगैर्विहीनं शुभचक्षुःश्रोत्रं
नानायुधानां प्रविचक्षणं च //23//
सौरज्ञशुक्रा व्ययगा यदा स्यु-
श्चन्द्रस्य कुर्युर्विनयप्रधानम् /
नरेन्द्रयानं विविधान्नपानं
भोगान्वितं सर्वकलासु दक्षम् //24//
सुरेज्यशुक्रार्कसुता व्ययस्थाः
कुर्युर्नरं भूरिधनं विनीतम् /
प्रियान्वितं प्राणपरं सलज्जं
जितेन्द्रियं विप्रपरं नयज्ञम् //25//

21b मनुष्यं corr. to मनोज्ञं R 22c पानपरं S 22d ह्रियाº BW ससत्यं R 23a सौरारजीवा C 23c ºचक्षुर्नेत्रं L 23d नानासुधानां L for 24a C has 25a 24a सौरज्ञजीवा ABILORW, शुक्रार्किजीवा S 24c नरं प्रहृष्टं R 25 om. BCLW 25c सुजन्नं AS 25d प्राणपरं O, प्रा-परं S, त्रापरं A, रं I नयज्ञैः I before 26 L adds इति त्रिविकल्पः

सुरेज्यशुक्रज्ञकुजा व्ययस्था-
चन्द्रस्य कुर्युर्बहुवाहनाढ्यम् /
नरं प्रसन्नं विनयप्रधानं
सुसंमतं सर्वकलासु दक्षम् //२६//
सुरेज्यसौरज्ञकुजा व्ययस्था:
कुर्युर्नरं पुण्यपरं चतारिम् /
नृपप्रसादेन सुतुष्टचित्तं
विख्यातकर्माणमलोलुपं च //२७//
सुरेज्यशुक्रारदिनेशपुत्रा
व्ययस्थिता रात्रिपतेर्यदा स्युः /
कुर्युस्तदा भूरिसुतं मनुष्यं
विद्याधिकं रोगविवर्जितं च //२८//
शुक्रारसौम्यार्कसुता व्ययस्था:
कुर्युः शशाङ्कस्य सताम्भीष्टम् /
नरं प्रचण्डं प्रभुतासमेतं
गजाश्ववस्त्राभरणैः समेतम् //२९//
शुक्रज्ञजीवार्कसुता व्ययस्था-
चन्द्रस्य कुर्युर्व्यसनैर्विमुक्तम् /
नरं प्रसूते प्रियवाक्यदक्षं
विदग्धनारीसहितं सदैव //३०//
सुरेज्यशुक्रज्ञशनैश्चरारा-
श्चन्द्राद्व्ययस्थाः सततं च कुर्युः /
प्रभूतभाग्यं हतशत्रुदर्पं
नरं नितान्तं जनसंमतं च //३१//
इति श्रीवृद्धयवने ऽनफायोगाध्यायः //

26c प्रयत्नं L   F begins with 29   30a शुक्रज्ञचक्रार्कसुता ACFILRSW   30b–31b व्ययस्था: om. B   31a °शनीज्ञभौमा- ACILOS, °शनैश्चरभौमा- W, °दिनेशभौमा FR   31b °चंद्रव्ययस्था: FR   col. श्री° om. FILOR   अनफा° ABCIOSW, चन्द्रात् अनफा° L

सूर्यं विना रात्रिपतेर्धनस्थो
यदा ग्रहः स्याद्द्वयो ऽथवा स्यु
स्थानाश्रय द्वौ सुनफाख्ययोग
उत्पद्यते रूपगुणैः सदैव ॥१॥
चन्द्रस्य भौमो यदि वित्तसंस्थो
नरं प्रसूते सुतरां धनाढ्यम् ।
धर्मध्वजं प्राणभृतां वरिष्ठं
प्रभूतमित्रं जनवल्लभं च ॥२॥
द्वितीयगः सोमसुतो यदा स्या-
च्चन्द्रस्य धत्ते सुभगं मनुष्यम् ।
प्रभूतवित्तं धनधान्ययुक्तं
गुणानुरक्तं जनसंमतं च ॥३॥
गुरुर्विशेषाद्यदि वित्तसंस्थ-
श्चन्द्रस्य धत्ते प्रणतं मनुष्यम् ।
स्वभावशुद्धं प्रियसाधुकृत्य
महाजनैः शंसितमेव नित्यम् ॥४॥
चन्द्रस्य शुक्रो यदि वित्तसंस्थो
नरं विधत्ते ऽद्भुतकृत्यदक्षम् ।
जनानुरक्तं विभवैः समेतं
सशंसितं ब्राह्मणसंमतं च ॥५॥

यदि C 2d प्रभूतवित्तं W 3c प्रभूतमित्रं L 3d जनवल्लभं C 4a. गुरुर्द्वितीयो यदि जन्मकालो C 4d. पूजित° L 5d. सशंसित° W, सुसासित° I

चन्द्रस्य सौरो यदि वित्तसंस्थो
नरं विधत्ते बहुलाभभाजनम् ।
प्रभूतहस्त्यश्वगणैः समेतं
कुलप्रधानं शुभकर्मरक्तम् ॥६॥
धनस्थितौ रात्रिपतेर्ज्ञवक्रौ
नरं सदा दम्भभृतं कृतघ्नम् ।
विदग्धवाक्यं बहुधर्मभाजं
गतव्ययं पार्थिववल्लभं च ॥७॥
सुरेज्यवक्रौ यदि वित्तसंस्थौ
चन्द्रस्य मर्त्यं दधतः प्रधानम् ।
मनस्विनं शत्रुजनैर्विहीनं
सदा प्रपूर्णं बहुधर्मभाजनम् ॥८॥
शुक्रावनेयौ यदि वित्तसंस्थौ
चन्द्रस्य वित्तं दधतो नराणाम् ।
पराक्रमं भूरियशःप्रतापं
शत्रुक्षयं बान्धवसङ्गमं च ॥९॥
सौरावनेयौ यदि वित्तसंस्थौ
चन्द्रस्य धत्तः सुभगं मनुष्यम्
विद्याविवेकागमशास्त्ररक्तं
महाप्रभावं प्रचुरार्थयुक्तम् ॥१०॥

6c. °गुणैः W, °गजैः L 6d. °कर्मदक्षं W 7b. नदा S दम्भवृतं ACIOS 7d. गतव्यथं BCL 8b. दयितः BCLW, शायितः I 9b. वित्तं] धत्ते W दधत्ते C, विधत्तो F 7d. °संमतं ABCILOSW 10b. धत्ते ABCFILORSW

सुरेज्यसौम्यौ यदि वित्तसंस्थौ
चन्द्रस्य पुंसां दधतः प्रतापम् ।
धर्मार्थसिद्धिं प्रियतां च लोके
पुण्योत्तमानां जगतां जनानाम् ॥११॥
दैत्येज्यसौम्यौ यदि वि   स्थौ
धनं तदा संददतो नराणाम् ।
स्य मित्राश्वगजैः ——
सुसाधुवादं नयसङ्ग्रहं च ॥१२॥
शनैश्चरज्ञौ यदि वित्तसंस्थौ
चन्द्रस्य पुंसां दधतः क्षमां च ।
धर्मस्य वृद्धिं गुरुदेवभक्तिं
जितेन्द्रियत्वं बहुसस्यलाभम् ॥१३॥
सुरेज्यशुक्रौ यदि वित्तसंस्थौ
पुंसां दधतो मतिं च ।
सुसाधुसन्मानमरिप्रणाश
सुशीलतां साधुजनेन सख्यम् ॥१४॥
सुरेज्यसौरौ यदि वित्तसंस्थौ
चन्द्रस्य पुंसां दधतोऽद्भुतानि ।
सौख्यानि दारात्मजसम्भवानि
सदाश्ववस्त्रौघसुवर्णसंघैः ॥१५॥

11c. धर्मस्य सिद्धिं BCILW 11d. जगतां जनानां om. AS
जगतां] जनतां FR 12a देवेज्य° L 12b–13a om. W
2b सदा L संवदतो ABCFILORSW 13 after 14 in
ABCFILORW 13 om. S 13c बुद्धिं W 13d. बहुशस्य° C
14a शनैश्चरज्ञौ S 15a सुरेज्यसूरौ BCW 15b. पुंसो LW
दधते FR 15c दाराद्भुत° BCILW 15d. सदाश्व° BLW

धनस्थितौ शुक्रदिनेशपुत्रौ
    चन्द्रस्य धत्तो धनपुत्रदारान् ।
गुणानुरागं प्रियतां च लोके
    सुशीलतां भूरिपुराधिपत्यम् ॥१६॥
जीवज्ञभौमा यदि वित्तसंस्था-
    श्चन्द्रस्य कुर्वन्ति विभुं च पुंसाम् ।
पुराधिपत्यं जनताधिपत्यं
    विद्वज्जनैः सङ्गमवित्तलाभम् ॥१७॥
शुक्रज्ञभौमा यदि वित्तसंस्था-
    श्चन्द्रस्य कुर्वन्ति सुखं नराणाम् ।
प्रियातिथित्वं जनतोपरोधं
    विदग्धतां वीर्यविशुद्धिमेन ॥१८॥
सौरज्ञभौमा यदि वित्तसंस्था-
    श्चन्द्रस्य कुर्वन्ति नरं धनाढ्यम् ।
निर्मुक्तवैरं सततबन्धुमान्यं
    विनीतवेषाभरणं विदग्धम् ॥१९॥
जीवारशुक्रा यदि वित्तसंस्था-
    श्चन्द्रस्य कुर्वन्ति नृणां प्रहर्षम् ।
गुणानुरागं विनयं प्रमोदं
    विदग्धतां वैरिविनाशनं च ॥२०॥

16b चंद्रस्य धत्तो B धत्ते ACFILORSW 17b. ABCILOSW, R, भुति F पुंसां om. F, नित्यं S 17c. जनताधिप . L, धनताधिपत्यं F 18c °तिथ्यं सं° AC, °तिथिध्यं I, °तिथिं BLSW 18d °विशुद्ध° ABCILOSW, °विशुद्धि° FR 19c. निमुक्त° AS 20d वैर° FL

————————— //21//

मन्दारशुक्रा धनगा यदा स्यु-
र्नरं प्रकुर्वन्ति सुशीलचेष्टम् /
जनानुकूलं विभवैः समेतं
धर्मे रतं चारुविशालनेत्रम् //22//
जीवज्ञशुक्रा धनगा यदा स्यु-
श्चन्द्रस्य कुर्वन्ति सदा [illegible] तुलम् / प्रभुत्वम् /
कृतज्ञतां साधुजितेन्द्रियत्वं
विद्वज्जनैः सङ्गमनं सदैव //23//
जीवज्ञसौरा धनगा यदा स्यु-
श्चन्द्रस्य कुर्वन्ति यशोऽर्थलाभम् /
नरेन्द्रसत्यं प्रियतां च लोके
कीर्तिं सदा साधुसमागमं च //24//
शुक्रज्ञसौरा यदि वित्तसंस्था-
श्चन्द्रस्य कुर्वन्ति कलत्रलाभम् /
नरेन्द्रपूज्यं प्रियतां च लोके
तीर्थानुरागं सततं नराणाम् //25//
जीवार्किशुक्रा यदि वित्तसंस्था-
श्चन्द्रस्य कुर्वन्ति गजाश्वलाभम् /
मनोविशुद्धिं सकलत्रलाभं
विवेकतां तीर्थरतिं [illegible]त्वम् //26//

22a धनगा om. B 23b प्रसूतं ABCL, प्रसूते FIORSW for 24a C repeats 23a 24a यदि FR 24b यथार्थलाभं ABILORSW [illegible] (for 24b–d F has 25b–d) for 24d L has 25d for 25a F repeats 24a (यदि) 25b विकलत्रलाभं BLW 26b–27a om. S 26c. सकलत्र° I °लाभं CW 26d. °रति: FIOR

सुरेज्यशुक्रज्ञकुजा धनस्था-
श्चन्द्रस्य कुर्वन्ति सुपार्थिवेभ्यः ।
प्रभूतलाभं स्मृतिशास्त्रसारं
सदा नराणां सविवेकमेव ॥२७॥
सुरेज्यसौरज्ञकुजा धनस्था-
श्चन्द्रस्य कुर्वन्ति बहुप्रतापम् ।
सुतार्थलाभं स्वजनप्रहर्ष-
मग्र्यं च भूपादिसमागमं च ॥२८॥
सौम्यारशुक्रार्कसुता धनस्था-
श्चन्द्रस्य कुर्वन्ति महाधनानि ।
नृणां सुचेष्टा विवि
कलत्रपुत्रार्थनिषेवणं च ॥२९॥
सुरेज्यशुक्रारदिनेशपुत्रा-
श्चन्द्रस्य कुर्वन्ति धनाश्रिताश्च ।
धनं प्रभूतं जनतानुरागं
प्रसिद्धिमोजोद्भवलाभमेव ॥३०॥
सुरेज्यशुक्रज्ञदिनेशपौत्रा
गाश्रिता रात्रिपतेर्नराणाम् ।
कुर्वन्ति राज्यं बहुवित्तलाभं
ससत्यतां भोगविवृद्धिमेव ॥३१॥
इति श्रीवृद्धयवने सुनफायोगाध्यायः ॥

for 27a W has 30a 27b-28a om. BLW 27c. प्रसूत° F
28c सतीर्थ° FILORSW सुतनु° S 29 after 30 in
ABCFILORSW 29c. विचेष्टा FR बहुधा S सुरम्याः C
29d. °निवेषणं B 30b. धनाश्रिताश्च om. B, धनाश्रितं च
ACFIORSW 30c. प्रसूतं B, प्रसूते W 30d प्रसिद्ध°
BCFLORW 31c कुर्वंति राज्यं om. W 31d. सुरत्यतां BC
सुरम्यतां L, सुरूयत्यतां W °विवृद्ध°
ABCIOR col. श्री° om. FIOR सुनफाध्यायः R
after col. W adds संपूर्णः

सूर्यं विना द्वादशवित्तसंस्थै-
श्चन्द्रस्य योगो ऽत्र हि दुर्धराख्यः /
अशीतियुक्तं शतमेव तेषां
पृथक् प्रदिष्टं सुधियां समग्रम् //१//
बुधे व्ययस्थे धनगे च भौमे
जातो ऽत्र मनुष्यधर्मैः /
भवेद्वि— प्रचुरप्रतापः
क्षितीश्वराणामतिवल्लभश्च //२//
भौमे व्ययस्थे शशिजे धनस्थे
मर्त्यः प्रभवेद्विनीतः /
शास्त्रानुरक्तः प्रणतः प्रगल्भः
सदानुरक्तः सुरसत्तमानाम् //३//
जीवे व्ययस्थे क्षितिजे धनस्थे
चन्द्रस्य मर्त्यो ऽत्र भवेत् सुरूपः /
क्रियान्वितः सत्यरतः कृतज्ञः
प्रियंवदः शास्त्रकथानुरक्तः //४//
जीवे धनस्थे क्षितिजे व्ययस्थे
चन्द्रस्य जातो ऽत्र भवेन्मनुष्यः
कुलप्रधानो द्विजदेवभक्तः
सदा विनीतो जनवल्लभश्च //५//

1b. दुरादुराख्यः BL 1c अनीति° CI °फलं F 1d समग्रं] च तेषां S 2d. °राणातिसुवल्लभश्च FR 3a व्यये च S 3b–4a om. W 3c प्रणतः —3d °रक्तः om B 4b ऽत्र om. FL 5–6 om. W 5c – 6b om. BL

भौमे व्ययस्थे भृगुजे धनस्थे
चन्द्रस्य जातः सुभगो मनुष्यः ।
भवेद्विदग्धश्च सभासमेतः
प्रभूतवित्तः सततं प्रसन्नः ॥६॥
शुक्रे व्ययस्थे क्षितिजे धनस्थे
चन्द्रस्य जातो ऽत्र भवेन्मनुष्यः ।
]रतप्रः प्रवराम्बकोशो
दाक्षिण्यविद्यावसुभोगभाजः ॥७॥
सौरे व्ययस्थे क्षितिजे धनस्थे
निशापतेः पुण्यपरो मनुष्यः ।
भवेद्विरोहः व्रतशास्त्रपक्षः
प्रियातिथिः कान्तिपरः कृतज्ञः ॥८॥
सदा विभोगी नृपमोहनश्च
नरेन्द्रपूज्यः सुभगः प्रतापी ।
भौमे व्ययस्थे ऽर्कसुते धनस्थे
चन्द्रस्य जातो मनुजः सदैव ॥९॥
जीवे व्ययस्थे शशिजे धनस्थे
चन्द्रस्य जातः प्रियवान् मनुष्यः ।
सुसाधुवन्द्यः श्रुतिबुद्धियुक्तः
कृपासमेतः सततं सुभोगी ॥१०॥

6a भृगुजे] क्षितिजे S   6c–7b om. L in marg. L   6d सुत ABCFILORS   7c सदार° ABCFIORSW   प्रवरश्च ABCFIORSW   7d °विद्याश्च सु° ABCFILORSW   8c शास्त्रपक्षः om. F, °शास्त्रपक्षा° BW   8d °मित्रातिथिः BW   9a विभागी O   9d तनुजः S   after 9d W adds:
धनं च धान्यं बहुलं प्रतापं
रिपुक्षयं कीर्तिविवर्धनं च ।
10b–11a om. ABCILOSW   10c °बुद्धि° F

जीवे धनस्थे शशिजे व्ययस्थे
चन्द्रस्य जातः सुजनानुयायी /
नरो भवेद्रोगविमुक्तदेहः
सन्तुष्टचित्तो विनयान्वितश्च //११//
सौम्ये व्ययस्थे भृगुजे धनस्थे
चन्द्रस्य मर्त्यः प्रभवेत् सुदारः /
प्रियातिथिः सत्यदयान्वितश्च
संपूजितः शीलधनप्रभावात् //१२//
सौम्ये धनस्थे भृगुजे व्ययस्थे
चन्द्रस्य जातः प्रमिताभिमानः /
भवेन्मनुष्यः सुजनप्रवीणो
भोक्ता विभागी विनयेन युक्तः //१३//
मन्दे व्ययस्थे शशिजे धनस्थे
चन्द्रस्य जातः पतितागमश्च /
भवेन्मनुष्यः प्रमितोऽभिमानी
नीतिप्रियः प्राणभृतां वरिष्ठः //१४//
———————————— //१५//
जीवे व्ययस्थे भृगुजे धनस्थे
चन्द्रस्य जातोऽत्र भवेन्मनुष्यः /
संपूर्णकायः कृतकैर्विहीनो
सतामभीष्टो नृपवल्लभश्च //१६//

11] द्वितीये S 12c. °दयासमेतः F
12d. शाल — 15c. om. ...
ABCFILORSW 16b त्र] प्र° BLW 16c. °कार्य W
16b. जातस्य FR
कृतको वि° ABCFILORSW

जीवे धनस्थे भृगुजे व्ययस्थे
    सङ्ग्रामदक्षस्तु भवेन्मनुष्यः /
चन्द्रस्य नानाविधहेमभाजो
    जनप्रधानः प्रथितो ऽभिमानी //१७//
जीवे व्ययस्थे ऽर्कसुते धनस्थे
    चन्द्रस्य जातो बहुबुद्धिभाजः /
भवेन्मनुष्यः श्रुतिशास्त्ररक्तः
    कलासु दक्षो गुणसागरश्च //१८//
जीवे धनस्थे ऽर्कसुते व्ययस्थे
    मनस्विनां मुख्यतमो नरः स्यात् /
चन्द्रस्य दाता सुकृपः प्रगल्भः
    सुशीलवित्तार्जनतत्परश्च //१९//
शुक्रे व्ययस्थे ऽर्कसुते धनस्थे
    चन्द्रस्य जातो बहुपुण्यसेवी /
भवेन्मनुष्यः सततं गुणाढ्यः
    प्रभूतकोशः प्रचुरप्रगल्भः //२०//
शुक्रे धनस्थे ऽर्कसुते व्ययस्थे
    भवेन्मनुष्यो भयतः सुवीरः /
मदान्यदेशार्जितवित्ततुष्टः
    क्षितीश्वरस्याभिमतः सुधामः //२१//
एवमेकविकल्पः //

17c नानाविधिभ° BF   17d प्रथिताभिध° ABCFILORSW
18b नीतो O   19b – 20a om. BLW   19c सुरूपः S
20d °कोषः RC, °कोपः W   °प्रभावः FR   21b नृपतेः C
21c °देशार्जित° A   21d °श्वरस्याभिध° CI, °श्वरः साभि° BW
सुधामा L   after 21 W adds इति श्रीवृद्धयवने
प्रथमाविकल्पना संपूर्णा   °विकल्पाः BF, °विकल्पाः R,
°विकसकलं C

चन्द्रस्य भौमो यदि वित्तसंस्थो
व्ययस्थितौ जीवबुधौ मनुष्यः ।
भवेत् प्रधानः शुभकर्मरक्तः
प्रभूतलाभः सुतरां सुभोगी ॥२२॥
चन्द्रस्य भौमो यदि रिष्फसंस्थो
धनस्थितौ जीवबुधौ मनुष्यः ।
भवेन्नृपाणां करणैः कौनहः
सुवस्त्रविद्यागमसद्धभाजः ॥२३॥
चन्द्रस्य भौमो यदि वित्तसंस्थो
व्ययस्थितौ भार्गवसोमपुत्रौ ।
नरो भवेन्नीतिपरस्तथाढ्यः
प्रभूतमित्राभरणैश्च दक्षः ॥२४॥
चन्द्रस्य भौमो व्ययगो यदा स्याद्
धनस्थितौ भार्गवसोमपुत्रौ ।
भवेन्मनुष्यः प्रणयप्रधानः
प्रियंवदः पार्थिववर्धितश्च ॥२५॥
निशापतेर्भूतनयो व्ययस्थो
धनस्थितौ मन्दशशाङ्कपुत्रौ ।
यदा तदा सत्यपरो मनुष्यो
भवेद्विदग्धो वनितासखश्च ॥२६॥

---

order in ABCILOSW: 23a-b, 24c, 23c; 23d (om. ABCIOS), 24a-b, 24d, 25d, 25a-b, 26c-d, 26a-b, 25c, 26d
24c °ज्ञातिपर° L, °नामिपर° W °स्तपाढ्यः IS 25c भवेन्] तदा ABCILOSW 25d. पापनिवर्जितश्च FR 26c सत्यधरो W, सत्यंपरो FR 26d om. L 26d वनिताप्रियश्च FR

भौमः शशाङ्कस्य यदा धनस्थो
    व्ययस्थितौ सौम्यदिनेशपुत्रौ /
तदा प्रगल्भः प्रचुरान्नपानः
    प्रभूतकोशः प्रभवेन्मनुष्यः ॥२७॥
निशापतेर्भूतनयो व्ययस्थो
    धनाश्रितौ जीवभृगू प्रधानः /
नरो भवेत् सत्यपरोऽत्र जात
    : दारचेष्टः प्रणतः प्रसिद्धः ॥२८॥
भौमः धनस्थो रजनीपतेश्च
    व्ययस्थितौ भार्गवदेवपूज्यौ /
भवेन्मनुष्यः प्रथिताभिमानो
    रत्नार्थसस्यादिहिरण्यसारः ॥२९॥
व्ययस्थिते भूमिसुते हिमांशो-
    र्धनाश्रयस्थौ यदि जीवसौरौ /
तदा मनुष्यः प्रभवेत् सुशीलः
    कलासु दक्षः क्षतशत्रुपक्षः ॥३०॥
धनस्थिते भूतनये हिमांशो-
    र्व्ययस्थितौ सौरसुरेशपूज्यौ /
ख्यातो तदा स्यात् सुतदारवित्तैः
    सन्तुष्टचित्तः प्रवरो मनुष्यः ॥३१॥

27b सोम° FLRW   27c. प्रगल्भः] प्रभु – सः B, प्रभुः स्यात् L, प्रभूतस° W, प्रभुक्तः corr. to प्रभुक्तः C, प्रमत्त I, मनुष्यः FR
27d. मनुष्यः] प्रगल्भः FR   28c सस्यपरो ABFILORSW, स्वस्यपरो C   28d. प्रसिद्धिः F, प्रगल्भः S   29c प्रथितो ABCFIOSW   °मानी S   29d. °शस्याद्यहिरण्य° FR   30a भूतनये W   30d. हतशत्रु° W, क्षितशत्रु° C   31a धनाश्रितो L   31b. सौर°] शुक्र° ABCFILORSW   °सुरेज्यपूज्यौ W, °सुरेज्यौ S   31c स्यातां तदा ... AS   31d प्रभवो F

हिबुकस्थे तनयो व्ययस्थो
यदा धनस्थो भृगुसूर्यपुत्रौ /
तदा भवेत् पुण्यपरो मनुष्यो
गुणानुरक्तः प्रमिताभिमानः ॥३२॥
धने यदि स्यात् क्षितिजो व्ययस्थो
शुक्रार्कपुत्रौ प्रचुरप्रतापः /
भवेच्च जातः परदेशकृत्यो
विख्यातकीर्तिः श्रुतिसंयुतश्च ॥३३॥
हिबुकते: सोमसुतो व्ययस्थो
धनस्थितौ वक्रसुरेश्य पूज्यौ /
तदा भवेन्मनुष्यतमः स्ववर्गे
प्रियंवदः प्राज्ञतमः प्रभुश्च ॥३४॥
———————— ॥३५॥
चन्द्रस्य सौम्यो यदि रिष्फसंस्थो
धनस्थितौ वक्रभृगू प्रधानः /
तदा मनुष्यः स्मृतिवाक्यरक्तः
श्रुतिप्रधानो नयनाभिरामः ॥३६॥
हिबुकते: सोमसुतो धनस्थो
व्ययस्थितौ भौमभृगू प्रधानः /
नरो भवेत् सर्वसहः कृ[illegible]ः
स्वदारसन्तुष्टमनाः सदैव ॥३७॥

32a. ABCILOSW 32b [illegible]स्थौ ABCILOSW 32d. गणानु S (धनस्थो) 33a व्यये S धनस्थौ S 33c. भवेन्न ABCFILORW परदेश॰ ABC ॰कृत्ये ABCILOW, कृस्ये S 33d श्रुत॰ FR 34b शुक्र॰ ABCFIORS, भौम॰ L, भौमशुक्र॰ W ॰सुरेज्य॰ FR ॰पुत्रौ L 34c [illegible]त्तम W, मनुष्यतमः BFL 36b. प्रधानौ ABCFSW 36c ॰[illegible]रकः S 37b ॰भृगु 3[illegible] प्रधानौ ABCFOW

सौम्यः शशाङ्कस्य यदा व्ययस्थो
धनस्थितौ सूर्यजभूमिपुत्रौ /
नरोऽत्र जातः प्रभवेत् सरूपः
प्रियंवदोऽनल्पमतिः सुधर्मः ॥३८॥
सौम्यो धनस्थो हिमगोर्यदा स्यात्
स्यातां कुजार्कौ यदि रिष्फगौ तौ /
तदा भवेद्भूरिधनो मनुष्यः
प्रियातिथिः सत्यपरो दयावान् ॥३९॥
सौम्यो व्ययस्थो यदि शीतरश्मे-
र्धनस्थितौ शुक्रसुरेशपूज्यौ /
तदा नरः स्याद्दृढवित्तयुक्तो
विवेकविद्यागमशास्त्रलब्धः ॥४०॥
व्ययस्थितौ शुक्रसुरेशपूज्यौ
धनस्थितो ज्ञो रजनीपतेश्च /
तदा मनुष्यः प्रभवेत् कृतज्ञो
देवद्विजानां सततं प्रसक्तः ॥४१॥
सौम्यो व्ययस्थो यदि शीतरश्मे-
र्धनस्थितौ सूरिशनैश्चरौ तु /
तदा विनीतः प्रणतारिपक्षः
सुरूपगात्रः प्रचुरान्नपानः ॥४२॥

(38c सद्रूपः FR)
38a यदि F 38b धनस्थितौ om. F 38d दल्पमतिः AIO, दल्पमतिः BW, ल्पमतिः C, दानपतिः FR 39a व्ययस्थो S
39b रिष्फसंस्थौ LW तौ] तु FR 39c °धनैर्मनुष्यः S
40b °सुरेज्य° FLRW °मुक्तो W 40c °सत्ययुक्तो FR 40d °लब्धः: IOR, °लाभः: F 41a °सुरेज्य° ABCFILORW
41d प्रशस्तः: BIL, प्रशस्य: C, प्रसात W 42b °शनीश्वरौ IOW
42c प्रगतारि° LW

सौम्यो धनस्थो यदि शीतरश्मे-
र्व्ययस्थितौ जीवदिनेशपुत्रौ /
तदा मनुष्यः सुकुलानुरक्तो
भवेन्महात्मा बहुवित्तभाजः //४३//

चन्द्रस्य सौम्यो यदि रिःफसंस्थः
शुक्रार्कजौ वित्तगतौ मनुष्यः /
तदा भवेत् साधुसमागमोत्कः
प्रभूतमित्रो घृणयाधिकश्च //४४//

धनस्थितः सोमसुतो हिमांशो-
र्व्ययस्थितौ शुक्रशनैश्चरौ तु /
भवेन्मनुष्यः सुसुतः सुवित्तः
प्रियासमेतः प्रियसाधुनादः //४५//

जीवो व्ययस्थो यदि शीतरश्मे-
र्धनस्थितौ भूमिजचन्द्रपुत्रौ /
सुरूपदारो ऽत्र भवेन्मनुष्यो
दृढव्रतश्च सुरतानुकूलः //४६//

चन्द्रस्य जीवो यदि वित्तसंस्थो
व्ययस्थितौ भूमिशशाङ्कजौ च /
भवेत्तदा विज्ञतमो मनुष्यः
प्रभूतशास्त्रार्थसमृद्धबुद्धिः //४७//

43d. बहुवित्त° ABCIORSW 45b. चेत् W 45c. ससुतः I शुचित्तः FR, सवित्तः I 46c. स्वरूप° W 47b. भौम° W 47d. °समृद्धिबोद्धिः FR

चन्द्रस्य जीवो यदि रिष्फसंस्थो
धनस्थितौ शुक्रधरित्रिपुत्रौ ।
तदा भवेच्चालेविधानदक्षो
लज्जाधिकः स्नेहपरो मनुष्यः ॥४८॥
धनस्थितो देवगुरुर्हिमांशो-
र्व्ययास्थितौ शुक्रकुजौ मनुष्यः ।
भवेत् प्रजातः सततं नयज्ञः
प्रभूतकोशो मखकर्मरक्तः ॥४९॥
हिमद्युतेर्देवगुरुर्व्ययस्थो
धनस्थितौ वक्रशनैश्चरौ तु ।
भवेन्नरः प्राणभृतां वरिष्ठो
हस्त्यश्वभागी सुहृदाश्रयाढ्यः ॥५०॥
चन्द्रस्य जीवो धनगो यदा स्यात्
व्ययाश्रितौ सूर्यजभूमिपुत्रौ ।
भवेन्मनुष्यः सुतरां सुकर्मा
जितारिवर्गो गुणगौरवश्च ॥५१॥
हिमद्युतेर्देवगुरुर्व्ययस्थो
धनाश्रयस्थौ सितसोमपुत्रौ ।
शूरश्च शक्तो मतिमान् प्रसिद्धो
भवेन्मनुष्यः खलताविहीनः ॥५२॥

48b व्ययस्थितौ S 48c भवेत्तदा S 49c प्रजातः] प्रनीति W
50b धेतर् S 50d °भोगी W

प्रालेयरश्मेर्धनगः सुरेज्यो
व्ययस्थितौ शुक्रशशाङ्कपुत्रौ ।
भवेच्चरो रोषकलिप्रसक्तः
क्रियाधिकः प्राप्तधनः सदैव ॥५३॥

चन्द्रस्य जीवो यदि रिष्फसंस्थो
धनस्थितौ सौम्यशनैश्चरौ तु ।
भवेन्मनुष्यः श्रुतचित्तसक्तः
सत्याश्रितः पार्थिववल्लभश्च ॥५४॥

चन्द्रस्य जीवो यदि वित्तसंस्थो
व्ययस्थितौ सोमजसूर्यपुत्रौ ।
तदा विवेकी प्रभवेन्मनुष्यः
कल्यः कविः पापविवर्जितश्च ॥५५॥

जीवो ऽन्त्यसंस्थो यदि शीतरश्मे-
र्धनस्थितौ शुक्रशनैश्चरौ तु ।
सदातिशूरो ऽत्र भवेन्मनुष्यो
नीरोगदेहः स्मितपूर्ववक्त्रः ॥५६॥

जीवो धनस्थो यदि शीतरश्मे-
र्व्ययस्थितौ भार्गवसूर्यपुत्रौ ।
नयज्ञ वित्तसारो
भवेन्नरः सत्यशुचिः प्रगल्भः ॥५७॥

53a °र्व्ययगः L 53d. प्राप्तयशः C, सत्यधनः L 54b °शनीश्चरौ CO 54c श्रुति° FW °वित्त° ILORSW 54d प्र.भा॥-वत्स: C 56a व्ययस्थो LW 56b-57a om. C 56b °र्धर्मस्थितौ AB सौम्य° ABFIORSW, सोम° L 56d स्थित° ABCS 57b °सोमपुत्रौ C 57c. तदा प्रधानो C चिन्तावित्तसारो C 57d °नरः CS

चन्द्रस्य शुक्रो यदि रिष्फसंस्थो
धनाश्रितौ सौमनभूमिपुत्रौ /
तदा भवेन्मातृपितृप्रभक्तः
शास्त्रानुरक्तो रणकर्मदक्षः //५८//

चन्द्रस्य शुक्रो यदि वित्तसंस्थो
व्ययस्थितौ भौमशशाङ्कपुत्रौ /
तदा भवेद्दानपरो मनुष्यः
प्रक्षीणपापो बहुपुत्रपौत्रः //५९//

चन्द्रस्य शुक्रो व्ययगो यदा स्याद्
धनस्थितौ भौमसुरेज्यसंज्ञौ /
तदा मनस्वी निजदाररक्तो
महाकविः सत्यशुचिः सदैव //६०//

शुक्रो धनस्थो यदि शीतरश्मे-
र्व्ययस्थितौ भूमिजदेवपूज्यौ /
तदा प्रभूतद्रविणस्य नाथो
भवेत् सुरूपः सततं मनुष्यः //६१//

नक्षत्रनाथस्य सितो व्ययस्थो
धनस्थितौ भौमदिनेशपुत्रौ /
तदा मनुष्यः क्षितिवित्तनाथो
भवेत् प्रसूतश्च सुतैः समेतः //६२//

58b धनस्थितौ C 58c °प्रगल्भः C 59b व्ययाश्रितौ L
59c °द्दामपरो C, °क्षीतिपरो BILW गुणाढ्यो W 60a
यदि C 60b सौम्य° CR, corr. to भौम° R
°संस्थौ C, °पूज्यौ BIL, °पुत्रौ W 60d महा°] सदा LW
61c प्रसूते ABFILORSW 61d सरूपः C 62b व्ययस्थितौ C
भूमि° C 62b °मदिनेश° — 62c तदा om. A 62d
प्रसूतो ACFRS स्वसुतैः AFRS, स्वसुतो C

नक्षत्रनाथस्य सितो धनस्थो
व्ययस्थितौ सौरिधरित्रिपुत्रौ /
भवेन्नरः शिल्पकलासु दक्षः
क्षमाधिकः कृत्यपरः प्रसन्नः //६३//
नक्षत्रनाथस्य सितो व्ययस्थो
धनस्थितौ सौम्यसुरेशपूज्यौ /
भवेन्मनुष्यः क्षतजातिपक्षो
दक्षः वशी प्राणसमन्वितश्च //६४//
नक्षत्रनाथस्य सितो धनस्थो
व्ययस्थितौ सौम्यसुरेशपूज्यौ /
भवेन्मनुष्यः सततं सुशीलः
स्वभावशुद्धः प्रियधर्मकृत्यः //६५//
शुक्रो व्ययस्थो यदि शीतरश्मे-
र्धनस्थितौ सूर्यजसोमपुत्रौ /
भवेन्मनुष्यः प्रियसाधुकृत्यो
मायाविहीनः स्फुटवाक्यवक्ता //६६//
शुक्रो धनस्थो यदि शीतरश्मे-
र्व्ययस्थितौ मन्दशशाङ्कपुत्रौ /
नरो भवेद्दूरियशोनिधानो
नानाश्वसंघाधिपतिः प्रगल्भः //६७//

63b. शौर° C 63c. शिल्पि° ABFILORW °कलास्वभिज्ञः C
63d. सत्यपरः C 64b. सौमजशौरिसंज्ञौ C, सौम्यसुरेज्यसंज्ञौ FR °सुरेज्य° ABILOSW 64c. क्षति° L, कुल° CO 64d. क्षमः ILW 65b. °सुरेज्य° ABCFILORS 65c. कुशीलः ABFILORSW 65d. स्वभावदक्षः ABFILORSW °कृत् स्यात् IL 66b. °सौम्य° B, °भूमि° S order in BILW 67c-d, 67a-b, 66c-d 67c. °दूरिजनो° ABFIORSW, °दूरिधनो° L

शुक्रः शशाङ्कस्य यदा व्ययस्थो
    धनस्थितौ सौरसुरेन्द्रपूज्यौ /
नरो भवेत् प्रीतिपरः प्रसन्नः
    सतामभीष्टः सुरतानुरक्तः //६८//
शुक्रः शशाङ्कस्य यदा धनस्थो
    व्ययाश्रितौ जीवदिनेशपुत्रौ /
तदा मनुष्यः परपक्षहन्ता
    भवेन्निरीहो हतकल्मषश्च //६९//
मन्दः शशाङ्कस्य यदा व्ययस्थो
    धनाश्रितौ भूमिजसोमपुत्रौ /
[तदा मनुष्यः परपक्षहन्ता]
    सन्तुष्टचित्तः प्रबलो विशङ्कः //७०//
मन्दः शशाङ्कस्य यदा धनस्थो
    व्ययस्थितौ भूमिजसोमपुत्रौ /
तदा मनुष्यः प्रभुतासमेतो
    मखांशभुक् शास्त्रकलासु दक्षः //७१//
शनिर्व्ययस्थो यदि शीतरश्मेः
    सुरेज्यभौमौ धनगौ भवेताम् /
तत्राभिजातः प्रथितः स्ववर्गे
    सतामभीष्टः सुतसौख्यभाजः //७२//

68a. धनस्थो S 68c. भवेन्नीति° BILW प्रमत्तः ABFILORSW
68d–72c om. B 68d प्रतापभीष्टः C सुतरा° L, सज्जना° C
69b. व्ययस्थितौ FILORS 70c = 69c 70d प्रगल्भो L
विशोकः C, विशोकः LW 71b–72a शनि° om. LW
71d. मखांशभुक् ORS, मखांशकः ALW, मशायक I, यज्ञशाकः C
°कथासु FR 72a यदि शीतरश्मेः om. W

शनिर्धनस्थो यदि शीतरश्मे-
र्व्ययस्थितौ भौमसुरेन्द्रपूज्यौ /
भवेन्नरः शास्त्ररतः प्रसिद्धः
सदा सुशीलः कृपया समेतः //73//
शनैश्चरो रात्रिकरोर्व्ययस्थो
धनस्थितौ भार्गवमङ्गलाख्यौ /
भवेन्मनुष्यः सततं मनस्वी
प्रसन्नमूर्तिर्व्वजनानुरक्तः //74//
शनैश्चरो रात्रिकरोद्धनस्थो
व्ययस्थितौ भार्गवभूमिपुत्रौ /
भवेन्नरश्चारुविशालनेत्रो
गम्भीरवाक्यो मतिमान्कृतज्ञः //75//
निशापतेः सूर्यसुतो व्ययस्थो
धनस्थितौ सौम्यसुरेन्द्रपूज्यौ /
भवेन्मनुष्यः कृषिनैपुण्यवित्तो
वाणिज्यदक्षः कान्तदोषमुक्तः //76//
चन्द्रस्य सौरो यदि वित्तसंस्थो
व्ययाश्रितौ जीवशशाङ्कपुत्रौ /
तदा नरो भोगविवृद्धगात्रः
सदा सुभोक्ता द्विजदेवतानाम् //77//

73c शस्त्ररतः F 75d °कृतज्ञ C, °कृतज्ञ I, °कृतज्ञ L, °कृतज्ञ FR °ज्ञ BW 76a-b व्ययस्थो ... धनस्थितो — F 76b सौम्य° W, भौम° L °सुरेन्द्र° W 76c कृषिवित्तलब्धः: ABCFIORSW 76d दक्षः] °दोषः C °रक्तः W 77b व्ययस्थितौ W 77c भाग° W °विवृद्ध° FLS 77d सुभोक्तो F

चन्द्रस्य सौरो यदि रिष्फसंस्थो
धनस्थितौ शुक्रबुधौ तदा स्यात् ।
नरोऽतिमान्यः प्रभुतासमेतः
सधर्मशीलः सततं विनीतः ॥७८॥
चन्द्रस्य सौरो यदि वित्तसंस्थो
व्ययस्थितौ भार्गवसोमपुत्रौ ।
भवेत् सुशीलः पशुसुस्यवृत्तिः
प्रसन्नमूर्तिर्मननज्ञः सुसत्यः ॥७९॥
शनैश्चरो रिष्फगतो हिमांशो-
र्धनाश्रितौ जीवसितौ यदा च ।
नरो भवेत् प्रीतिपरः प्रजानां
सदैव भक्तो द्विजपुङ्गवानाम् ॥८०॥
शनैश्चरो वित्तगतो हिमांशो-
र्व्ययस्थितौ जीवसितौ यदा च ।
तदा प्रसूतः प्रबलः प्रसिद्धो
नरो भवेत्प्रीतिपरः सुलज्जः ॥८१॥
इति द्विविकल्पः ॥
चन्द्रस्य भौमो यदि वित्तसंस्थो
व्ययस्थिताः सौम्यसुरेज्यशुक्राः ।
तदा भवेद्भूमिपतिर्मनुष्यो
हतारिपक्षो हतकल्मषश्च ॥८२॥

78b धनाश्रितौ L 79b. व्ययाश्रितौ L 79c कुशील: ACFILORSW, छीशीलो B 80c–81b om. C 81c. सुशील: S सुसिद्धो BCL 81d. भवेन् om. FRW प्रसिद्ध: BCILW after 81 इति श्रीवृद्धयवने द्वितीयाविकल्पना संपूर्णा W द्विविकल्पा: C, द्विविकल्प्या: R, द्विविकल्प: दुरुधरायोगो FL 82b. °सुरेंद्र° W 82d व्रतकल्मषश्च FR

भौमो व्ययस्थो यदि शीतरश्मे-
    र्धनस्थिताः सौम्यसुरेज्यशुक्राः /
भवेत्सत्यः पुरुषो ऽत्र जातः
    कुलप्रधानः सुविचारदक्ष //८३//
चन्द्रस्य भौमो यदि रिष्फसंस्थो
    धनान्विताः सौरसुरेज्यसौम्याः /
तदा भवेद्भोगपरो मनुष्यः
    प्रभूतवित्तः प्रभुतासमेतः //८४//
चन्द्रस्य भौमो यदि वित्तसंस्थो
    व्ययस्थिता जीवबुधार्कपुत्राः /
तदा सुरूपः सुभगो मनुष्यो
    भवेत् सुदान्तः सुतरां विवेकी //८५//
व्ययस्थितो भूतनयो हिमांशो-
    र्धनस्थिताः शुक्रबुधार्कपुत्राः /
विदग्धचेष्टः प्रभवेन्मनुष्यः
    श्रुतिप्रियः शास्त्रतमः प्रधानः //८६//
धनस्थितो भूतनयो हिमांशो-
    बुधार्कपुत्रास्फुजितो व्ययस्थाः /
भवेन्नरः शास्त्रिधनातिभव्यो
    विद्याधिकः कीर्तिसमन्वितश्च //८७//

83b °सुरेन्द्र° W   84b धनस्थितः L   85b धनान्वि ABCFIORSW   °मित्राः W   85c सदा F   सदान्तः BCILW   87b बुधार्कपुत्राभृगुजा ABCFILORSW
87c शास्त्र° LW, शास्ति° AOS, प्रति° I

चन्द्रस्य भौमो यदि रिष्फसंस्थो
धनस्थिता: शुक्रसुरेज्यसौरा: /
भवेद्विनीत: प्रथितो ऽभिमानी
नरो विचित्र: प्रणत: प्रसिद्ध: //८८//
चन्द्रस्य भौमो यदि वित्तसंस्थो
व्ययस्थिता जीवसितार्कपुत्रा: /
भवेत् सतामिष्टतमो ऽभिराम:
शास्त्रानुरक्त: कृपयाधिकश्च //८९//
चन्द्रस्य सौम्यो यदि रिष्फसंस्थो
धनस्थिता भौमसितामरेज्या: /
ससत्यमेष्ट: प्रभवेन्मनुष्यो
नीरोगगात्रस्त्रपयाधिकश्च //९०//
बुधो हिमांशोर्यदि वित्तसंस्थो
व्ययस्थिता: शुक्रकुजामरेज्या: /
भवेत् सुभक्तो निजबन्धुवर्गे
सतामभीष्ट: प्रभुरान्नपान: //९१//
सौम्यो व्ययस्थो यदि शीतरश्मे-
र्धनस्थिता वक्रसुरेज्यसौरा: /
विख्यातकर्मा सुभगो मनुष्यो
भवेत् प्रतापी गुणसागरश्च //९२//

88c प्रथिताभि° ABCFILORSW   89c. °मिष्टतरो S   निरामो B / निराम: W, भिमानो S   89d. कृपया समेत: C   90a. भौमो F   90b. °सितसुरेज्या: W, °सितीसुरेज्या: F   90d. निरोग° ABCILOW   °गात्र: कृपया° FL   91b व्ययान्विता: L   91c. सुसक्तो W   92b. शुक्र° ABCFILORSW

सौम्यो धनस्थो यदि शीतरश्मे-
र्व्ययस्थिता मन्दसुरेज्यवक्राः /
महाधनो बुद्धियुतो मनुष्यो
भवेत् प्रधानो नियमैः समेतः //९३//
व्ययस्थितः सोमसुतो हिमांशो-
र्धनस्थिताः शुक्रकुजार्कपुत्राः /
भवेन्मनुष्यो नितरां विदग्धः
प्रियातिथिः शास्त्रपरः कृतज्ञः //९४//
धनस्थितः सोमसुतो हिमांशो-
र्व्ययाश्रिताः सौरसितावनेयाः /
भवेद्धनीशः प्रणतः प्रसिद्धो
हतारिपक्षः सततं सुधर्मः //९५//
चन्द्रस्य सौम्यो व्ययगो यदा स्याद्
धनस्थिता जीवसितार्कपुत्रा /
भवेद्विनीतः सुतदारसक्तः
प्रसन्नमूर्तिः प्रथिताभिमानः //९६//
चन्द्रस्य सौम्यो धनगो यदा स्याद्
व्ययस्थिताः सौरिसितामरेज्याः /
भवेन्मनुष्यो ऽद्भुतवित्तरूप
उदारचेष्टः सततं विधिज्ञः //९७//

93b °शुक्राः ABCFILORSW 93c. वृद्धि° F 95b व्ययस्थिता: F सौरि° L 95d हितारि° ABC 96b. जीवसुतार्क° W 96c सुतदाह°BW 96d प्रथिताभिधानं C 97b °सितासुरेज्याः F

व्ययस्थितो देवगुरुर्हिमांशो-
र्धनस्थिताः सौम्यसितावनेयाः।
नरो भवेदत्र सलज्जकर्मा
विशेषशास्त्रार्थयुतः सदैव ॥९८॥
धनस्थितो देवगुरुर्हिमांशो-
र्व्ययस्थिता भार्गववक्रसौम्याः।
भवेन्नरः शत्रुवधानुरक्तः
क्रियापरः पुण्यसमन्वितश्च ॥९९॥
जीवो व्ययस्थो यदि शीतरश्मे-
र्धनस्थिता मन्दबुधावनेयाः।
भवेन्मनुष्यो बहुगोवृषाढ्यो
हस्त्यश्वभागी मतिमानुदारः ॥१००॥
जीवो धनस्थो यदि शीतरश्मे-
र्व्ययस्थिताः सौम्यकुजार्कपुत्राः।
तदा मनुष्यो यशसा समृद्धो
बहुनभाग्योगविवर्जितश्च ॥१०१॥

-॥१०२॥

९९c शत्रुविधान° W, शस्त्रनिधानु° L ९९d. प्रियापरः S
१०१d. °भाक् भोग° L

चन्द्रस्य जीवो यदि वित्तसंस्थो
व्ययस्थिता भार्गवसौरभौमाः ।
तदा मनुष्यः प्रणयानुरक्तो
विवेकयुक्तः प्रमदाप्रियश्च ॥१०३॥
चन्द्रस्य जीवो यदि रिष्फसंस्थो
धनस्थिताः सौम्यसितार्कपुत्राः ।
तदा मनुष्यः परमाप्रभावो
भवेत् सुधामा विजितारिसंघः ॥१०४॥
जीवः शशाङ्कस्य यदा धनस्थो
गौम्यसितार्कपुत्राः ।
तदा मनुष्यः सुभगः सुशीलः
कृती विदग्धः सततं प्रगल्भः ॥१०५॥
शुक्रो यदा रात्रिपतेर्व्ययस्थो
धनस्थिता भौमबुधामरेज्याः ।
तदा मनुष्यः सचिरप्रसन्नः
प्रभूतसत्त्वः सुजनानुरक्तः ॥१०६॥
शुक्रो यदा रात्रिप[illegible]निस्थो
व्ययस्थि[illegible]ता भौमबुधामरेज्याः ।
तदा मनुष्यो नृपतेरभीष्टः
सदा सुभोगी रणकर्म

103a रिष्फसंस्थो S 103b °सौम्याः ABCFILORSW 104a वित्तसंस्थो ABCILORSW, corr. to रिष्फसंस्थो R 104b व्ययस्थिताः W 104c परमप्रभावो I 105c सुभगः om. BLW 106a यदि L 106c °प्रमत्तः ABCFILORS 106d °सत्य: FR
वजना° W

शुक्रो यदा राशिपतेर्व्ययस्थो
धनस्थिता भौमबुधार्कपुत्राः ।
तदा मनुष्यः सुतवित्तमाढ्यः
प्रभूतभृत्यः परमप्रभावः ॥१०८॥
शुक्रो यदा राशिपतेर्धनस्थो
व्ययस्थिता मन्दबुधावनेयाः ।
भवेन्मनुष्यः प्रथिताभिमानः
सन्तुष्टचित्तः प्रचुरप्रभावः ॥१०९॥
शुक्रो यदा राशिपतेर्व्ययस्थो
धनस्थिता जीवकुजार्कपुत्राः ।
भवेन्नरो धर्मपथानुगामी
प्रियाश्रमो बान्धवसंमतश्च ॥११०॥
शुक्रो यदा राशिपतेर्धनस्थो
व्ययस्थिताः सौरिकुजामरेज्याः ।
भवेन्नरः सर्वकलासु दक्षो
नरः प्रतापी परदर्पहा च ॥१११॥
शुक्रो यदा राशिपतेर्व्ययस्थो
धनस्थिता जीवबुधार्कपुत्राः ।
भवेत् प्रजातो मतिसौख्यदायी
नरः प्रधानः परहीनपक्षः ॥११२॥

108b धनस्थिता W · सोमबुधा° F 108d प्रभूतवित्तः S
109c °भिमानः — 110c धर्मपथा° in marg. B 110a यदि B
110b जीवबुधार्क° ABCFILORSW 110c धर्मकथा° F
110d. क्रियाश्रमं FILOR; क्रियाश्रमं S 111b. सौर° FR
°स्थितामरेज्याः C 111c कर्म° L °कलानु° 112c
प्रभवेत्र जातो S प्रयातो L 112d परपक्षहीनः C

शुक्रो यदा रात्रिपतेर्धनस्थो
व्ययस्थिता मन्दबुधामरेज्याः /
भवेज्जयी वित्तनिधानदक्षो
नरो नितान्तं प्रभुतासमेतम् //११३//
मन्दो व्ययस्थो यदि शीतरश्मे-
र्धनस्थिता भौमबुधामरेज्याः /
भवेद्विनीतः प्रथितो
प्रभूतपत्रत्रपया समेतः //११४//
मन्दो धनस्थो यदि शीतरश्मे-
र्व्ययस्थिता भौमबुधामरेज्याः /
तदार्थभागी सुभगो
भवेत् सदान्तो द्विजवत्सलश्च //११५//
चन्द्रस्य सौरो यदि रिष्फसंस्थो
धनास्थिताः शुक्रबुधावनेयाः /
प्रभूतनामन्त्रसुतार्थभागी
तदा नरः स्याद्बहुशास्त्रसक्ती //११६//
चन्द्रस्य सौरो यदि वित्तसंस्थो
व्ययाश्रिता भार्गवसौम्यभौमाः /
भवेत्तदा दम्भरुषाविहीनः
सत्वाधिकः काव्यकरो मनुष्यः //११७//

113c. वित्तप्रधान° I   114b धनाश्रिता C   114c भवेन्मनुष्यः प्रथितो विनीतः C   115d. द्विजरत्नलश्च B, द्विजरत्नभक्त W   116b रिपुसंस्था B   116c. प्रभूतयान्न FR, प्रभूतामंत्र° AL, प्रभूतमंत्रश्च S   117b. व्ययस्थिता W   117d सत्याधिकः O   कायकरो C

चन्द्रस्य सौरो व्ययगो यदा स्याद्
धनाश्रिताः शुक्रकुजामरेज्याः ।
तदा विपक्षक्षयकृन्मनुष्यो
भवेत् सुमेधा नृपतेरभीष्टः ॥११८॥
सौरो धनस्थो यदि शीतरश्मे-
र्व्ययाश्रिता भौमसितामरेज्याः ।
नानार्थभागी प्रियवाङ्मनुष्यो
भवेत् सदा दानदयासमेतः ॥११९॥
सूर्यात्मजो रिष्फगतो हिमांशो-
र्धनस्थिताः सौम्यसितामरेज्याः ।
भवेत् प्रतापी जनतासुताढ्यो
नरः ....र्हः प्रियदः प्रजानाम् ॥१२०॥
सूर्यात्मजो वित्तगतो हिमांशो-
र्व्ययस्थिताः शुक्रबुधामरेज्याः ।
नरो भवेन्मुख्यतमः कुलस्य
स्वदाररक्तः परवर्जितश्च ॥१२१॥
एवं त्रिविकल्पः ॥
व्ययस्थितो भूमिसुतो हिमांशो-
र्धनस्थिताः सौरिसितज्ञजीवाः ।
भवेन्नरः पार्थिववंशजात्यो
जातोऽत्र योगे सचिवः सम... ॥१२२॥

118c. विपक्षक्षयहृन् C, विपक्षयकृन् LW 118d. सुधामा L 119b भौमसुता° O 119c प्रियवान् सुरूपो L 120a रिपुगतो BW 120b °सिताबनेयाः ABCFILORSW 120c. °सुताढ्यो° W 120d प्रयदः ABCS, मदः W 121b °व्यय...श्रिताः L °बुधाबनेयाः ABCFILORSW 121c. पुष्यतमः L, मनुष्यतमः BF ...: O 121d स्वदारतुष्टः L, स्वदारवस्त W नारिवर्जितश्च LOW after 121 इति श्रीवृद्धयवने त्रिविकल्प संपूर्ण W त्रिविकल्पाः CF, त्रिविकल्प्याः R, दुरुधरा... त्रिविकल्पः L 122b सौरि° CLW 122c – 123b ... LW °ज्ञो ज्यः ABCFI...

धनस्थितो भूमिसुतो हिमांशो-
र्व्ययस्थिताः सौरसितज्ञजीवाः ।
भवेद्धनानामधिपः सुरूपः
प्रभूतमित्रः सततं सुशीलः ॥१२३॥
चन्द्रस्य सौम्यो यदि रिष्फसंस्थो
धनस्थिताः सौरसितारजीवाः ।
भवेन्मनुष्यः क्षतशत्रुपक्षो
विदग्धनारीरतलब्धसौख्यः ॥१२४॥
चन्द्रस्य सौम्यो यदि वित्तसस्था
व्ययस्थिताः सौरसितारजीवाः ।
भवेत् सदा प्रीतिपरो मनुष्यः
प्रभूतकोशः सुभगो मनोज्ञः ॥१२५॥
व्ययस्थितो देवगुरुर्हिमांशो-
र्धनस्थिता भौमसितज्ञसौराः ।
तदार्थसस्याश्वगजप्रधानो
भवेन्मनुष्यो विविधप्रमोदः ॥१२६॥
धनस्थितो देवगुरुर्हिमांशो-
र्व्ययस्थिता वक्रसितज्ञसौराः ।
नरो भवेत् प्राज्ञतरः सलज्जः
सतामभीष्टः सुधनः सुदारः ॥१२७॥

123b. सौरि° O 123c. भवेज्जनाना° S 124a. वित्तसंस्थो L 124b. व्ययस्थिताः L सौरि° CFW °सितज्ञ° W 124d °लुब्धा° L 125b. सौरि° R 127c. शूरो FR प्राज्ञतम FR सुलज्जः S 127d सदारः ABCFILOS

शुक्रः शशाङ्कस्य यदा व्ययस्थो
धनस्थिता भौमगुरुज्ञसौराः ।
सुपुण्यशीलो ऽत्र भवेन्मनुष्यः
प्रियात्मजो दीक्षितलोकभक्तः ॥१२८॥
शुक्रः शशाङ्कस्य यदा धनस्थो
व्ययस्थिता भौमगुरुज्ञसौराः ।
प्रभूतवित्तो ऽत्र भवेन्मनुष्यः
प्रधानमित्रः कृषिकर्मसक्तः ॥१२९॥
सौरः शशाङ्कस्य यदा व्ययस्थो
धनस्थिता भौमसितज्ञजीवाः ।
सदा विवेकागमशास्त्ररक्तः
क्रियासु दक्षः सततं विधिज्ञः ॥१३०॥
सौरः शशाङ्कस्य यदा धनस्थो
व्ययस्थिता भौमसितज्ञजीवाः ।
सदा सुतारामतडागकर्म-
क्रियासमेतः प्रियसाहसश्च ॥१३१॥
एवं चतुर्विकल्पः ॥
सौम्यावनेयौ यदि रि
धनस्थितौ भार्गवदेवपूज्यौ ।
सुरेज्यपूजानिरतो मनुष्यः
कुलप्रधानः प्रणतः सुधामः ॥१३२॥
———————————— ॥१३३॥

for 130c FR have 131c 131d दक्षः] रक्तः FR for 131c FR have 130c after 131 W has इति श्रीवृद्धयवने चतुर्थकल्पना सम्पूर्णा. चतुर्विकल्पाः F, चतुर्विकल्प्याः R 132d प्रधान .. W सुधामा L, सुधामवृद्धयोः W

बुधभार्गवेयौ यदि रिष्फसंस्थौ
धनस्थितौ जीवदिनेशपुत्रौ /
तदा मनुष्यः सुतदारतुष्टो
भवेन्महात्मा गुरुदेवभक्तः //१३४//

बुधभार्गवेयौ यदि वित्तसंस्थौ
व्ययस्थितौ जीवदिनेशपुत्रौ /
भवेदरोगः शुभकान्ति
प्रियंवदो नीतिपरो मनुष्यः //१३५//

बुधभार्गवेयौ यदि रिष्फसंस्थौ
शुक्रार्कपुत्रौ धनगौ हिमांशोः /
जनानुरागार्जितभूमिवित्तः
सुसंमितः सत्यरुचिर्मनुष्यः //१३६//

बुधभार्गवेयौ यदि वित्तसंस्थौ
शुक्रार्कपुत्रौ व्ययगौ हिमांशोः /
सुरूपगात्रः प्रभजेन्मनुष्यः
सौभाग्यविद्यासहितः सदैव //१३७//

भौमामरेज्यौ यदि रिष्फसंस्थौ
सिते[illegible]पुत्रौ धनगौ हिमा[illegible] /
भवेन्म[illegible]ः सततं प्रगल्भः
प्रभू[illegible]न्वितमनुष्यदाढ्यः //१३८//

134c. शुभदार° FR   135c. भवेद्विदूरकः BCILW   136b–137a om. CLW for 136b I has 137b   137c °रोगार्जित° ABFR   137b व्ययगौ om. F   137d °व्यासहितः — 138c मनुष्यः om.

भौमामरेज्यौ यदि वित्तसंस्थौ
सितेन्दुपुत्रौ व्ययगौ हिमांशोः ।
भवेन्मनुष्यः प्रथिताभिमानो
नयप्रधानः सततं सुधीरः ॥१३९॥

सुरेज्यभौमौ यदि रिष्फसंस्थौ
सौरेन्दुजौ वित्तगतौ सुधांशोः ।
भवेन्मनुष्यो बहुभोगभागी
नरेन्द्रपूज्यः कृतनिश्चयश्च ॥१४०॥

सुरेज्यभौमौ यदि वित्तसंस्थौ
सौरेन्दुजौ रिष्फगतौ सुधांशोः ।
ज्ञानशीलः क्रममार्गगामी
जितेन्द्रियः स्यात् सुभगो मनुष्यः ॥१४१॥

जीवावनेयौ यदि रिष्फसंस्थौ
धनाश्रितौ सूर्यजदैत्यपूज्यौ ।
भवेन्मनुष्यः पिशुनाभिनाथः
प्रभूतकोशः प्रचुरप्रतापः ॥१४२॥

जीवावनेयौ यदि वित्तसंस्थौ
रिष्फाश्रितौ सूर्यजदैत्यपूज्यौ ।
भवेन्मनुष्यः सुतरां प्रसूतो
नयानुकूलः सुमनोज्ञरूपः ॥१४३॥

39-141b °सुरेन्द्र° om. F 140b हिमांशोः SW 140c °भागी C
140d. कृति° O 141b वित्तगतौ W 141c. विगतशीलः B 142a
शुक्रावनेयौ ABCILORSW 142b सौरसुरेन्द्र° ABCILORSW
143a शुक्रावनेयौ ABCILORSW 143b सौरसुरेन्द्र° ABCILORSW
143d. नृपानु° I

चन्द्रस्य शुक्रावनिजौ व्ययस्थौ
धनाश्रितौ जीवशशाङ्कपुत्रौ /
यदा तदा सत्यपरो मनुष्यः
शुचिर्भवेत् पुण्यपरः सदैव //१४४//
चन्द्रस्य शुक्रावनिजौ
व्ययस्थितौ जीवशशाङ्कपुत्रौ /
यदा तदा सुस्थतमः सुरूपो
गुणानुरक्तः प्रथितः सुसत्यः //१४५//
चन्द्रस्य शुक्रावनिजौ व्ययस्थौ
धनाश्रितौ सौम्यदिनेशपुत्रौ /
नरो ऽत्र जातः कृतभूरिदानः
कुलप्रधानः प्रचुरान्नपानः //१४६//
चन्द्रस्य शुक्रावनिजौ धनस्थौ
व्ययस्थितौ सौम्यदिनेशपुत्रौ /
नरो ऽत्र जातः प्रभुतासमेतो
भवेत् सुरूपः प्रमदाप्रियश्च //१४७//
शुक्रावनेयौ व्ययगौ हिमांशो-
र्धनाश्रितौ सौरसुरेन्द्रपूज्यौ /
नरो ऽत्र जातः कमलायताक्षः
कुलप्रधानः प्रियसौहृदश्च //१४८//

146 om. W   146b °नाश्रितौ सौम्यदिने° om. B   146c कृत्यभूरि°
147d. सरूपः C   148b °सुरेंद्रपुत्रौ S   148c–149b om. BLW

शक्राबनेयौ धनगौ हिमांशो-
व्ययाश्रितौ सौरसुरेन्द्रपूज्यौ /
भवेन्मनुष्यः सुतसौख्ययुक्तः
:: //१४९//

भौमार्कपुत्रौ व्ययगौ हिमांशो-
र्धनाश्रितौ जीवशशाङ्कपुत्रौ /
नरो ऽत्र जातो विनयप्रसन्नः
कृताधिकः काव्यरतो दयालुः //१५०//
भौमार्कपुत्रौ धनगौ हिमांशो-
र्व्ययाश्रितौ जीवशशाङ्कपुत्रौ /
भवेन्मनुष्यः शुभबुद्धिवित्तः
नतारिभीतः सत्यः सयोनः //१५१//
चन्द्रस्य भौमार्कसुतौ व्ययस्थौ
धनाश्रितौ भार्गवसोमपुत्रौ /
भवेन्नरः साधुतमः सुरम्यः
प्रभूतकीर्तिर्जयमानभाजः //१५२//
चन्द्रस्य भौमार्कसुतौ धनस्थौ
व्ययाश्रितौ भार्गवसोमपुत्रौ /
बाहुनीतो ऽत्र नरः कृपालु-
र्गुरुभ्यदाच्छादनभोजनाढ्यः //१५३//

b धनाश्रितौ CR, व्ययाश्रितौ F 150c °प्रपन्नः L
c सेव्यः C 153b व्ययास्थितौ W 153d. °भोजनानि L

चन्द्रस्य सौरक्षितिजौ व्ययस्थौ
धनाश्रितौ भार्गवदेवपूज्यौ /
नरो विनीतो हृतशत्रुवित्तः
सदाचरो धर्मसमन्वितश्च //१५४//

चन्द्रस्य सौरक्षितिजौ धनस्थौ
व्ययाश्रितौ भार्गवदेवपूज्यौ /
भवेद्विनीतोऽत्र पुमान् विदग्धः
प्रभूतसौख्यः प्रविभक्तगात्रः //१५५//

जीवेन्दुपुत्रौ व्ययगौ हिमांशो-
र्धनस्थितौ शुक्रदिनेशपुत्रौ /
भवेत् पुमान् नीतिपरः सकामी
पुत्राधिकारः परमव्वमारः //१५६//

जीवेन्दुपुत्रौ धनगौ हिमांशो-
र्व्ययस्थितौ शुक्रदिनेशपुत्रौ /
जनानुरक्तः सुरदेवभक्तो
भवेन्नरः शास्त्रविशारदश्च //१५७//

शुक्रेन्दुपुत्रौ व्ययगौ हिमांशो-
र्धनाश्रितौ मन्दसुरेन्द्रपूज्यौ /
जातोऽत्र भोगी सुनयप्रधानो
भवेन्मनुष्यः [illegible]मप्रभावः //१५८//

154 om. L, in marg. L² 154c. विधूतो C हृत° COR °शत्रुपक्षः SW 154d. सदा नरो BCIL²W 155c नरो विनीतो S 155d सविभक्त° FR 156c. भवेन्नरो S नीतिपर L सकामो W, सुकर्मा L 156d. पुत्राधिकारः BW, सुराधिकारः L नरव्व° BW °कारः C, °ता च S 158b धनस्थितौ W °सुरेज्य° BCILW, °शशांक° AOS °पुत्रौ ACIOS

शुक्रेन्दुपुत्रा धनगौ हिमांशो-
    र्व्ययस्थितौ सौरसुरेन्द्रपूज्यौ ।
भवेद्विभिन्नः सततं नयज्ञः
    प्रजानुरक्तः पुरुषः प्रगल्भः ॥१५९॥
——— ——— ———॥१६०॥
-॥१६१॥
एवं द्विविकल्पः
सौम्याननेयौ व्ययगौ सुधांशो-
    र्धनस्थिताः शुक्रसुरेज्यसौराः ।
भवेन्नरः शिल्पकलासु दक्षो
    भूपालभाभैः सततं सुपूज्यः ॥१६२॥
व्ययस्थिताः शुक्रसुरेज्यसौरा
    धनाश्रितौ भानिभुधौ हिमांशोः ।
भवेत् प्रभूताश्वगजाधिनाथो
    नरो विवेकी जितशत्रुपक्षः ॥१६३॥
जीवाबनेयौ व्ययगौ हिमांशो-
    र्धनस्थिताः शुक्रबुधार्कपुत्राः ।
भवेन्मनुष्यो द्विजदेवभक्तः
    प्रसन्नचेताः प्रणतो नयज्ञः ॥१६४॥
शुक्रज्ञसौरा व्ययगा हिमांशो-
    र्धनस्थितौ भौमसुरेन्द्रपूज्यौ ॥१६५॥
<व्ययस्थितौ शुक्रधरित्रिपुत्रौ>
    धनस्थिता मन्दबुधामरेज्याः ।
नरोऽत्र जातः प्रभवेत् समित्रः
    सतामभीष्टः प्रियदर्शनश्च ॥१६६॥

159b °शशांकपुत्रौ ABCFILORSW after 161 W [illegible]
श्रीवृद्धयवने द्वितीयविकल्पना संपूर्णा F
162a हिमांशो° S 162d °जोभैः I 163b [illegible]
163c प्रसूताश्व° BL, प्रसूतश्च S 164d °चेता FR
166b °मन्दजिसौम्या: ABCILOSW

व्यय स्थिता

रिनिपुत्रौ /

न्न्याधिकः पुण्यजनैः सदैव

भवेन्मनुष्यः शुभकर्मरक्तः //१६७//

चक्रार्कपुत्रौ व्ययगौ हिमांशो-

र्धनस्थिताः शुक्रबुधामरेज्याः /

भवेन्मनुष्यो नृपमानपुष्टः

शौर्यान्वितः शास्त्रविवर्जिताङ्गः //१६८//

वक्रार्कपुत्रौ धनगौ हिमांशो

र्व्ययस्थिताः शुक्रबुधामरेज्याः /

भवेन्मनुष्यः कृषिकर्मभागी

गुणाधिकः कल्पतरुस्वरूपः //१६९//

जीवेन्दुपुत्रौ व्ययगौ हिमांशो-

र्धनस्थिता मन्दसितावनेयाः /

भवेन्मनुष्यः प्रचुरान्नपानः

स्मिताभिभाषी दृढसौहृदश्च //१७०//

व्ययस्थिता मन्दसितावनेया

धनस्थितौ जीवशशाङ्कपुत्रौ /

नरोऽत्र जातः सततं विवेकी

महानुरागी गुणसंयुतश्च //१७१//

169d. शास्त्रविवर्जितांग: F °भि... L 169d.°तरुस्वरूप: FR

170d. °भिलाषी CIL, °भिरमा... 171d ...रागी R

170b जीव° ABCFILORSW

सितेन्दुपुत्रौ व्ययगौ हिमांशो-
धनस्थिता मन्दकुजामरेज्याः ।
भवेद्गुणज्ञाभिरतः सदैव
नरोऽत्र जातो वनितानुरागः ॥१७२॥
व्ययस्थिता मन्दकुजामरेज्या
धनस्थितौ शुक्रशशाङ्कपुत्रौ ।
भवेन्नरः स्त्रीदयितः शुभश्च
कृतज्ञताविष्कृतमानसश्च ॥१७३॥
सौम्यार्कपुत्रौ व्ययगौ हिमांशो-
धनस्थिता भौमसितामरेज्याः ।
शुचिः प्रगल्भोऽत्र भवेन्मनुष्यः
शुभाकृतिस्तीर्थरतः सुसौम्यः ॥१७४॥
व्ययस्थिता भौमसितामरेज्या
धनस्थितौ मन्दशशाङ्कपुत्रौ ।
नरो भवेत् साद्धुभवैः समृद्धः
प्रियातिथिर्ब्राह्मणसंमतश्च ॥१७५॥
शुक्रामरेज्यौ व्ययगौ हिमांशो-
धनस्थिता मन्दबुधाग्नेयाः ।
भवेन्मनुष्यः प्रथिताभिमानः
सतामभीष्टः कृतकोपचारः ॥१७६॥

172b मंत्रकुजामरेज्याः: FR 172c भवेद्गुणज्ञाभि° L
173c शुचिश्च: F, सुभक्तः: A 173d कृतघ्नता° S °जाकृत° FR, °तनिकृत° L, °विश्रुत° I, °विज्ञत° W 174a भौमामरेज्यौ ABCFILORSW 174b सौम्यसितार्कपुत्राः ABCFILORSW
175a सौम्यसितार्कपुत्रा ABCFILORSW 175b जीवभारेन्द्रपुत्रौ ABCFILORSW 175c सिद्धिभवैः: BLW 176b °बुधामरेज्याः: ABCFILORSW 176c–177a om. CLW
176d कृतकाम° S, कनकोप° I

व्ययस्थिता मन्दबुधावनेया
धनाश्रितौ जीवसितौ हिमांशोः ।
भवेन्नरः कीर्तिसुखैः स___
प्रभूतमित्रो द्रविणस्वभावः ॥१७७॥
सौरामरेज्यौ व्ययगौ हिमांशो-
र्धनस्थिता भार्गवभौमसौम्याः ।
नरो ऽत्र जातः सुतरां कृतज्ञो
भवेद् दृढद्रव्यसमृद्धिभागी ॥१७८॥
सौरामरेज्यौ धनगौ हिमांशो-
र्व्ययस्थिता भार्गवभौमसौम्याः ।
भवेच्च जातो नृपतेरभीष्टः
शुभप्रियः स्यात् सुमतिः कृतज्ञः ॥१७९॥
शुक्रार्कपुत्रौ व्ययगौ हिमांशो-
र्धनस्थिता जीवबुधावनेयाः ।
भवेत् सुधामा पुरुषो ऽत्र जातः
स्मूर्तिः प्रियसाधुमानी ॥१८०॥
शुक्रार्कपुत्रौ धनगौ हिमांशो-
र्व्ययस्थिता जीवबुधावनेयाः ।
नरो ऽत्र जातः प्रभवेत् सुचित्तः
सदारपुत्रार्थयुतस्मदाढ्यः ॥१८१॥
इति श्रीवृद्धयवने दुरुधरायोगाध्यायः ॥

177b om. W   177b धनस्थितौ S   after 177b F repeats °अधामेरज्या ABFIORS
176c   177c °सुखैः ABCILORS   समूहः C   178b °सौम्यभौमाः L
178c °नरां — 179c नृ° om. L   178d °समृद्धि° FR   179a
सरामेरज्यौ W   179b °व्येमाश्रिता R   179c भवेत्र ABCFIOR,
नरो त्र CJW   179d शुभप्रियः om. F   180a चक्रार्क° ABCFILO-
RJW   धनगौ F   180b °धेमाश्रिता F   180c—181b in marg.
O   180d—181c जातः om. F   181a नक्राती° ABCILOR
col. श्रो° om. FR   दुरधरा° FLR   after col. W adds
संपूर्णः

APPENDIX-I

After [illegible] . Q adds:

हेमविद्रुम(विद्रुम)लाभं च मण्य(मणि)रत्नप्रवालकम् /
. जनागमकल्याणं सूख्यं(सौख्यं) भवति नित्यस(नित्यशः) ॥१॥
अजीर्णं नेत्ररोगं च शिररोगं करोत्येत(करोत्यतः) /
धर्मं राजभयं विंद्यात(विंद्याद्) रविब्बिंदु(रविबिन्दु)र्यदा भवे[त्] ॥२॥
चन्द्रे हयास(हयाश्च)गन्धादिर्लेपनं स्त्रीरतिर्भवेत् /
स्नेहममृतभोज्यं च सर्वत्र सूषमाद्सेत्(सुखाद्शेत्) ॥३॥
[स्ना]नभोजनः(स्नानभोजन)निद्राया मालस्योकल्ये(लस्योत्कः?) सरोगवान् /
च क्षौद्र(क्षुद्र) रोगस्य पीडायां चन्द्रबिंदु(चन्द्रबिन्दु)र्विजायते ॥४॥
[क]नकताम्र(कनकताम्र)मणिश्चैव प्रवालरकतवासश्चां(रक्तवासकः) /
[रा]ज्यमान्यं(राजमानो) जप(यशः)प्राप्तिभौमरेषाः(रेखा)गतो जदि(यदि) ॥५॥
व्याधिदूष(दोष)धननाशो नेत्रपीडा तथैव च /
अग्निचौरभअं(भयं) चात्र शस्त्रविचर्चिकाद्दरात(दरा) ॥६॥
हेमरत्नानि वस्त्राणि ग्रह(गृह)कल्याणमेव च /
राज्य(राज)मित्रं प्रमाणं च बुधरेखा जदा(यदा) भवेत् ॥७॥
[रो]गं चाथ नाशं च मित्राणां बुद्धिविग्रहम् /
[प्री]तिकलेत्र(कलत्र)भयं (?)चन्ता सोमबिन्दुसर्वदा ॥८॥
[क]नकरत्नानि वस्त्राणि गौमेध्याद्जं(गोमेधाद्जं) सूषं(सुखम्) /
कल्याणं सज्जनं प्राप्तिर्गुरुरेखा जदा(यदा) भवेत् ॥९॥
असखं च शरीरेभ्यो धनहानिजदा(निर्यदा) भवेत /
वातोपित्तसहश्चैव नेत्ररोगो विद्याभअं(विषाभुजम्) ॥१०॥
नृत्यं गीतविलासं च श्वेतवस्त्रसमागमम् /
[र]त्नजटति(जाति)सगन्धानि भृगरेखा जदा(यदा) भवेत् ॥११॥
रोगव्याधि धननाशं मन्दाग्निश्छिद्रतो भवेत् /

श्लेषमाज्वर:श्रितस्य(श्लेष्मायरश्रिहं स्यात्) शक्रबिन्दुजदा(यदा) भ[वेत्]
धनधर्मभहीलाभं राज्यसैनमान(राजसन्मान)मैवे च /
कल्याणसखमादाय शनिरेखा जदा(यदा) भवेत् ॥१३॥
अग्निकसठे(कष्ट) च बंधवं(बन्धनं) च शत्रुवादसमोद्सेत्
(वादमाद्शेत्) /
[शी]र्षपात(शीर्षपातो) भवैत(भवेद्) रोगः कलैशं(कलिः) [illegible]
[illegible] दा ॥१४॥
[illegible] वृधिजैवनभ[illegible]पाटीकायां शगहिजीश्रीमोहे[illegible]
[illegible]तायां अह[illegible] [illegible]बिन्दुफलाध्याय संपूर्णं /

After VIII 1 W adds:

स्वात् सायाष्टत्रिकेन्द्रे स्वनस्व भवरातिगः नित्यं (see 6a)
← स्वान्मन्दात् कुज्ञतो रविर्मूर्तितपो व्याथकेन्द्रस्थितः
शुक्रादस्तरिपव्ययेषु च गरोर्धर्मारिपत्रायिषु /
← चन्द्रात् प्राप्तिरिपत्रिधर्मसु [शिज्ञातो च त्रिनन्दव्ययारिप्राः]
वर्गस्तनुतस्त्रिसस्वायोत्मारिरिष्फे शुभम् //२//
भौमात् सौनेवधीष्टिलोपचयगः षट्प्राप्तिधीस्थो ऽर्कजात्
लग्नाद्योपचये रवेरुपचयाद्यास्तेष शस्तो बुधात् /
धीरन्ध्रेषु चतुष्टयेषु च गरोः केन्द्राष्टलाभव्यये
स्वाष्टैकोपचयास्तगोस्त्र(से) सिताम्बुत्रिकोणे भृगोः //३
इति भौमाः //

3 is then repeated, after which comes:

स्याद्भौमो ऽष्टचतुष्टयायधनगो जीवात् [यमायाधनर्क्षः]
चन्द्रादपि रिपत्रिगो भृगुसुताद्व्यान्त्यजन्माघारिगः /
ज्ञात् पंचायरिपुस्त्रिगो ऽर्कतनयात् केन्द्राष्टधर्मायगः
सूर्याद्योपचयात्म(ते)षु तनुतस्त्र्यायारिखाद्यैः शुभः //६
भौमाष्टकम् //
शुक्रा(द्भा)यस्त धलाभनवगः सौम्यः कुजा(त्) [स्वास्तगः]
केन्द्रे ... स्वतो ऽप्युपचयान्त्यैकत्रिकोणे शुभः /
कोणात् [... के] रवे रिपभवाष्टान्त्ये गरोरिन्दुजः
स्वायाष्टारिसुखार्थगः स्वसभवाष्टैकाम्बुषट्सूदयात् //५//
बधाष्टकम् //
स्वात् सायाष्टत्रिकेन्द्रे स्वनवसभवारातिधीस्थश्च शुक्रात् ...गः
लग्नात् केन्द्राम्बुधीषट्स्वनवस कुजात् स्वाष्टकेन्द्रीय
इनो मुनार्थकोणानिषु सहजनवायोष्टकेन्द्रार्थगो ऽर्कात्
ज्ञात् कोणैकायखाम्बधनरिपुषु च शनेस्त्र्यन्त्यधीषट्सु शस्त
स्वास्तान्त्याहितवर्जितेषु तनुतः शुक्रो बिनास्तारिखं
ज्ञातुस्वान्मदनव्ययारिरहितेष्वर्कात् व्ययाष्टासिषु
मन्दात् व्येकरिपव्ययास्तरहिते धीजन्मभायाष्टधीस्थे
ज्ञात् कोणे(के) भवत्रिषट्सु भवधीत्र्यन्त्यारिधर्मे कुजात् /
Then follows 6a–c, after which:
... त्रिषट्ायधीषु रवितो ऽष्टायद्विकेन्द्रेषु भौमात्

... त्रिषु तनोः स्वायान्त्यषट्त्र्येकगः /
... बान्त्यखाष्टेसु भृगोरन्त्यायषट्संस्थित-
... रिपुत्रिगः सुरगुरो(र)न्त्यायधीशत्रुगः //८

स्थानानि यानि प्रतिपादितानि
गृहाणि भाग्याव्ययुतानि नूनम् /
तयोर्वियोगादधिकं फलं यत्
स राशितो यच्छति सोऽयमिन्दुः //९//
धाहत्यो नवयुगानि नवाग्नयश्च
वेदेषवो रसशराः करसाग्नकाश्च /
मन्दाग्नयो दिनकराः क्रमशोऽत्र रेखा
होराश्रितं गृहकमन्त्यतनोस्तथा: //१०//

After VIII 30 W repeats 5a–6a

12801